Digitized by eGangotri and Sarayu Trust.

न्यायदर्शनम् ।

महर्षिगोतमप्रणीतम् ।

कुरुक्षेत्रभूषण[1]पण्डितछज्जूरामशास्त्रि[2]विद्यासागर[3]-

कृतया

परीक्षोपयोगि--छज्जूरामवृत्या

सहितम् ।

स्वेनैव संशोध्य प्रकाशितम् ।

मूल्यमर्धरूप्यकम् ।

१९९०

१ इयंपदवी कुरुक्षेत्रीयविद्वत्परिषदःप्राप्ता २ इयंपदवी पंजाबयूनिवर्सिटीतःप्राप्ता ३ इयंपदवी–गोवर्द्धनमठाधीश्वर–परमहंसपरिव्राजकाचार्य जगद्गुरुशंकराचार्य श्रीभारतीकृष्णतीर्थ पादेभ्यःप्राप्ता ॥

Only Title Page Printed at the Printing & Stationery Depot, Delhi.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

11260

Rs 0-8-0

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भूमिका ।

अयि दर्शनशास्त्र रसिका विद्वांसो विद्यार्थिनश्च । विदितमेतद् भवतां यत्परमकारुणिको भगवान् गोतमर्षिः दुःखपङ्कनिमग्नमेतज्जगदुज्जिहीर्षुः मोक्षप्राप्ति–निदानं न्यायदर्शनं प्रणिनाय । तस्योपरि कौटिल्य चाणक्यापरनामा वात्स्यायनो मुनि र्भाष्यं कृतवान् तच्चातिकुटिलं वर्तते । वृत्तिश्च–विश्वनाथन्यायपञ्चाननकृता—नव्यन्यायमनुसरति । नसूत्रार्थंलापयति । एतस्मादेवहेतोः—परीक्षार्थि–विद्यार्थिनां भाष्यस्य वृत्तेश्च पठनात्प्राक् सूत्रार्थज्ञानाय मयेयं न्यायसूत्रवृत्तिः प्रकाशिता । यद्यनया छात्राणा—मन्येषां च कश्चिदप्युपकारो भवेत् । तदा स्वकीयं परिश्रमं सफलं मंस्ये । अस्यावृत्तेः प्रकाशने कुरुक्षेत्रमध्यवर्ति–अलवाग्रामवासि—महन्तश्रीदयारामसाधुवर्यैर्द्रव्यसाहाय्यंकृतमिति मुहुर्मुहुःतेषां महात्मनां धन्यवादं करोमि ॥ निवेदको विद्वदनुग्राह्यो विदुषामनुचरः—

छज्जूरामशास्त्री ।

MOTI LAL BANARSI DASS LAHORE.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

॥ भगवान्गोतमोन्यायदर्शनंच ॥

महर्षिगोतमोमहाभारतीयशान्तिपर्वणिस्मर्यते—

"न्यायतन्त्राण्यनेकानितैस्तैरुक्तानि यद्यपि ।
न्यायतन्त्रंहिकात्स्न्र्येन गोतमोवेदतत्वतः ॥

सर्वेषां दार्शनिकानामेतेविषयाः सन्ति-ईश्वरोजीवः संसारोमोक्षश्च ।

गोतममते—ईश्वरो निराकारः सर्वज्ञः सर्वव्यापको जगन्निमित्त-कारणंच । जीवःप्रतिशरीरंभिन्नोविभु र्नित्यश्च । पृथिव्यादिपंचभूतानां परमाणुभिर्द्व्यणुकमारभ्य ब्रह्माण्डपर्यन्तं जगज्जायते । आत्मादि—पदार्थ-तत्वज्ञानाज्जीवस्य मोक्षो भवतिनपुनरावृत्तिः "नसपुनरावर्तते, इतिश्रुतेः ।

न्यायदर्शने—पञ्चाध्यायाः सन्ति, प्रत्यध्यायमाह्निकद्वयम् । प्रथमाध्याये—प्रमाणादिषोड़शपदार्थानां लक्षणम् । द्वितीयाध्याये—संशय प्रमाणानां परीक्षा, शब्दानित्यत्वव्यवस्थापनंच । तृतीयाध्यायमारभ्य चतुर्थाध्यायप्रथमाह्निकपर्यन्तमात्मादि-प्रमेयपरीक्षा । चतुर्थाध्यायाद्विती-याह्निके—तत्वज्ञानतत्फलतत्कारण-निरूपणं, परमाणोर्नित्यत्वव्यवस्थापनं च । पञ्चमाध्यायस्यप्रथमाह्निके-जातिभेदाः, द्वितीयाह्निके-निग्रहस्थान भेदाइति—विषयसूची । अधिकं तत्र तत्र ग्रन्थेस्पष्टमेव । छज्जूरामशास्त्री ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कुरुक्षेत्र भूषण पं० कज्जू राम शास्त्री विद्यासागरः ।

CC-0. In Public Domain. Funding by IKS-MoE

Murari Art Press, Delhi.

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दादूपन्थी महन्त श्री दयाराम,



मु० अलेवा, तथा हैदरकुली-देहली,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

॥ श्रीरस्तु ॥

अथन्यायदर्शनम् ।

छज्जूरामवृत्तिसहितम् ।

प्रथमाध्याये प्रथमाह्निकम् ।

श्रीगणेशं नमस्कृत्य मामकीनाममातरम् ।
पितरं मोक्षरामाह्वं मूलचन्द्रं च सोदरम् ॥ १ ॥
कुरुक्षेत्रमध्यवर्ति—रिटोलीग्रामवासिना ।
नेकीरामरामकृष्णभट्टयोरग्रजन्मना ॥ २ ॥
गौडपण्डितवर्येण छज्जूरामेण शास्त्रिणा ।
न्यायसूत्रार्थबोधाय वृत्तिरेषा विधीयते ॥ ३ ॥

अथात्रभवान् भगवान् गोतमर्षिर्मोक्षप्राप्तिनिदानं पदार्थ तत्त्वज्ञान मुपदेष्टुं शास्त्रमारभते—

प्रमाण प्रमेय संशय प्रयोजन दृष्टान्त सिद्धान्तावयव तर्क निर्णय वाद जल्प वितण्डा हेत्वाभास छल जाति निग्रह

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्थानानां तत्वज्ञानान्निःश्रेयसाधिगमः ॥ १ ॥

प्रमाणानि च प्रमेयञ्च संशयश्च प्रयोजनं च दृष्टान्तश्च सिद्धान्तश्चावयवाश्च तर्कश्च निर्णयश्च वादश्च जल्पश्च वितण्डा च हेत्वाभासाश्च छलं च जातयश्च निग्रहस्थानानि च तेषां तत्वज्ञाना न्निःश्रेयसाधिगमो निःश्रेयसप्राप्तिर्भवतीत्यर्थः । निःशेषं श्रेयो निःश्रेयस मपवर्गो मोक्षइति यावत् । निःश्रेयसे खल्वधिगते सर्वमन्यच्छ्रेयः परिसमाप्यते, कृत कृत्यश्च पुरुषोभवति । ननु तमेव विदित्वाऽतिमृत्युमेतिनान्यः पन्था विद्यतेऽयनाय" (यजुः ३१।१८) इत्यादि "श्रुतेरात्मज्ञान मेव मोक्षसाधनमुच्यते, नतुप्रमाणादिपदार्थज्ञान मिति चेच्छृ॒णु – आत्मज्ञानं पदार्थज्ञानमन्तरेण न भवति । पदार्थ प्रतिपादकंचन्यायशास्त्रम् । यत्रेदमुच्यते–"पदार्थतत्वविज्ञाता यत्र कुत्राश्रमे वसन् । जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः ॥ एतस्य न्यायशास्त्रस्य प्रतिपाद्याः षोड़शैव पदार्था न न्यूना अपर्याप्तत्वात् । नाप्यधिका अनुपयुक्तत्वात् । तेषु सकल पदार्थव्यवस्थापकत्वेन प्राधान्यात् प्रथमं प्रमाणं तदनन्तरं प्रमेयमुपदिश्यते । संशयादयस्तु यथासम्भवं प्रमाणेप्रमेयेचाऽन्तर्भवन्तोपि तर्कप्रवृत्तिहेतुत्वात्पृथगुपदिश्यन्ते ॥ १ ॥

ननु कयारीत्या तत्वज्ञानतोनिः श्रेयसं भवति ? तत्राह –

दुःख जन्म प्रवृत्ति दोष मिथ्याज्ञानानामुत्तरो

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

चारापाये तदनन्तरापायादपवर्गः ॥ २ ॥

दुःखं च जन्म च प्रवृत्तिश्च मिथ्याज्ञानं च तेषां दुःखादीनां मध्ये, उत्तरोत्तराणां मिथ्याज्ञानादीनामपाये नाशे सति, तदनंतराणां दोषादीना मपायाद्विनाशा दपवर्गो मोक्षः संभवतीत्यर्थः। मिथ्याज्ञान निवर्तकं च पदार्थ तत्वज्ञान मेव, तद्यथोक्तं सांख्ययोगवेदान्तेषु— "नियतकारणात्तदुच्छित्तिर्ध्वान्तवत्" सां० १।५६। "विवेकख्यातिरविप्लवा हानोपायः" यो० १।२६। विद्यैव तु निर्धारणात्" वे० ३।३।४८। मिथ्याज्ञानापाये दोषा अपयन्ति दोषापाये प्रवृत्ति रपैति प्रवृत्यपाये जन्मापैति जन्मापाये दुःखमपैति दुःखापाये चात्यन्तिकोऽपवर्गो निःश्रेयसमिति ॥२॥

तत्र प्रथमोद्दिष्टं प्रमाणपदार्थं विभजते—

प्रत्यक्षानुमानोपमान शब्दाः प्रमाणानि ॥३॥

प्रमाकरणं प्रमाणम्, तच्च प्रत्यक्षं चानुमानं चोपमानञ्च शब्दश्चेति भेदाच्चतुर्विधमित्यर्थः। सर्वप्रमाण ज्येष्ठत्वात्प्रत्यक्षस्य प्रथमं, तत्पूर्वकत्वाच्चानुमानस्य तदनन्तरं, तत्समानत्वाच्चोपमानस्यततः पश्चात्, प्रत्यक्षानुमानोभयपूर्वकप्रवृत्तिमत्वात् शब्दस्यान्तेनिर्देशः। त्रिविधाचास्यशास्त्रस्य-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रवृत्तिः--उद्देशो लक्षणं परीक्षा च। तत्र नामधेयेन पदार्थमात्रस्य कथनमुद्देशः। समानासमानजातीयव्यवच्छेदकोधर्मो लक्षणम्। लक्षितस्य लक्षणं संभवति नवेति विचारःपरीक्षा। कस्मात्पुनरेतादृशी शास्त्रप्रवृत्तिः सुखेन पदार्थज्ञानाय ॥ ३ ॥

अथप्रत्यक्षलक्षणमाह—

इन्द्रियार्थ संनिकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् ॥४॥

घ्राणादीनामिन्द्रियाणां, गन्धादिभिरर्थैः सन्निकर्षः संयुक्त समवायादिलक्षणः संबन्धस्तेनोत्पन्नं, अव्यपदेश्यं –शाब्दबोधातिरिक्तं, अव्यभिचारि–भ्रमातिरिक्तं, व्यवसायात्मकं—निश्चयात्मकं यज् ज्ञानं तत्प्रत्यक्ष मित्यर्थः। संनिकृष्टविषयकंज्ञानं शब्देनापि संभवति तद्व्यवच्छेदाय अव्यपदेश्यमिति विशेषणम्। मन्दतमसि रज्जौसर्प इति भ्रमात्मकं ज्ञानं संभवति तद्व्यवच्छेदाय अव्यभिचारीति विशेषणम्। दूरात्पश्यतो 'धूमोवा रेणुर्वा, स्थाणुर्वा पुरुषोवा, इति संशयात्मकं ज्ञानं संभवति तद्व्यवच्छेदायव्यवसायात्मकमितिविशेषणम् ॥४॥

अथानुमानलक्षणमाह—

तत्पूर्वकं त्रिविधमनुमानं पूर्ववत्-शेषवद्-सामान्यतोदृष्टंच ॥ ५ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तत्पूर्वकं=प्रत्यक्षपूर्वकं ज्ञानमनुमानं भवतीशेषः । तच्च पूर्ववत्,शेषवत्,सामान्यतोदृष्टं चेति त्रिविधं =त्रिप्रकारकमित्यर्थः। पूर्वं कारणं तद्वत् पूर्ववत्, यथा धूमेन वह्न्यनुमानम्।शेषः कार्यं तद्वत् शेषवत्,यथा नदीवृद्ध्यावृष्टयनुमानम । सामान्यतो दृष्टव्याप्तिकं सामान्यतोदृष्टं, यथा कुरुक्षेत्रे दृष्टस्य पुरुषस्य काश्यां दर्शनेन गत्यनुमानम् ॥ ५ ॥

अथोपमानलक्षणमाह—

प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानम् ॥६॥

प्रसिद्धस्य=पूर्वदृष्टस्य, गवादेः, साधर्म्यात्सादृश्यज्ञानात्, यत्साध्यसाधनं = संज्ञासंज्ञिसंबन्धज्ञानं,तदुपमानं उपमानप्रमाणमित्यर्थः । 'गोसदृशोगवय' इति वाक्यश्रवणानन्तरं वनंगतो नागरिको गोसदृशं जीवं दृष्ट्वा 'अयंगवयपद वाच्यो गोसदृशत्वात , इत्येवं गवय-गवय शब्दयोः संज्ञासंज्ञिसंबन्धमवधरयति । संज्ञासंज्ञिसम्बन्धाज्ञानमेवोपमान फलम् । यदाहकुसुमाञ्जलिकारोपि= "संबन्धस्यपरिच्छेदः संज्ञायाः संज्ञिनासह । प्रत्यक्षादेरसाध्यत्वादुपमानफलंविदुः ॥ ६ ॥

अथशब्दलक्षणमाह—

आप्तोपदेशःशब्दः ॥ ७ ॥

आप्ता यथार्थवक्तारस्तेचात्र प्रत्यासत्या न्यायशास्त्रप्रव-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

र्तकाः कणादगोतमादयस्तेषामुपदेशो वाक्यजनितंवाक्यार्थं ज्ञानं शब्दप्रमाणमित्यर्थः। यथेन्द्रोदेवराजः, स्वर्गेऽप्सरस' इत्यादिः। आप्तग्रहणेन जैन-बौद्ध-' चार्वाकादीनामागमाभासा निराकृता भवन्ति। एभिश्चतुर्भिरेव प्रमाणैः सर्वेषां सर्वे व्यवहाराः प्रवर्तन्ते नातोऽन्यथा ॥ ७ ॥

शब्दप्रमाणस्य विभागमाह—

स द्विविधो दृष्टादृष्टार्थत्वात् ॥ ८ ॥

स शब्द आप्तोपदेशो द्विविधो द्विप्रकारकः। दृष्टार्थोऽदृष्टार्थश्च, यस्येह दृश्यतेऽर्थः स दृष्टार्थो यथा 'गामानय' इत्यादिस्तदर्थस्यगवादेर्दृश्यमानत्वात्। यस्यामुत्र प्रतीयते सोऽदृष्टार्थो यथा 'स्वर्गकामोयजेत' इत्यादिस्तदर्थस्य स्वर्गादेरदृश्यमानत्वात्। स प्रमाणभूतः शब्द ईश्वरप्रोक्तत्वेनमहर्षिगण प्रोक्तत्वेन चापि द्विविधःऋग्वेदो यजुर्वेदःसामवेदोऽथर्ववेद इतिचत्वारोवेदाः,ऐतरेय ब्राह्मणं,शतपथब्राह्मणं,ताण्डयब्राह्मणं, गोपथब्राह्मण, मिति चत्वारि ब्राह्मणानीश्वरप्रोक्तः। षड़ंगानि, षडुपांगानि, मानवादिधर्मशास्त्रं, रामायणं,भारतंचेत्यादिमहर्षिगणप्रोक्त इति विवेकः॥ ८ ॥

अथोद्देशक्रमप्राप्तस्य प्रमेयस्य विभाग माह—

आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभाव फलदुःखापवर्गास्तु प्रमेयम् ॥ ९ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

आत्मा च शरीरंचेन्द्रियाणिचार्थाश्च बुद्धिश्च मनश्च प्रवृत्तिश्च दोषाश्च प्रेत्यभावश्च फलंच दुःखंचापवर्गश्च त एते आत्माद्यपवर्गान्ता द्वादशपदार्थाः प्रमेयम् । पृथिव्यादीनामेतद्व्यतिरिक्त प्रमेयाणां,सत्वेऽपि तज्ज्ञानस्यापवर्ग प्रयोजकत्वाभावान्न तदनुक्तिर्दोषाय ॥ ९ ॥

आत्मानं लक्षयितुकामस्तत्सद्भावे प्रमाणमाह—

इच्छा द्वेष प्रयत्न सुख दुःख ज्ञानान्यात्मनो लिङ्गम् ॥१०॥

इच्छाच द्वेषश्च प्रयत्नश्च सुखंच दुःखंच ज्ञानंच तान्येतानि षट्पदार्था आत्मनो लिंग मात्मसद्भावे प्रमाणमित्यर्थः । इच्छादयः शरीरादिषुनोपपद्यन्ते मृतेष्वनुपलम्भात् । नवामनस्युपपद्यन्ते । गुणभूतानामिच्छादीनामुत्पत्तौ मनसःकरणत्वात् । यत्र समवायेनोत्पद्यन्ते स आत्मा ॥१०॥

शरीरलक्षणमाह—

चेष्टेन्द्रियार्थाश्रयःशरीरम् ॥११॥

चेष्टाचेन्द्रियाणिचार्थाश्च तेषामाश्रयो यत् तच्छरीरम् । तत्र चेष्टा प्रवृत्तिः, घ्राणादीनीन्द्रियाणि, गन्धादयश्चार्थाः । यद्धि हिताहितप्राप्तिपरिहारयोः प्रवर्तते । येनानुगृहीतानीन्द्रियाणि स्वस्वविषयान् गृह्णन्ति । यस्मिंश्चसति सुख दुःखादिभोगे गन्धादयोऽर्थानिमित्तत्वमुपयान्ति तच्छरीरमित्यर्थः॥११।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

इन्द्रियाणिविभज्य लक्षयति—

घ्राणरसनचक्षुःत्वक् श्रोत्राणीन्द्रियाणि भूतेभ्यः ॥१२

घ्राणं च रसनं च चक्षुश्च त्वक् च श्रोत्रं च तानीमानि पञ्चेन्द्रियाणि, पृथिव्यादिपंचभूतेभ्यः प्रादुर्भवन्तीत्यर्थः । तत्र-पृथिवीप्रकृतिकं घ्राणं, जल प्रकृतिकं रसनं, तेजः प्रकृतिकं चक्षुः, वायुप्रकृतिकं- स्पर्शनम्, व्योमप्रकृतिकञ्चश्रोत्रमिति ॥ १२ ॥

ननुकानि भूतानि येभ्यो घ्राणा दीनीन्द्रियाणि जायन्ते तत्राह—

पृथिव्यापस्तेजोवायुराकाश मिति भूतानि ॥ १३ ॥

पृथिव्यादीनि पंच भूतानि घ्राणादीनां क्रमेण कारणानि । तत्र पृथिव्याः कार्यं घ्राणं, अपांकार्यं रसनं, तेजसःकार्यं चक्षुः, वायोःकार्यं त्वक्, आकाशस्य कार्यं श्रोत्रमिति ॥ १३ ॥

अर्थं विभज्य लक्षयति—

गन्धरसरूपस्पर्शशब्दाःपृथिव्यादिगुणा स्तदर्थाः ॥१४॥

पृथिव्यादिगुणाः=पृथिव्यादि पंच भूतानां विशेष गुणाः, गन्धादयस्तदर्था स्तेषां घ्राणादीनामिन्द्रियाणामर्था विषया इत्यर्थः । यथा घ्राणस्यगन्धो रसनाया रस इति ॥ १४ ॥

बुद्धि लक्षणमाह—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम् ॥ १५ ॥

बुद्धिरुपलब्धिर्ज्ञानमित्येतत्त्रयमर्थान्तरं न भवति किन्तु, समानार्थकमित्यर्थः । एतेन-"अध्यवसायोबुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यं, मित्यादि सांख्यकारिकया अचेतनाया बुद्धेः परिणामविशेषोज्ञानमितियत्सांख्यैरुक्तं तदयुक्तं बुद्धिज्ञानोपलब्धीनां सामानाधिकरण्यदर्शनादेकार्थबोधकत्वाच्च ॥ १५ ॥

क्रमप्राप्तं मनोलक्षयन् तत्सद्भावेप्रमाणमाह—

युगपज्ज्ञानानुत्पत्तिर्मनसोलिङ्गम् ॥ १६ ॥

आत्मेन्द्रियार्थसंयोगेसत्यपि रूपरसाद्यनेकविषयकाणि यन्नोत्पद्यन्ते युगपज्ज्ञानानि तन् मनसोलिङ्गं मनःसद्भावे प्रमाणमित्यर्थः । मनश्चाणु तस्य युगपदनेकैरिन्द्रियैः सह संयोगो न भवति ततोनानेकज्ञानोत्पाद इतिभावः ॥ १६ ॥

प्रवृत्तिलक्षणमाह—

प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः ॥ १७ ॥

वाक् च बुद्धिश्च शरीरं च तेषां य आरम्भो व्यापारः सा प्रवृत्तिरित्यर्थः । बुद्धिरत्रमनोऽभिप्रेतमितिभाष्यम् । सोऽयमारम्भःशरीरेण वाचा मनसा च पुण्यः पापश्चभवति ॥ १७ ॥

दोषलक्षणमाह—

प्रवर्तनालक्षणादोषाः ॥ १८ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रवर्तना = प्रवृत्तिहेतुत्वं, ज्ञातारं हि पुरुषं रागादयोदोषाः प्रवर्तयन्ति शुभाशुभकर्मसु, तदेवलक्षणं येषांतेदोषा इत्यर्थः । मण्डनमिश्रोप्याह—"प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनाम् । पुंसां नेष्टाभ्युपायत्वात्क्रियास्वन्यःप्रवर्तकः ॥ १८ ॥

प्रेत्यभावलक्षणमाह—

पुनरुत्पत्तिःप्रेत्यभावः ॥१९॥

पूर्वशरीरंत्यक्त्वापुनरुत्पत्तिः शरीरान्तरोपग्रहःप्रेत्यभावः । प्रेत्य मृत्वा भाव उत्पत्तिरितिव्युत्पत्तेः । देहेन्द्रियमनोबुद्धिवेदनाभि रात्मनोवियोगोमरणं, संयोगश्चजन्म, तयोर्यः पुनः पुनरभ्यासोऽनादिरपवर्गान्तःसप्रेत्यभाव इतिभावः । तथाच-भगवद्गीता "जातस्यहिध्रुवोमृत्युर्ध्रुवंजन्ममृतस्यचेति ॥१९॥

फललक्षणमाह—

प्रवृत्तिदोषजनितोऽर्थःफलम् ॥ २० ॥

प्रवृत्या = धर्माधर्माभ्यां, रागद्वेषादिदोषैश्च जनितः = उत्पादितोऽर्थः = सुखदुःखभोगपदार्थःफलम् ॥ २० ॥

दुःखलक्षणमाह—

बाधनालक्षणंदुःखम् ॥ २१ ॥

बाधनापीड़ा, सैवलक्षणं यस्यतद्दुःखमित्यर्थः । दुःखित श्चसर्वं दुःखमयं पश्यन् विरज्यते विरक्तो मुच्यते ॥ २१ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अपवर्गलक्षणमाह—

तदत्यन्तविमोक्षोऽपवर्गः ।। २२ ।।

तेन दुःखेनजन्मनात्यन्तविमोक्षोविमुक्तिरपवर्गपदार्थः । अपवर्गं खल्वधिगतःपुरुषोनपुनरावर्तते संसारवर्त्मसु । तथा च भगवद्गोता "मामुपेत्यतु कौन्तेय, पुनर्जन्म न विद्यते ॥ पदार्थज्ञानस्यापि परमं प्रयोजन मपवर्गएव । पदार्थज्ञानन्तु कदाचित्कस्यचिदेव शुभकर्माणि कुर्वतो भगवद्भक्तया शास्त्राभ्यासेनचोत्पद्यते । तथाचश्रूयते – 'यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिताह्यर्थाःप्रकाशन्तेमहात्मनः ॥२२॥

प्रमाणं प्रमेयं च विभज्यलक्षितं सम्प्रतिसंशयलक्षणमाह—

समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षोविमर्शःसंशयः ।।२३॥

संशयस्यचत्वारिकारणानिभवन्ति--समानानेकधर्मोपपत्तेः संशयो जायते, यथा स्थाणुपुरुषयोरुर्ध्वत्वविशालत्वादीनांसमानानेकधर्माणां दर्शनेन संशयोभवति – 'स्थाणुर्वापुरुषोवा' विप्रतिपत्तेः = परस्परं विरुद्धसिद्धान्तज्ञानादपिसंशयाजायते। केचिदात्मनोविभुत्वंवदन्ति केचिदणुत्वं तथासति संशयोभवति —'आत्माविभुर्वाणुर्वा' उपलब्धेरव्यवस्थातोऽनियमादपि संशयोजायते यथासद्देवोपलभ्यते नास्तिनियमः किन्त्वसदपि ततश्च रजतेदृष्टेसतिसंशयोभवतिकिमिदंदृश्यमानंरजतंशुक्तिरजतवत्

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

असद्वा सद्वेति। अनुपलब्धेरव्यवस्थातोऽनियमादपिसंशयोजायते,यथा = असदेवनोपलभ्यते नास्तिनियमःकिन्तु सदपिनोपलभ्यते यथापृथिव्यन्तर्गतं जलं ततश्चसंशयोभवति किमसन्नोपलभ्यते, किंवासन्नोपलभ्यतेप्रतिबन्धकवशादितिचतुर्भिःकारणै विशेषधर्म निर्णयापेक्षोविमर्शःसंशयइत्यर्थः ॥२३॥

प्रयोजनलक्षणमाह—

यमर्थमधिकृत्यप्रवर्त्ततेतत्प्रयोजनम् ॥२४॥

यं पदार्थमधिकृत्योद्दिश्यपुरुषःप्रवर्ततेतत्प्रयोजनम्। सर्वे खलु प्राणभृतां व्यवहाराः प्रयोजनाश्रयाः प्रवर्तन्ते"प्रयोजनमनुद्दिश्य नमन्दोऽपिप्रवर्तते, इतिभट्टपादोक्तेः। "सर्वस्यापिहिशास्त्रस्यकर्मणोवापिकस्यचित्। यावत्प्रयोजनं नोक्तं तावत्तत्केन गृह्यते ॥ इत्याचार्योक्तेश्च ॥ २४ ॥

दृष्टान्तलक्षणमाह—

लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यंसदृष्टान्तः॥२५॥

यस्मिन्पदार्थे लौकिकानां = शास्त्रीयज्ञानरहितानां परीक्षकाणाँ = शास्त्रीयज्ञानवतां च बुद्धिसाम्यंवर्ततेसोऽर्थोदृष्टान्तो यथामहानसेवन्हिधूमयोःसामानाधिकरण्यविषयाबुद्धिरुभयेषां--लौकिकपरीक्षकाणां साम्येन वर्तते इतिमहानसोदृष्टान्तः ॥२५॥

सिद्धान्तलक्षणमाह —

तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः ॥२६॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तन्त्रं शास्त्रमधिकरणं ज्ञापकं यस्य तादृशो योऽभ्युपगमः स्वीकारस्तस्य संस्थितिः समीचीनतया स्थितिः = शास्त्रज्ञापितार्थनिश्चय इति यावत् सिद्धान्तो यथा न्यायस्य परमाणुवादः सांख्यस्य प्रकृतिवादः ॥ २६ ॥

तस्य विभागमाह—

सर्वतन्त्र-प्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात् ॥ २७ ॥

सर्वतन्त्रसंस्थितिः प्रतितन्त्रसंस्थितिरधिकरणसंस्थितिरभ्युपगमसंस्थितिः = तासामर्थान्तरभावात् = परस्परंभेदात् सिद्धान्तश्चतुर्विधो भवतीत्यर्थः । यथा सर्वतन्त्रसिद्धान्तः प्रतितन्त्रसिद्धान्तोधिकरणसिद्धान्तोऽभ्युपगमसिद्धान्तश्चेति। २७

तेषु सर्वतन्त्रसिद्धान्तलक्षणमाह—

सर्वतन्त्राविरुद्धस्तंत्रेऽधिकृतोऽर्थःसर्वतन्त्रसिद्धान्तः ॥२८॥

सर्वैस्तन्त्रैरविरुद्धः केनापि शास्त्रेण न विरुध्यते, स्वतन्त्रेऽप्यधिकृतः स्वीकृतो योऽर्थस्तस्य सिद्धान्तः सर्वतन्त्रसिद्धांतः । यथा घ्राणादीनि = इन्द्रियाणि, गन्धादयः = इन्द्रियार्थाः, पृथिव्यादीनि भूतानि, प्रमाणैः पदार्थनिश्चय इत्यादिः सर्वतन्त्रसिद्धान्तः। सर्वैरपि तन्त्रैः वादिप्रतिवादि शास्त्रैः स्वीकृतत्वात् ॥ २८ ॥

प्रतितन्त्रसिद्धान्तलक्षणमाह—

समानतन्त्रासिद्धः परतन्त्रसिद्धः प्रतितन्त्रसिद्धान्तः ॥२९॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

समानतन्त्रेऽसिद्धोनप्रोक्तःपरतन्त्रे सिद्धःप्रोक्तोयोविषयः स प्रतितन्त्रसिद्धान्तोभवतीत्यर्थः । यथाशब्दनित्यत्वम् । समानतन्त्रे न्यायवैशेषिके । परतन्त्रं मीमांसादि ॥ २९ ॥

अधिकरणसिद्धान्तलक्षणमाह—

यत्सिद्धावन्यप्रकरणसिद्धिःसोऽधिकरणसिद्धान्तः । ३० ।

यत्सिद्धौयस्यार्थस्यप्रमाणेनसिद्धौ जातायामन्य प्रकरणसिद्धिरन्येषांप्राकरणिकानांपदार्थानां सिद्धिर्जायते, सोऽधिकरणसिद्धान्तोभवति । यथाजगत्कर्तृत्वेनेश्वरसिद्धौ जातायामीश्वरस्य सर्वज्ञत्वादिकंसिध्यति,सर्वज्ञत्वादिकं विना जगत्कर्तृत्वानुपपत्तेरित्सीश्वरसिद्धिरधिकरणसिद्धान्तः ॥ ३० ॥

अभ्युपगमसिद्धान्तलक्षणमाह—

अपरीक्षिताभ्युपगमात्तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः । ३१ ।

विशेषस्य = परकीयसिद्धान्तस्य परीक्षणाययोऽपरीक्षितस्य स्वशास्त्रेऽसिद्धस्याभ्युपगमःसोऽभ्युपगमसिद्धान्तइत्यर्थः । यथा न्यायमते शब्दोद्रव्यंनभवति किन्तु गुणएव । तथापि मीमांसकमतेन शब्दस्यद्रव्यत्वमभ्युपगम्य तस्य नित्यानित्यत्वपरीक्षणमभ्युपगमसिद्धान्तः ॥ ३१ ॥

अवयवं लक्षयिष्यन् विभजते—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः ॥३२॥

प्रतिज्ञा च हेतुश्चोदाहरणं चोपनयश्च निगमनं चेति पंचावयवाभवन्ति। यथा – पर्वतोवह्निमानितिप्रतिज्ञा । 'धूमात्' इतिहेतुः । 'योयोधूमवान्ससवह्निमान्, यथामहानस इत्युदाहरणम् । 'धूमवांश्चाय,मित्युपनयः । 'तस्माद्वह्निमान्, इत्युपसंहार, इति पंचानुमानस्यावयवा भवन्ति। आद्यास्त्रय एवात्रयवा इति सांख्या योगाः पूर्वोत्तरमीमांसकाश्च, स्वार्थानुमाने आद्यास्त्रयःपरार्थानुमानेतुपंचैवावयवाभवन्तीतिनैयायिका वैशेषिकाश्च ॥३२॥

तेषुप्रतिज्ञालक्षणमाह –

साध्यनिर्देशःप्रतिज्ञा ॥ ३३ ॥

साधनीयधर्मविशिष्टोधर्मी साध्यस्तस्यनिर्देशःकथनं प्रतिज्ञा यथा –'पर्वतोवह्निमान्,अनित्यः शब्द इत्यादिः ॥३३॥

हेतुलक्षणमाह –

उदाहरणसाधर्म्यात्साध्यसाधन हेतुः ॥ ३४ ॥

उदाहरणस्यसाधर्म्यात् सादृश्यात्, यथोदाहरणेमहानसादौवह्नि धूमयोः सामानाधिकरण्यंदृष्टमितितत्सादृश्यात्पर्वतेऽपिधूमसद्भावे वह्निसद्भावःसिध्यतीत्यदाहरणसाधर्म्यात्साध्यस्यवह्नेःसाधनं हेतुर्धूमइति ॥ ३४ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

हेतोर्द्वितीयंस्वरूपमाह –

तथा वैधर्म्यात् । ३५ ॥

यथोदाहरणसाधर्म्यात् साध्यसाधनं हेतुस्तथोदाहरणवैधर्म्यादपि साध्यसाधनं हेतुर्भवति । यथा योनवह्निमान्सन धूमवान् यथाजलह्रद, इतिजलह्रदवैधर्म्यादपि धूमःपर्वते वह्निसाधनं भवति ॥ ३५ ॥

उदाहरणलक्षणमाह –

साध्यसाधर्म्यात्तद्धर्मभावीदृष्टान्तउदाहरणम् ॥३६॥

साध्यःपक्षस्तत्साधर्म्यात्, तद्धर्मभावी = पक्षधर्मविशिष्टः, पक्षेसाध्यमानोधर्मोवह्निस्तद्विशिष्ट इत्यर्थः । योदृष्टान्तः सएवोदाहरणमित्युच्यते । यो यो धूमवान्ससवह्निमान् यथा महानसमितिमहानसमुदाहरणम् ॥ ३६ ॥

उदाहरणान्तरस्यलक्षणमाह –

तद्विपर्ययाद्वा विपरीतम् ॥३७॥

तद्विपर्ययात् = साध्यवैधर्म्यात्, विपरीतमतद्धर्मभावी, दृष्टान्तोविपरीतमुदाहरणमित्यर्थः।यथा – 'यत्सात्मकंनभवति-तत्प्राणिनभवति, यथाघटादिकम् । उदाहरणंद्विप्रकारकंभवति अन्वयि, व्यतिरेकिच, साधर्म्योदाहरणमन्वयि, वैधर्म्योदाहरणं व्यतिरेकीतिविवेकः ॥ ३७ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

उपनयलक्षणमाह –

उदाहरणापेक्षस्तथेत्युपसंहारोनतथेतिबासाध्यस्योपनयः ॥३८॥

उदाहरणापेक्षः = उदाहरणानुसारो, योहेतो रुपसंहारः 'तथाचायमित्यन्वयिस्थले 'नतथेतिव्यतिरेकिस्थले स उपनयः। योयोधूमवान्ससर्वोवन्हिमान्दृष्टो महानसवत्तथाचायं पर्वत इत्यन्वय्युपनयः। यत्सात्मकं न भवति तत्प्राणिनभवतियथाघटादि, नचतथेदं जीवच्छरीर मितिव्यतिरेक्युपनयः॥ ३८ ॥

निगमनलक्षणमाह –

हेत्वपदेशात्प्रतिज्ञायाःपुनर्वचनं निगमनम् ॥ ३९ ॥

हेत्वपदेशात् = हेतुव्यपदेशात्प्रतिज्ञायाःप्रतिज्ञाविषयीभूतस्यार्थस्य 'तस्मात्तथेतिभूयोऽभिधानं निगमनं, प्रतिज्ञादीनामेकार्थप्रदर्शनमितिभावः॥ ३९ ॥

तर्कलक्षणमाह—

अविज्ञाततत्वेऽर्थेकारणोपपत्तितस्तत्वज्ञानार्थमूहस्तर्क ॥४०॥

अर्थे = पदार्थे ऽविज्ञाततत्वे ऽविज्ञातस्वरूपे, कारणोपपत्तितोहेतूपपादनद्वारा, तत्वज्ञानार्थं = यथार्थबोधाय. य ऊहः कल्पनाविशेषःप्रवर्ततेसतर्कः। यथा यद्यत्रवन्हिर्नस्या त्तदाधूमोऽपिनस्यादितिधूमोपपादनेन वन्हिकल्पनातर्कः सच संशये सति तत्वनिर्णयेसहकारिकारणं भवति॥ ४० ॥

निर्णयलक्षणमाह—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणंनिर्णयः ॥ ४१ ॥

विमृश्य-स्थाणुर्वा पुरुषोवा, 'अस्त्यात्मा नास्तिवा, इत्यादिसंशयंकृत्वा, पक्षप्रतिपक्षाभ्यां = संदिग्धविषयक खण्डन मण्डनाभ्यां, यदवधारणं = स्थाणुरयं, अस्त्यात्मा, इत्यादिरूपं स निर्णय इत्यर्थः। शास्त्रे वादे च संशयं विनैव निर्णयोभवतीतिभाष्यम् ॥ ४१ ॥

॥ इतिन्यायसूत्रवृत्तौ प्रथमाध्यायस्यप्रथमान्हिकं समाप्तम् ॥

प्रथमाऽध्याये

द्वितीयमान्हिकम् ।

अथक्रमप्राप्तस्यवादस्यलक्षणमाह—

प्रमाणतर्कसाधनोपालम्भःसिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः ॥ १ ॥

प्रत्यक्षादिभिः प्रमाणैः तदनुग्राहकैः तर्कैश्च पक्षस्यसाधनं प्रतिपक्षस्यचोपालम्भः प्रतिषेधःक्रियतेयस्मिनसः । सिद्धान्ताविरुद्धः सिद्धान्तानुसारी. प्रतिज्ञादि पंचावयवसंयुक्तः पक्षप्रतिपक्षयो वादिप्रतिवादिभ्यां परिग्रहो यस्मिन्सकथा विशेषोवादः । 'अस्त्यात्मा, नास्त्यात्मा, इत्यत्रवादिप्रतिवादिभ्यांप्रमाणैःतर्कैश्चस्वस्वपक्षः साध्यनेप्रतिपक्षश्चप्रतिषिध्यते॥१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जल्पलक्षणमाह—

यथोक्तोपपन्नःछलजातिनिग्रहस्थानसाधनोपालम्भोजल्पः॥२॥

यथोक्तोपपन्नो वादलक्षणविशिष्टः छलेन जात्या निग्रहस्था-नैश्च स्वपक्षस्यसाधनं प्रतिपक्षस्य चोपालम्भः क्रियतेयस्मिन्स कथाविशेषोजल्पइत्यर्थः ॥ अत्र वादिप्रतिवादिनौद्वावपि स्वं स्वं पक्षं साधयेते, साधनोपालम्भयोश्च प्रमाणतर्कछल जातिनिग्रहस्थानानिप्रयुज्ञाते ॥२॥

वितण्डालक्षणमाह—

स प्रतिपक्षस्थापनाहीनो वितण्डा ॥३॥

प्रतिवादिनाभ्युपगतः पक्षः प्रतिपक्षस्तस्य प्रमाणादिभिः साधनंस्थापना, तयाहीनो रहितः सजल्पएव वितण्डाभवति। अत्र प्रतिवादी स्वकीयं पक्षं न स्थापयति। वादिपक्षं च प्रमाणतर्कादिभिः खंडयति ॥ ३ ॥

अथ हेत्वाभासनिरूपणमारभमाणस्तद्विभागमाह—

सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीताहेत्वाभासाः॥

योहेतुलक्षणाभावादहेतुः सन् हेतुवदाभासतेसहेत्वाभासः। तेच सव्यभिचारश्च विरुद्धश्च प्रकरणसमश्च साध्यसमश्च कालातीतश्चेतिमिलित्वा पंचप्रकारका भवंति ॥ ४ ॥

सव्यभिचारलक्षणमाह—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अनैकान्तिकः सव्यभिचारः ॥ ५ ॥

अनैकान्तिकः = एकत्राव्यवस्थितो यो हेतुः ससव्यभिचारः कथ्यते। अर्थात्—यो हेतुः साध्यवति वर्तमानः साध्याभाववत्यपिवर्तते स सव्यभिचारो व्यभिचारेण सह युक्तत्वात्। यथा धूमवान्वन्हे रित्यत्रधूमाभाववत्यङ्गारशकटेवृत्तित्वाद्वन्हिधूमव्यभिचारीति सव्यभिचारः ॥ ५ ॥

विरुद्धलक्षणमाह—

सिद्धान्तमभ्युपेत्य तद्विरोधो विरुद्धः ॥ ६ ॥

सिद्धान्तमभ्युपेत्य = यः सिद्धान्तोऽभ्युपेतःस्वीकृतस्तद्विरोधी हेतुर्विरुद्धोभवति। तथा च वार्तिकम्—"प्रतिज्ञाहेत्वोर्विरोधो विरुद्धइति। यथा – "अविनाशी जीव उत्पत्तिधर्मकत्वा दित्यत्रोत्पत्तिधर्मकत्व मविनाशीजीव इत्यनेन विरुध्यते ॥ ६ ॥

प्रकरणसमलक्षणमाह—

यस्मात्प्रकरणचिन्तासनिर्णयार्थमपदिष्टःप्रकरणसमः ॥ ७ ॥

यस्मात् हेतोः प्रकरणचिन्ता = प्रकरणंपक्षस्तस्यचिन्ता जिज्ञासाप्रवर्तते,सहेतुर्निर्णयार्थं साध्यसाधनार्थ मपदिष्टःप्रयुक्तो निर्णयंकर्तु मसमर्थः प्रकरणसम इति सत्प्रतिपक्ष इति चोच्यते यथा "जगदकर्तृकमनादित्वादित्यत्रानादित्वस्यहेतोः जगत्सकर्तृकं सावयवत्वादिति साध्याभावसाधकहेत्वन्तरेण प्रतिबन्धात्किमिदंजगदकर्तृकंयद्वासकर्तृकमितिचिन्तोदेति ॥ ७ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

साध्यसम लक्षणमाह—

साध्याविशिष्टःसाध्यत्वात्साध्यसमः ॥ ८ ॥

साध्यत्वात् = साध्यवत्साधनीयत्वात् साध्याविशिष्टः साध्यसदृशो यो हेतुः, स साध्यसम इति असिद्ध इति चोच्यते। यथा 'छाया द्रव्यं गतिमत्त्वादित्यत्रछायायांगतिमत्त्वमसिद्धं निश्चितंनास्तिसाध्यत्वात् ॥ ८ ॥

कालातीत लक्षणमाह—

कालात्ययापदिष्टः कालातीतः ॥ ९ ॥

यो हेतुः कालमतीत्यापदिश्यतेसकालातीतउच्यते। अस्यैव द्वितीयं नाम बाधित इति। वह्निरनुष्णो द्रव्यत्वादित्य औष्ण्य विषयेण बलवता प्रत्यक्षेण बाधितत्वाद् द्रव्यत्वं हेतुः कालातीतोभवति ॥ ९ ॥

अथ छलस्य लक्षणमाह—

वचनविघातोर्थविकल्पोपपत्त्याच्छलम् ॥ १० ॥

अर्थविकल्पोभिन्नार्थत्वंतदुपपत्याकल्पनया वचनविघातो वादिप्रयुक्तवाक्ये दूषणाभिधानं छलम् ॥ १० ॥

छल विभागमाह—

तत्त्रिविधंवाक्छलं सामान्यच्छलमुपचारच्छलंच ॥११॥

तत् = छलं त्रिविधं = त्रिप्रकारकं भवति। वाक् छलं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सामान्यच्छलमुपचारच्छलंच ॥ ११ ॥

अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्-च्छलम् ॥ १२ ॥

अविशेषेण = सामान्यरूपेणाभिहिते पदार्थे, वक्तुर्वादिनोऽभिप्रायादर्थान्तरस्य कल्पना वाक्च्छलं भवतीत्यर्थः यथा 'नवः कम्बलोऽस्यासौ नवकम्बल इति नवीनकंबलत्वाभिप्रायेण प्रयुक्ते नवकम्बलपदे वक्तुरभिप्रायादर्थान्तरस्य नव संख्याककंबलत्वस्य कल्पना "नह्यस्य द्वावपि संभाव्येते दरिद्रत्वात्कुतोनव इति तद्वाक् च्छलमितिभावः ॥ १२ ॥

सम्भवतोऽर्थस्यातिसामान्ययोगादसम्भूतार्थकल्पनासामान्यच्छलम्

संभवतः = संभावनाविषयस्यार्थस्ययदतिसामान्य योगात् असम्भूतार्थस्य कल्पना तत्सामान्यच्छलम् ॥ संभवति ब्राह्मणे विद्याचरणसंपद् इत्युक्ते कश्चिदाह । यदि ब्राह्मणे विद्याया आचारस्य च सम्भवस्तदा व्रात्येपिस्यात् व्रात्योपि ब्राह्मणोयतस्तत्रातिसामान्यं ब्राह्मणत्व माश्रित्य विद्याचरण संपदः कल्पना सामान्यच्छलं भवति ॥१३॥

उपचारछलस्य लक्षणमाह—

धर्मविकल्पनिर्देशेऽर्थसद्भावप्रतिषेधउपचारछलम् ॥१४॥

धर्मविकल्पेन = शक्तिलक्षणयोरन्यतरवृत्त्या निर्देशे = प्रयुक्ते पदे, योऽर्थसद्भावस्य प्रतिषेधः स उपचारच्छलम् ।

॥ 260

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यथा लक्षणया प्रयुक्तस्य = मञ्चाःक्रोशन्तीतिशब्दस्य शक्त्याऽर्थान्तरं परिकल्प्य "मञ्चस्थाः क्रोशन्ति न मञ्चा इति। यथावा शक्त्या प्रयुक्तस्य 'अहं नित्य, इति शब्दस्य लक्षणयार्थान्तरं परिकल्प्य "अस्मादुत्पन्नस्त्वं न नित्यः, इति तदुपचारच्छलं भवति ॥ १४ ॥

पूर्वपक्षमाह—

वाक्छलमेवोपचारच्छलं तदविशेषात् ॥ १५ ॥

उपचारच्छलंवाक्च्छलमेव कस्मात् तदविशेषात् = द्वयोः परस्परं विशेषाभावादित्यर्थः। परिकल्पनस्य प्रतिषेधस्य चोभयत्रतुल्यत्वादितिभावः ॥ १५ ॥

उत्तरपक्षमाह—

न तदर्थान्तरभावात् ॥ १६ ॥

न = वाक्च्छलमेवोपचारच्छलं न भवति कस्मात्। तदर्थान्तरभावात् = द्वयोःभिन्नपदार्थत्वादित्यर्थः। वाक्छलेऽर्थान्तरकल्पनं = एकोऽस्यकंबलोन नवेति। उपचारच्छलेऽर्थसत्तानिषेधः—'नैवक्रोष्टारोमञ्चा इति ॥ १६ ॥

विपक्षे दोषमाह—

अविशेषेवाकिंचित्साधर्म्यादेकच्छलप्रसङ्गः ॥ १७ ॥

किंचित्साधर्म्यात्सादृश्यादविशेषे = वाक्च्छलोपचारच्छलयोरभेदे, एकच्छलप्रसङ्गः = एकमत्र छलं प्रसज्येत, नतुद्वेऽपि

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तस्मान्नवाक्छलमेवोपचारच्छलम् ॥ १७ ॥

अथ क्रमप्राप्तायाजातेर्लक्षणमाह—

साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः ॥ १८ ॥

साधर्म्येण वैधर्म्येण वा प्रत्यवस्थानं = साध्यधर्मस्य प्रतिषेधनं, स्थापनाहेतौदूषणदान मितियावज्जातिः ॥ १८ ॥

निग्रहस्थानलक्षणमाह—

विप्रतिपत्तिरप्रतिपत्तिश्चनिग्रहस्थानम् ॥ १९ ॥

विप्रतिपत्तिः = विपरीतं ज्ञानं, साधनाभासे साधनत्वज्ञानं अप्रतिपत्तिरारम्भविषयेऽनारम्भ स्तदेतद्द्वयं निग्रहस्थानमुच्यते यः परोक्तं विपरीतंप्रतिपद्यते, स्थापितं वा न प्रतिषेधति, स नूनं निग्रहस्थान माप्नोति ॥ १९ ॥

ननु कियत्योजातयो निग्रहस्थानानिचकियन्ति, तत्राह—

तद् विकल्पाज्जातिनिग्रहस्थानबहुत्वम् ॥ २० ॥

साधर्म्य वैधर्म्याभ्यां प्रत्यवस्थानस्यविकल्पाद् = वैचित्र्यात्, जातिबहुत्वम् = जातेर्बहवश्चतुर्विंशतिप्रकाराभवन्ति । विप्रतिपत्यप्रतिपत्योश्चविकल्पाद्बहूनि = द्वाविंशतिनिग्रहस्थानानिभवन्ति ॥ २० ॥

॥ इतिन्यायसूत्रवृत्तौ प्रथमाध्यायस्यद्वितीयमाह्निकं समाप्तम् ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ द्वितीयाध्याये प्रथमाह्निकम् ।

प्रथमाध्याये प्रमाणादयः पदार्था उद्दिष्टा लक्षिताश्च, सम्प्रति सकलपदार्थपरीक्षाङ्गभूतं संशयमादौ परीक्षयति—

समानानेकधर्माध्यवसायादन्यतरधर्माध्यवसायाद्वा न संशयः ॥ १ ॥

संशय सूत्रे "समानानेकधर्मोपपत्तेः संशयः, इत्युक्तं तन्न। समानयोरपिपदार्थयोः स्थाणुपुरुषयो धर्मा भिन्ना एव भवन्ति । तयोर्धर्माध्यवसायेनसंशयासंभवात् । स्थाणुपुरुषयोरन्यतरधर्माध्यवसायादपि संशयोनसंभवति । अन्यतरधर्मो ह्यसाधारणधर्मस्तस्य निश्चयजनकत्वेन संशयप्रतिकूलत्वा दितिभावः ॥ १ ॥

विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्चसंशयं निराकरोति ।

विप्रतिपत्त्यव्यवस्थाध्यवसाय ॥ २ ॥

विप्रतिपत्तेरध्यवसायात्संशयोनसंभवति । विप्रतिपत्तिर्हि "अस्त्यात्मेत्येके नास्त्यात्मेत्यन्ये" इत्यादिरूपो विवादएव । तत्रवादिप्रतिवादिनोः परस्परं मतभेदेऽपि स्वाचार्यवाक्यानुकूल्येनैकतरपक्षस्यनिर्णयात् । एवमुपलब्ध्यव्यवस्थाध्यवसायादपि नसंशयोयदुपलभ्यतेतत्सदेवेतिनिर्णयात्, अनुपलब्ध्यव्यवस्थाध्यवसायाच्च न संशयोभूम्यन्तर्हितजलादिकंव्यवधानान्नोपल-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

"भ्यते इति सदेव, यच्चासत्त्वादेव नोपलभ्यते खपुष्पादिकं तद् सदेवेतिनिर्णयात् ॥ २ ॥

ननुविप्रतिपत्तेः कुतोनसंशयः तत्राह—

विप्रतिपत्तौ च संप्रतिपत्तेः ॥ ३ ॥

'अस्त्यात्मा, नास्त्यात्मा, इत्यादिविप्रतिपत्तौविवादेऽपि, कस्यचित् 'अस्त्यात्मा, इतिसंप्रतिपत्तिनिश्चयः । कस्यचित् नास्त्यात्मा इति संप्रतिपत्तिर्निश्चयः स्वस्वमतेद्वयोरपि निर्णय एव न संशय इतिभावः ॥ ३ ॥

ननूपलब्ध्यनुपलब्ध्यव्यवस्थातोऽपिकुतो न संशयः तत्राह—

अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थायाः ॥ ४ ॥

अव्यवस्थाया अव्यवस्थात्मनि = स्वस्वरूपे व्यवस्थितत्वान्नसंशयोभवतीत्यर्थः। येयमुपलब्ध्यनुपलब्ध्यव्यवस्था संशय कारणमुच्यते । सा किंस्वात्मनि व्यवस्थिता विद्यते, अथवाऽव्यवस्थिता । व्यवस्थिताचेत्तदा नेयमव्यवस्था, अव्यवस्थिता चेत्तदा कथमियमव्यवस्था स्यात् पदार्थस्य स्वरूपव्यवस्थायामेव स्वरूपसिद्धिर्भवति नातोऽन्यथेति भावः ॥ ४ ॥

संशयस्वीकारेऽत्यन्तसंशयोपिदोषः स्यादित्याह—

तथात्यन्तसंशयः तद्धर्मसातत्योपपत्तेः ॥ ५ ॥

तद्धर्मसातत्योपपत्तेः = तेषां समानानेकधर्माणां सातत्येन

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सर्वदोपपत्तिसंभवात् । समानधर्मोपपत्यादिकं चेत्संशयकारणं भवेत् । तदा पूर्ववत्पश्चादपिसंशयादि कार्यं कुर्यादित्यत्यन्तसंशयोभवेत्सचनेष्यते इतिभावः ॥ ५ ॥

जातः पूर्वपक्षः संप्रत्युत्तरपक्षमाह—

यथोक्ताध्यवसायादेव तद्विशेषापेक्षात् संशयेनासंशयो नात्यन्तसशयोवा ॥ ६ ॥

तद्विशेषापेक्षात्=तस्य संशयधर्मिणो ये स्थाणुत्वपुरुषत्वादयो विशेषधर्मास्तदपेक्षात्,यथोक्ताध्यवसायात् समानधर्मोपपत्यादिकारणात्संशये नासंशयः = संशयाभावो नात्यन्त संशयोवा संभवतीत्यर्थः । स्थाणुपुरुषादौ विशेषावधारणाभावात् संशय एव जायतेनासंशयो नवात्यन्त संशयो विशेषावधारणेन तु संशयोच्छेद एवेतिभावः ॥ ६ ॥

संशयः परीक्षितः सम्प्रतितमुपसंहरति—

यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्गः ॥ ७ ॥

यत्र=यस्मिन्पदार्थे संशयोजायते, तत्र-सर्वत्र, एव मुक्तरीत्या, उत्तरोत्तरप्रसङ्गः = पूर्वपक्षोत्तरभाविनः समाधानात्मकस्योत्तरपक्षस्य प्रसङ्गो भवतीत्यर्थः ॥ ७ ॥

सम्प्रति प्रमाणानि परीक्षितुं पूर्वपक्षयति—

प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः ॥ ८ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रत्यक्षानुमानोपमानशब्दानामप्रामाण्यं = प्रमाणत्वंनसंभवति । कस्मात् ? त्रैकाल्यासिद्धेः = पूर्वं पश्चात् युगपदिति कालत्रयेऽसिद्धत्वादित्यर्थः । प्रत्यक्षादीनि प्रमाणानि प्रमेयसिद्धितो न पूर्वं न पश्चात् नवा समकालं सिध्यन्ति तस्मात्तदप्रामाण्यम् ॥ ८ ॥

ननुकथंतेषां त्रैकाल्यासिद्धिः ? तत्राह—

पूर्वं हि प्रमाणसिद्धौनेन्द्रियार्थसंनिकर्षात् प्रत्यक्षोत्पत्तिः ॥९॥

प्रमेयापेक्षया पूर्वं प्रमाणस्य सिद्धौ, इन्द्रियार्थसंनिकर्षात्प्रत्यक्षस्योत्पत्तिरुक्ता सा नभवितुमर्हति । प्रत्यक्षोत्पत्तिकालेऽसताप्रमेयेणेन्द्रियसंनिकर्षासंभवादितिभावः ॥ ६ ॥

पश्चात्सिद्धौ न प्रमाणेभ्यः प्रमेयसिद्धिः ॥ १० ॥

प्रमेयापेक्षया यदि पश्चात्प्रमाणसिद्धिस्तदा प्रमाणेभ्यः प्रमाणद्वारा प्रमेयस्यसिद्धिर्नस्यात् । पूर्वंप्रमाणाभावे केन प्रमीयमाणोऽर्थः प्रमेयंभवेदतोमन्तव्यं न प्रमेयसिद्धितः पश्चात्प्रमाणानि सिध्यन्ति ॥ १० ॥

युगपत्सिद्धौ प्रत्यर्थनियतत्वात् क्रमवृत्तित्वाभावोबुद्धीनाम् ११

प्रमाणप्रमेययोर्युगपदेकस्मिन्काले सिद्धौ, बुद्धीनां = प्रमाणज्ञानानां, क्रमवृत्तित्वाभावः = क्रमेणवृत्तित्वनस्यादस्तिचतत्कस्मात् प्रत्यर्थं नियतत्वात्प्रतिप्रमेयं नियमेनवर्तमानत्वादित्यर्थः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

घ्राणजं ज्ञानं गन्धमात्रग्राहकं, रासनंरसमात्रग्राहक मित्यादि-प्रत्यर्थनियतत्वम् ॥ ११ ॥

जातः पूर्वपक्षः सम्प्रति तदुत्तरपक्षमाह—

त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिः ॥ १२ ॥

यथा प्रमाणानां त्रैकाल्यासिद्ध्या प्रामाण्यानुपपत्तिर्भवता प्रदर्शिता, तथा भवदुक्तस्य प्रामाण्यप्रतिषेधस्यापि त्रैकाल्या-सिद्ध्या प्रामाण्यंनोपपद्यते । प्रमाणवत्प्रतिषेधोपित्रिषुकालेषुन-सिध्यतीतिभावः ॥ १२ ॥

प्रतिषेधानुपपत्तौहेत्वन्तरमाह—

सर्वप्रमाण प्रतिषेधाच्च ॥ १३ ॥

सर्वेषांप्रमाणानां प्रत्यक्षादीनां प्रामाण्यस्य प्रतिषेधेऽकृते, येनखलु प्रमाणेन प्रत्यक्षादीनि प्रमाणानिप्रतिषिध्यन्ते, तस्यापि प्रमाणान्तर्गतत्वेना प्रामाण्ये प्रतिषेधकप्रमाणाभावात्प्रतिषेधानुप-पत्तिरितिभावः ॥ १३ ॥

विपक्षेबाधकमाह—

तत्प्रामाण्येवा न सर्वप्रमाणविप्रतिषेधः ॥ १४ ॥

तस्य = प्रतिषेधक प्रमाणस्य, प्रामाण्ये = प्रमाणत्वेऽभ्युपग-ते, सर्वेषांप्रमाणानां विप्रतिषेधः = प्रामाण्यप्रतिषेधोनोपपद्यते इत्यर्थः ॥ १४ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

परिहरति—

त्रैकाल्याप्रतिषेधश्च शब्दादातोद्यसिद्धिवत्तत्सिद्धेः ॥१५॥

त्रैकाल्याप्रतिषेधश्च = प्रत्यक्षादीनां त्रैकाल्यसिद्धिप्रतिषेधोऽपिनसंभवति। कस्मात्? शब्दादातोद्यसिद्धिवत्तत्सिद्धेः। यथाहि पश्चात्सिद्धः शब्दः पूर्वसिद्धस्य वेणुवीणादेरातोद्यस्य सिद्धौभवतिहेतुः। तथैवरीत्या पश्चात्सिद्धं प्रमाणमपि पूर्वं सिद्धस्यप्रमेयस्यसिद्धौहेतुर्भवितुमर्हति नात्र कश्चिद्दोषः ॥१५॥

प्रमेया च तुलाप्रामाण्यवत् ॥ १६ ॥

प्रमेयास्त्यपितुला, प्रामाण्यवत् = यथा निमित्तवशात्प्रमाणंभवति। तथाशब्दोऽपीतिभावः। पदार्थान्तर परिमाणज्ञाने तुला प्रमाणं, तुलान्तरेण तस्यास्तुलायाः परिमाण ज्ञाने च सा प्रमेयं भवति। एवं सर्वेषां प्रमाणानां प्रमेयतासंभवति॥१६

ननुप्रमाणानां सिद्धिः सप्रमाणा वा निष्प्रमाणा तत्राह—

प्रमाणतः सिद्धेः प्रमाणान्तरसिद्धिप्रसङ्गः ॥ १७ ॥

प्रमाणतः कुतश्चित्प्रमाणा त्प्रमाणानां सिद्धिर्यदिस्यात्तदा प्रमाणान्तरस्य सिद्धिः प्रसज्येत। तथासत्यनवस्था दोषः। "प्रत्यक्षानुमानोपमानशब्दाः प्रमाण मितिसंख्यासूत्र व्याघातश्चस्यात् ॥ १७ ॥

नन्वस्तुतर्हि निष्प्रमाणा, तत्राह—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तद्विनिवृत्तेर्वा प्रमाणासिद्धिवत्प्रमेयसिद्धिः ॥ १८ ॥

तद्विनिवृत्तेः = प्रमाणं विनैवप्रमाणसिद्धेस्तद्वत्प्रमेयस्यापि सिद्धिः प्रमाणं विनैव स्यादितिसर्वप्रमाणविलोपः ॥ १८ ॥

समाधानमाह—

न प्रदीपप्रकाशवत् तत्सिद्धेः ॥ १९ ॥

न = यदुक्तं तन्न कस्मात् ? प्रदीपप्रकाशवत् = यथा प्रदीप प्रकाशः प्रकाशान्तरं विनैव सिध्यति । तथा तत्सिद्धेः = प्रमाणं विनैव प्रमाणसिद्ध्येदितिभावः ॥ १९ ॥

सम्प्रति विशेषरूपेण प्रमाणानिपरीक्षते—

प्रत्यक्षलक्षणानुपपत्ति रसमग्रवचनात् ॥ २० ॥

इन्द्रियार्थसंनिकर्षोत्पन्नं ज्ञानं प्रत्यक्ष मिति प्रत्यक्ष लक्षणं नोपपद्यते, कस्मादसमग्रवचनात्, आत्मा मनसा युज्यते मन इन्द्रियेणेन्द्रियमर्थेन ततः प्रत्यक्ष मिति न्यायशास्त्रे प्रत्यक्षप्रकार स्तत्र प्रत्यक्षलक्षणसूत्रे प्रत्यक्षकारणीभूत इन्द्रियार्थ संनिकर्ष एवोक्तोनात्मनः संनिकर्षोमनइन्द्रियसंनिकर्षोवेतिभावः ॥२०॥

नात्ममनसोः संनिकर्षाभावे प्रत्यक्षोत्पत्तिः ॥ २१ ॥

आत्मनोमनसश्च घ्राणादिभिरिन्द्रियैः सह संनिकर्षाभावे प्रत्यक्षज्ञानंनोत्पद्यते तस्मात्तयोःसंनिकर्षोपिप्रत्यक्षज्ञानहेतुः ॥

शङ्कते—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दिग्देशकालाकाशेष्वप्येवंप्रसङ्गः ॥ २२ ॥

एवमात्ममनसोः संनिकर्षवत् दिगादिष्वपि प्रत्यक्षज्ञानकारणत्वं प्रसज्येत, सत्सुतेषुज्ञानमुत्पद्यतेनासत्सु ॥ २२ ॥

समाधत्ते—

ज्ञानलिङ्गत्वादात्मनो नानवरोधः ॥ २३ ॥

आत्मनो ज्ञानलिङ्गत्वान्नानवरोधः = आत्ममनः संनिकर्षस्यास ग्रहोनभवति। ज्ञानमात्मनोगुणः तच्च सन्निकर्षजं सति सन्निकर्षेभावादसतितस्यचाभावात्। नतथा दिगादिषु सत्सु भावोऽसत्सुस्तस्यचाभावः क्वचिदुपलभ्यते इति नात्ममनः संनिकर्षस्यावचनं दोषोऽर्थादेवतस्यसंग्रहादितिभावः ॥ २३ ॥

तदयौगपद्यलिङ्गत्वाच्चमनसः ॥ २४ ॥

मनसोज्ञानायौगपद्यलिङ्गत्वान्मनइन्द्रियसंनिकर्षस्यापि अनवरोधः = असंग्रहोनास्ति, तस्याप्यर्थादेवाप्रप्तत्वा दितिभावः ॥ २४ ॥

जातः पूर्वपक्षः सम्प्रति सिद्धान्तमाह—

प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः संनिकर्षस्य स्वशब्देन वचनम् ॥ २५ ॥

इन्द्रियार्थयोः संनिकर्षएवप्रत्यक्षंप्रत्यसाधारणं कारणम् नात्ममनः संनिकर्षःतस्यनिमित्तत्वादसाधारणस्यैव 'इन्द्रियार्थ सन्निकर्षोत्पन्न" मिति स्ववाचकशब्देन वचनम् ॥ २५ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सुप्तव्यासक्तमनसां च सन्निकर्षनिमित्तत्वात् ॥२६॥

गाढनिद्रांगतं सुप्तं, विषयान्तरे लग्नं व्यासक्तं, च मनो येषां तेषां पुरुषाणां यत्प्रत्यत्तं जायते तस्येन्द्रियार्थसन्निकर्ष निमित्तत्वादिन्द्रियार्थसन्निकर्षमात्रजन्यत्वादपि, प्रत्यक्षलक्षणे इन्द्रियार्थसन्निकर्षमात्रस्य ग्रहणंकृतंनात्ममनःसन्निकर्षस्य ॥२६॥

तैश्चापदेशोज्ञानविशेषाणाम् ॥ २७ ॥

ज्ञानविशेषाणां तैरिन्द्रियैरर्थैश्चव्यपदेशो भवति । यथा चाक्षुषं मे ज्ञानं रासनं मे ज्ञानमितीन्द्रियैर्व्यपदेशः । रूपज्ञानं रसज्ञान मित्यर्थैर्व्यपदेशः । तथाचेन्द्रियार्थसन्निकर्षस्यप्रत्यक्षे प्राधान्यं नात्ममनः सन्निकर्षस्य प्राधान्येन व्यपदेशाभवन्ति ॥२७॥

शंकते—

व्याहतत्वादहेतुः ॥ २८ ॥

योऽयमिन्द्रियार्थसन्निकर्षः प्रत्यत्तज्ञानहेतुरुक्तःसनयुक्तः कस्मात् ? व्याहतत्वात् = आत्ममनसोः सन्निकर्षाभावे व्याहत शक्तिकत्वादित्यर्थः ॥ २८ ॥

समाधत्ते—

नार्थविशेषप्राबल्यात् ॥ २९ ॥

न = यदुक्तं तन्न, कस्मात् ? प्रत्यक्षेऽर्थविशेषस्य = इन्द्रियार्थसन्निकर्षस्य, प्राबल्यात् = प्राधान्यात्कारणत्वमुक्तमित्यर्थः नह्यात्ममनः सन्निकर्षो ज्ञानकारणत्वं व्यभिचरति । किन्तु इन्द्रि

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यार्थसन्निकर्षस्य प्राधान्यमुपादीयते । प्रधानस्यैव लक्षणं क्रियतेइतिभावः ॥ २६ ॥

प्रकारान्तरेण प्रत्यक्षं परीक्षितुं पूर्वपक्षमाह—

प्रत्यक्षमनुमानमेकदेशग्रहणादुपलब्धेः ॥ ३० ॥

प्रत्यक्षं प्रमाण मनुमानमेव संभवति । कस्मात् ? एकदेश ग्रहणादुपलब्धेः = पदार्थोपलब्धेरित्यर्थः । यथानुमाने एकदेशस्यधूमादे र्ग्रहणादेकदेशस्य वन्ह्यादे रुपलब्धिज्ञानं जायते । तथैव प्रत्यक्षेऽपि = इन्द्रिय सन्निकर्षेण पूर्वमेकदेशः वृक्षस्य पूर्वभागोगृह्यते ततश्च वृक्षादिपदार्थइतिभावः ॥ ३० ॥

उत्तरपक्षमाह—

न प्रत्यक्षेण यावत्तावदप्युपलम्भात् ॥ ३१ ॥

न = यदुक्तं तन्न, कस्मात् ? प्रत्यक्षेण = इन्द्रियसन्निकर्षेण, यावत्तावत् = सर्वस्यापिपदार्थदेशस्योपलम्भात् = ग्रहणादित्यर्थः ॥ ३१ ॥

समाधानान्तरमाह—

नचैकदेशोपलब्धिरवयविसद्भावात् ॥ ३२ ॥

इन्द्रियसन्निकर्षादेकदेशोपलब्धिर्न = नघटते । कस्मात् ! अवयविसद्भावात्, एकदेशे सन्निकृष्यमाणे तत्सहचरितोऽवयव्यपि सन्निकृष्यतेयत इतिभावः ॥ ३२ ॥

शङ्कते—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

साध्यत्वादवयविनि सन्देहः ॥३३॥

अवयविनि = अवयवव्यतिरिक्तेऽवयविद्रव्ये सन्देहः कस्मात्? साध्यत्वात् = असिद्धत्वादित्यर्थः। तथाचावयविसद्भावादिति हेतुर्न संभवतीति भावः ॥ ३३ ॥

समाधत्ते—

सर्वाग्रहणमवयव्यसिद्धेः ॥३४॥

अवयवेभ्योऽव्यतिरिक्तस्यावयविनोऽसिद्धेरस्वीकारे, सर्वाग्रहणं = सर्वेषां द्रव्यादीनामप्रत्यक्षं प्रसज्येतेत्यर्थः। चेदवयवेभ्योऽवयवी कश्चिद्भिन्नो न स्यात्। तदाऽवयवानामतीन्द्रियत्वात्तत्समुदायात्मका द्रव्यगुणकर्मादयोऽपि न गृह्येरन्। नह्यगृह्यमाणेषु समुदायिषु तत्समुदायः कचिद्गृह्यते इति भावः ॥३४॥

अवयविसद्भावे हेत्वन्तरमाह—

धारणाकर्षणोपपत्तेश्च ॥३५॥

धारणं चाकर्षणं च तयोरुपपत्तिः सङ्गतिस्ततो ज्ञायते ऽस्ति खल्ववयवेभ्योऽर्थान्तरभूतोऽवयवीत्यर्थः। धारणं घटादेः शिरसि स्थापनं, सर्वस्य ग्रहणमाकर्षणं, नचैतेऽवयवानां संभवत एकत्वाभावादवयवावस्थायां परस्परं संयुक्तत्वाभावाच्च ॥ ३५ ॥

आशंक्य निराकरोति—

सेनावनवद्ग्रहणमिति चेन्नातीन्द्रियत्वादणूनाम् ॥ ३६ ॥

यथानेकेष्वपि सेनांगेषु हस्त्यश्वादिषु वनांगेषु वृक्षेषु च, सेनेयम्, वनमिदम्, इत्येकत्वबुद्धिरुत्पद्यते। तथाऽवयवेष्वप्यनेकेषु

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एकत्वबुद्धिरुपपद्येत, गौरियम्, घटोऽयम्, इतिचेद्यदिशङ्कसे नशङ्कस्व, कस्मात्? अणूनामवयवानामतीन्द्रियत्वात्, सेना ज्ञानांवनाज्ञानां तु स्थूलत्वेनेन्द्रियग्राह्यत्वात्तथाचसिद्धं पृथगवयवेभ्योऽवयवीयद्गोचरं प्रत्यक्षमितिभावः ॥ ३६ ॥

प्रत्यक्षं परीक्ष्यानुमानपरीक्षामारभते—

रोधोपघातसादृश्येभ्योऽव्यभिचारादनुमानमप्रमाणम् ॥३७॥

नद्याः पूर्णत्वेन लिंगेन "भूतावृष्टि" रित्यनुमानमुक्तं तत्राग्रभागे निरोधादपि नदी पूर्णा गृह्यते तदाच व्यभिचारितत्। पिपीलिकाण्डसंचारेण भविष्यति वृष्टि रित्यनुमानमुक्तं तत्र पिपीलिकानीड़ध्वंसेनापि पिपीलिकांडसंचारोभवति तदाच व्यभिचारितत्। पुरुषोऽपिकदाचिन्मयूरशब्दसदृशशब्दं करोति तदा तेन मयूरसत्वानुमानं व्यभिचरतीति नानुमानस्यप्रामाण्यं संभवति व्यभिचारादितिभावः ॥ ३७ ॥

सिद्धान्तमाह—

नैकदेशत्राससादृश्येभ्योऽर्थान्तरभावात् ॥ ३८ ॥

न = यदुक्तं तन्न, कस्मात् नदीपूरस्यैकदेशः, नीड़ोपघात त्रासः सादृश्यं पूर्ववत्, एभ्योजायमानानां ज्ञानानामर्थान्तर भावादनुमानतोभिन्नपदार्थत्वादित्यर्थः। रोधकृतपूर्णत्वापेक्षया वर्षाकृतंनद्याः पूर्णत्वं विलक्षणं भवति। एवंत्रासकृतपिपीलिकाण्डसंचारापेक्षया वृष्टिपूर्वकालिकः पिपीलिकाण्ड

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

संचारो विलक्षणः। एवं सदृशशब्दापेक्षया प्रधान शब्दो विलक्षण इति न दोषः॥ ३८॥

ननुभूतभविष्यद्वर्तमानविषयकमनुमानमुक्तं तन्न सिध्यतीत्याह—

वर्तमानाभावः पततः पतितपतितव्यकालोपपत्तेः ॥३९॥

वर्तमानाभावः = वर्तमानकालोनास्ति, कस्मात् ? पततो वृन्तात्प्रच्युतस्य फलस्य भूमिंप्रत्यासीदतो द्वावध्वानावुपलभ्येते पतितः पतितव्यश्च। तत्र पतितो भूतकालः। पतितव्यश्च भविष्यत्कालः। नतुवर्तमानकालोऽपि येनानुमानस्य त्रिकाल विषयत्वं भवेदिति भावः॥ ३९॥

समाधानमाह—

तयोरप्यभावो वर्तमानाभावे तदपेक्षत्वात् ॥ ४० ॥

वर्तमानाभावे = वर्तमानकालासत्वे, तयोरपि = भूतभविष्यत्कालयोरप्यभावः प्रसज्येत, कस्मात् ? तदपेक्षत्वात् वर्तमानसापेक्षत्वात्। वर्तमानकालमाश्रित्यैव तत्पूर्वकालस्य भूतत्वं तत्परकालस्य च भविष्यत्व मुपपद्यते नान्यथा ॥ ४०॥

तत्रैवाह—

नातीतानागतयोरितरेतरापेक्षासिद्धिः ॥ ४१ ॥

अतीतानागतयोः = भूतभविष्यत्कालयो रितरेतरापेक्षया, वर्तमानकालं विना सिद्धिर्न = न संभवति। इतरेतरापेक्षाया

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

मन्योन्याश्रयदोषादितिभूतभविष्यत्कालयोःसिद्धिर्वर्तमान कालेनैवसंभवतीतिसिद्धोवर्तमानकालः ॥ ४१ ॥

ननुमाभूदुभयोरितरेतरापेक्षासिद्धिर्वर्तमानापेक्षापिनयुक्ता तत्राह—

वर्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः ॥४२॥

वर्तमानाभावे=वर्तमानकालासत्वे,सर्वाग्रहणं=सर्वेषां पदार्थानामग्रहणं=ज्ञानंनस्यात् । कस्मात् ? प्रत्यक्षानुपपत्तेः प्रत्यक्षस्य वर्तमानमात्रग्राह्यत्वात्, अनुमानादीनां प्रत्यक्षपूर्वकत्वाच्चेतिभावः ॥४२॥

कृतताकर्तव्यतोपपत्तेस्तूभयथाग्रहणम् ॥४३॥

वर्तमानकालस्योभयथा ग्रहणं संभवति । कस्मात् ? कृतताकर्तव्यतोपपत्तेः । वर्तमानस्य घटादेः श्यामरक्तरूपादीना मतीतताभविष्यत्वयो रुपपत्तेः घटादेरतीतानागतत्वेन व्यवहारः परस्परासंबन्धादित्यर्थः ॥४३॥

अनुमानंपरीक्ष्योपमानं परीक्षमाणः पूर्वपक्षयति—

अत्यन्तप्रायैकदेश साधर्म्यादुपमानासिद्धिः॥४४॥

उपमानप्रमाणमूलं हि साधर्म्यमेव, तच्च त्रिविधं संभवति । अत्यन्तसाधर्म्यं, प्रायः साधर्म्यं, एकदेशसाधर्म्यं च, एतस्मात्साधर्म्यत्रया दुपमान प्रमाणस्य सिद्धिर्नभवतीत्यर्थः । गविगोरत्यन्तसाधर्म्यादस्य, महिषेऽनडुहः प्रायसाधर्म्यास्य,मेरौ च सर्षपैकदेशसाधर्म्यास्य, विद्यमानत्वादितिभावः॥४४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

समाधानमाह-

प्रसिद्धसाधर्म्यादुपमानसिद्धे र्यथोक्तदोषानुपपत्तिः ॥४५॥

प्रसिद्धं गवादे र्यत्साधर्म्यं तन्मात्रादुपमानप्रमाण सिद्धे र्यथोक्तदोषोनोपपद्यते, प्रसिद्धं चाङ्ग प्रत्यङ्गादि साधर्म्यं गोगवययोरस्त्येवेतिभावः ॥ ४५ ॥

नन्वस्तूपमानं प्रमाणं न तदनुमानतोभिद्यते तत्राह—

प्रत्यक्षेणाप्रत्यक्षसिद्धेः ॥ ४६ ॥

यथाहि प्रत्यक्षेण धूमेनाप्रत्यक्षस्य वन्हेः प्रतिपत्तिरनुमानम् । तथोपमानेपि प्रत्यक्षेण गवाऽप्रत्यक्षस्य गवयस्य प्रतिपत्तिरनुमानमेव विशेषाभावादितिभावः ॥ ४६ ॥

समाधानमाह-

नाप्रत्यक्षेगवयेप्रमाणार्थमुपमानस्यपश्यामः ॥४७॥

अप्रत्यक्षे गवये, उपमानप्रमाणस्यार्थं प्रयोजनं प्रमाणत्वं, न वयं पश्यामः स्वीकुर्म इतिहेतोरनुमानाद्भेद उपमानस्येत्यर्थः । यदि प्रत्यक्षेण गवा गवयोऽप्रत्यक्षो गृह्येत धूमेन वन्हिरिव तदोपमान मनुमानमेवभवेन्नचैवमस्तीतिभावः ॥४७॥

तथेत्युपसंहारादुपमानसिद्धेर्नाविशेषः॥ ४८ ॥

यथागौस्तथागवय, इत्येवमुपमाने तथाशब्देनोपसंहारो भवति नचैव मनुमाने इतिनाविशेषोऽभेदः किन्तु द्वयोः विशेष एव ॥ ४८ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

उपमानं परीक्ष्य शब्दं परीक्षयति---

शब्दोऽनुमानमर्थस्यानुपलब्धेरनुमेयत्वात् ॥ ४९ ॥

शब्दोऽनुमानतो न भिद्यते कस्मात्! अर्थस्य=शब्दविषयस्यार्थस्यानुपलब्धेः=प्रत्यक्षेणानुपलम्भादनुमेयत्वात्=अनुमातुं शक्यत्वादित्यर्थः। यथाह्यनुमानं प्रत्यक्षेणानुपलभ्यमानं पदार्थं विषयीकरोति तथैव शब्दोपीत्यनुमानं शब्दो न प्रमाणान्तरमितिभावः ॥४९॥

अत्रैव हेत्वन्तरमाह–

उपलब्धेरद्विप्रवृत्तित्वात् ॥ ५० ॥

शब्दानुमानयोरुपलब्धेर्ग्रहणस्य, अद्विप्रवृत्तित्वात्=एकप्रकारेणप्रवृत्तिमत्वादवगम्यते शब्दानुमानयो रेकत्व मेव। परोक्षार्थावगाहित्वमभेदेहेतुः। तस्मात् शब्दस्यानुमानेऽन्तर्भावो न पृथक् प्रमाणत्वमितिभावः ॥ ५० ॥

हेत्वन्तरं समुच्चिनोति।

सम्बन्धाच्च ॥ ५१ ॥

यथानुमाने स्वसम्बन्ध्यर्थः प्रतिपाद्यते। तथैव शब्देऽपि तथासति शब्दानुमानयोर्नास्तिकश्चिद्विशेषो येनशब्दस्यानुमानात्पृथक्त्वं स्यात् ॥५१ ॥

पूर्वपक्षं कृत्वा सम्प्रतितत्समाधानमाह--

आप्तोपदेशसामर्थ्याच्छब्दादर्थसम्प्रत्ययः ॥५२॥

शब्दात्=वाक्यात्, योऽर्थसम्प्रत्ययोवाक्यार्थबोधो

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जायते । स्नानुमानविधया किन्त्वाप्तोपदेशसामर्थ्यादतोनानुमानंशब्दः ॥ ५२ ॥

शब्दार्थयोः संबन्धं परीक्षयति--

पूरणप्रदाहपाटनानुपलब्धेश्चसम्बन्धाभावः ॥५३॥

शब्दार्थौ चेत्परस्परं सम्बद्धौस्यातांतदामोदकशब्दोच्चारणेकृतेमोदकेनमुखपूरणं स्यात्, अग्न्यादिशब्दोच्चारणे मुखस्यदाहः स्यात्,खङ्गादिशब्दोच्चारणे मुखस्य पाटनं स्यान्नचैवंदृश्यतेतस्मान्नास्ति शब्दार्थयोः कश्चित् संबन्धः ॥५३ ॥

शब्दार्थव्यवस्थानादप्रतिषेधः ॥५४॥

अप्रतिषेधः = शब्दार्थसम्बन्धप्रतिषेधोनोपपद्यते, कस्मात्? शब्दार्थव्यवस्थानात् = शब्दार्थयोर्व्यवस्थादर्शनादित्यर्थः । यदि शब्दार्थौ परस्परंसम्बद्धौ नस्यातांतदा शब्दादर्थबोधस्यव्यवस्थानदृश्येत । दृश्यतेतुव्यवस्था, घटशब्देन घटस्यैवबोधोभवति न पटादेः ॥५४॥

सिद्धान्तमाह—

न सामयिकत्वाच्छब्दार्थसम्प्रत्ययस्य ॥५५॥

न = शब्दार्थयोः सम्बन्धो न सम्भवति । कस्मात्? शब्दार्थसम्प्रत्ययस्य, सामयिकत्वात् = संकेतमूलकत्वादित्यर्थः । शब्दाद्योऽर्थप्रत्ययोभवति स संबन्धकृतोनास्ति, किन्तु

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

संकेतकृतोऽस्ति ॥५५॥

अत्रैवहेत्वन्तरमाह—

जातिविशेषेचानियमात् ॥५६॥

जातिविशेषे = आर्यम्लेच्छादिजातिविशेषे, शब्दस्यचानियमात् = यवशब्दस्य म्लेच्छेषुप्रियङ्गुप्रत्यायकत्वमार्येषुच दीर्घशूकप्रत्यायकत्वं सोऽयमनियमो जातिभेदे संबंधकृतत्वे नोपपद्यते संकेतकृतत्वेतूपपद्यते । संकेतस्यार्यैर्दीर्घशूकेम्लेच्छैश्च प्रियङ्गौकृतिसंभवादितिभावः ॥५६॥

तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः ॥५७॥

तत् = तस्य शब्दस्याप्रामाण्यं = प्रमाणत्वं न संभवति । कुतः? अनृत व्याघात पुनरुक्त दोषेभ्यः तत्रानृतदोषः "पुत्रकाम पुत्रेष्टयायजेत, नेष्टौकृतायांपुत्रजन्मदृश्यते, एकत्र "उदिते सूर्ये होतव्यमन्यत्र 'अनुदितेहोतव्यमित्युच्यते, सोऽयंव्याघातदोषः । "सवैत्रिःप्रथमामन्वाहत्रिरुत्तमा, मित्यत्रप्रथमायाउत्तमायाश्च ऋचस्त्रिरनुवचनंपुनरुक्तदोषः तदेवमनृतादिदोषयुक्तत्वादप्रमाणंशब्दइतिभावः ॥५७॥

अनृतदोषंपरिहरति—

न कर्म कर्तृ साधन वैगुण्यात् ॥५८॥

श तद्दोषो न विद्यते, कस्मात्? कर्मच, कर्ताचसाधनंच, तेषां वैगुण्यंवैकल्यं तस्मात् = दोषादेवफलाभावोपपत्तेरि

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

त्यर्थः । पुत्रेष्टौकृतायांयस्तावत्पुत्रजन्माभावः सकर्मकर्तृसाधन वैगुण्यादुपपद्यते । यथोचितकर्मकरणाभावः कर्मवैगुण्यं, अविद्वान्कर्ताकर्तृवैगुण्यं, हविरशुद्धं साधनवैगुण्यं, एवं चवैगुण्यनिबन्धन खल्वसौफलाभावोनानृतदोषनिबन्धनइति भावः ॥५८॥

व्याघातदोषंपरिहरति—

अभ्युपेत्यकालभेदेदोषवचनात् ॥५९॥

अभ्युपेत्ययंकालमभ्युपगम्य, होमेप्रवृत्तस्तस्यकालस्यभेदेऽतिक्रमेदोषवचनान्नव्याघातदोषइत्यर्थः। अर्थात्-उदितहोमानुदितहोमबोधकवाक्ययोर्न परस्परं विरोधोयदाहभगवान्मनुः—"श्रुतिद्वैधन्तुयत्रस्यात्तत्रधर्मावुभौस्मृतौ । उभावपिहितौधर्मौ सम्यगुक्तौमनीषिभिः ॥५९॥

पुनरुक्तदोषंपरिहरति-

अनुवादोपपत्तेश्च ॥६०॥

"त्रिःप्रथमामन्वाह त्रिरुत्तमा" मित्युक्तस्याभ्यासस्य, अनुवादोपपत्तेरनुवादत्वसंभवात्पुनरुक्तदोषोनात्रसंभवति ॥६०॥

अनुवादस्यसार्थक्यमाह—

वाक्यविभागस्यचार्थग्रहणात् ॥६१॥

अनुवादस्यसार्थक्यंकस्मात्? वाक्यविभागस्यअनुवादादिभेदेनविभक्तस्यवाक्यस्य,अर्थग्रहणात्प्रयोजनस्वीकारात् ॥६१॥

ननुकतिविधोवाक्यविभागः तत्राह-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विध्यर्थवादानुवादवचनविनियोगात् ॥६२॥

वेदस्यमन्त्रब्राह्मणभेदेन द्वौ भागौ, तत्रब्राह्मणभागस्यत्रैविध्यंस्वीक्रियते, विधिवचनमर्थवादवचनमनुवादवचनं च ॥६२॥

विधिवाक्यलक्षणमाह—

विधिर्विधायकः ॥६३॥

यद्वाक्यंविधायकंप्रेरकंसविधिः। अर्थात् - यद्वाक्यंविधिमुखेननिषेधमुखेनवाप्रेरयति। "सत्यंवद"धर्मंचर, "मागृधः कस्यस्विद्धनमित्यादिः सविधिः ॥६३॥

अर्थवादं विभज्यलक्षयति—

स्तुतिर्निन्दापरकृतिःपुराकल्पइत्यर्थवादः ॥६४॥

वाक्यविशेषोऽर्थवादः सचतुर्विधः स्तुतिलक्षणः, निन्दालक्षणः, परकृतिलक्षणः, पुराकल्पलक्षणश्च। स्तुतिः फलश्रवणात्प्रवर्तिका। यथा "शिरोवैयज्ञस्यातिथ्यम् (शत० ३।४।२।१॥ अनिष्टफलवादोनिन्दा। यथा- "समूलोवाएषपरिशुष्यतियोऽनृतमभिवदति ॥ (प्रश्नोपनिषत् ६।१॥) अन्यकर्तृकस्य विधेर्वादः परकृतिः। यथा "हुत्वावपामग्रेऽभिघारयन्ति अथ पृषदाज्यम्" शत० ३।८।३।२४॥ ऐतिह्यसमाचरितोविधिः पुराकल्पोयथा—"सर्वां हवैपापकृत्यामपहन्ति योऽश्वमेधेनयजते" शत० १३।५।६।१॥ सोऽयमर्थवादोविधिवाक्येनैकता-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

मापन्नोऽर्थवान् भवति । यथाह भगवान् जैमिनिः—"विधिनात्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः ॥ पूर्वमी० १।२।७। ॥६४॥

अनुवादलक्षणमाह—

विधिविहितस्यानुवचनमनुवादः ॥६५॥

विधिविहितस्यानुवचनं पुनरभिधानमनुवादः। यथा "दर्शपौर्णमासाभ्यां स्वर्गकामोयजेत" इति विधिवाक्येन विहितस्य दर्शयागस्य पौर्णमासयागस्य च "यएवंविद्वान् पौर्णमासीं यजते, यएवंविद्वान् अमावस्यां यजते इत्यनुवादः ॥६५॥

अत्रशङ्कते—

नानुवादपुनरुक्तयोर्विशेषः शब्दाभ्यासोपपत्तेः ॥६६॥

अनुवादस्य पुनरुक्तस्य च विशेषोभेदोनन भवति। कस्मात्? शब्दाभ्यासस्य=पुनरुच्चारणस्योभयत्रोपपत्तेः सिद्धेः ॥६६॥

समाधत्ते—

शीघ्रतरगमनोपदेशवदभ्यासान्नाविशेषः ॥६७॥

अनुवादपुनरुक्तयोर्विशेषाभावोन=नभवति । कस्मात् ? शीघ्रतरगमनोपदेशस्येवानुवादस्य सार्थकाभ्यासत्वादित्यर्थः। यद्यपि=अनुवादपुनरुक्तयोः शब्दाभ्यासोनविशिष्यते। तथापि एतावान् विशेषः—सार्थकः शब्दाभ्यासोह्यनुवादः । निरर्थक अपुनरुक्तम्। अनुवादे गम्यतामित्युक्त्वा शीघ्रतरगमनलाभाय

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

"गम्यतां गम्यता मितिशब्दः पुनरभ्यस्यते । नचैवंपुनरुक्तं ६७॥

शब्दस्यप्रामाण्यमुपपादयति—

मन्त्रायुर्वेदप्रामाण्यवच्चतत्प्रामाण्यमाप्तप्रामाण्यात्॥६८

तत्तस्यशब्दस्यप्रामाण्यमाप्तप्रामाण्यान्मन्त्रायुर्वेदप्रामाण्यवदित्यर्थः । मन्त्रोवेदश्चरकशुश्रुतप्रभृतिग्रन्थराशिरायुर्वेदस्तद्वच्छब्दप्रामाण्यंयदुक्तम् । पुराणंमानवोधर्मःसाङ्गोवेदश्चिकित्सितम् । आज्ञासिद्धानिचत्वारिनहन्तव्यानिहेतुभिः ॥ ६८॥

इतिन्यायसूत्रवृत्तौद्वितीयाध्यायस्याद्यमान्हिकं समाप्तम् ॥

—:०:—

अथद्वितीयाध्यायेद्वितीयान्हिकम् ।

प्रमाणानिपरीक्षितानिसम्प्रतितत्संख्यापरीक्षणाय

पूर्वपक्षयति—

नचतुष्ट्वमैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात् ॥१॥

नचतुष्ट्वं = प्रमाणानां चतुःसंख्याविशिष्टत्वं न युज्यते,कस्मात् ? ऐतिह्यंचार्थापत्तिश्चसम्भवश्चाभावश्चतेषामपि प्रामाण्यात् । इहवटेयक्षः प्रतिवसतीत्यादिप्रवादपारम्पर्यमैतिह्यम् । यत्रैकसिद्ध्याअर्थान्तरमर्थादापद्यतेसार्थापत्तिः, यथा—"असत्सुमेघेषुवृष्टिर्नभवतीत्युक्ते सत्सुभवतीत्यर्थाल्लभ्यते । संभ-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वोऽधिकपरिमाणेऽल्पपरिमाणस्ययथाद्रोणेसेटकपरिमाणस्य । धूमादिकारणाभावेनवन्ह्यादिकार्याभावज्ञानमभावः ॥ १ ॥

सिद्धान्तमाह—

शब्दऐतिह्यानर्थान्तरभावादनुमानेऽर्थापत्तिसंभवाभावानर्थान्तरभावाच्चाप्रतिषेधः ॥२॥

अप्रतिषेधोनचतुष्ट्वमितिप्रतिषेधोनोपपद्यते, कस्मात् ? शब्दप्रमाणेऐतिह्यस्यान्तर्भावात् । अनुमानेऽर्थापत्तिसम्भवाभावानामन्तर्भावादित्यर्थः । नवयमैतिह्यादीनिप्रमाणानिनसन्तीति ब्रूमः । किन्तुशब्दानुमानयोस्तेषामन्तर्भावसम्भवात्पृथक्प्रमाणानिनभवन्तीतिब्रूमः। प्रतिपादितोऽयमन्तर्भावप्रकारोऽस्माभिर्न्यायसिद्धान्तमुक्तावल्यामूलचन्द्रिकाटीकायां विस्तरेण ॥२॥

शङ्कते—

अर्थापत्तिरप्रमाणमनैकान्तिकत्वात् ॥३॥

अर्थापत्तिरप्रमाणं = कस्मात् ? अनैकान्तिकत्वात् = असत्सुमेघेषुवृष्टिर्नभवतीत्युक्ते: सत्सुभवतीत्यर्थापत्तिःतस्याश्चसत्स्वपिमेघेषु कदाचिद् वृष्टिर्न भवतीतिव्यभिचारात् ॥३॥

निराकरोति—

अनर्थापत्तावर्थापत्त्यभिमानात् ॥४॥

यांभवानर्थापत्तिं मन्यते नसार्थापत्तिः । किन्त्वर्थापत्त्याभा-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सः। नह्यस्माभिः "सत्सुमेघेषुवृष्टिर्भवत्येव, इत्यास्थीयते, येने यमप्रमाणं स्यात्किन्तुमेघंविना वृष्टिर्न जायते इति नियमो न व्यभिचरतीति कथ्यते तस्मात् प्रमाणमर्थापत्तिरितिभावः ॥४॥

प्रकारान्तरेणनिराकरोति—

प्रतिषेधाप्रामाण्यंचानैकान्तिकत्वात् ॥५॥

अर्थापत्तिरप्रमाण, मित्येवं योऽर्थापत्तिप्रामाण्यस्य प्रतिषेधउक्तस्तस्याप्रामाण्यं = प्रमाणत्वं न विद्यते, कस्मात् । अनैकान्तिकत्वात् = व्यभिचारित्वादित्यर्थः। प्रतिषेधस्य प्रामाण्ये सत्येव ह्यर्थापत्तेरप्रामाण्यं सेद्धुमर्हति । नचप्रतिषेधस्यप्रमाणत्वमुपपपद्यते ॥५॥

तत्प्रामाण्येवानार्थापत्यप्रामाण्यम् ॥६॥

तत्प्रामाण्ये = प्रतिषेधप्रामाण्येसति, नार्थापत्यप्रामाण्यम् अर्थापत्तेरपि प्रामाण्याभावो न सिध्यतीत्यर्थः ॥७४॥

शङ्कते—

नाभावप्रामाण्यं प्रमेयासिद्धेः ॥७॥

अभावस्यप्रामाण्यं न सिध्यति, कस्मात्? तत् प्रमेयासिद्धेः यस्यप्रमेयमेवनास्ति न तत्प्रमाणं संभवतीत्यर्थः। "नाभावः प्रमाणं विषयाभावात्, यदविषयं तदप्रमाणं यथागोशब्दोऽश्व प्रतिपादने' इतिवार्तिकम् ॥७॥

समाधते—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

लक्षितेष्वलक्षणलक्षितत्वादलक्षितानाँतत्प्रमेयसिद्धेः ॥८

"अलक्षितानि वस्त्राण्यानय, इत्युक्ते लक्षितालक्षितेषुमध्ये यान्यलक्षितानितान्यानयति । तत्रालक्षितानां = रागादिरहितानां वस्त्राणामलक्षणेन = रागरूपलक्षणाभावेन लक्षितत्वात्, तत्प्रमेयसिद्धिः=अभावप्रमाणप्रमेयसिद्धिस्तत्प्रमातुमभावस्यप्रामाण्यमङ्गीकार्यम् ॥८॥

आशंक्य निराकरोति—

असत्यर्थेनाभावइतिचेन्नान्यलक्षणोपपत्तेः ॥९॥

अर्थेऽसति = अविद्यमाने तदभावो न संभवति । अर्थात येषुवस्त्रेषुलक्षणानिसन्त्येव न तेषुलक्षणाभावोऽपिकथंस्यादितिचेन्न, अन्यलक्षणोपपत्तेः = अन्येषु = लक्षितेषु वस्त्रेषु विद्यमानस्यलक्षणस्योपपत्तेः तदभावोऽलक्षितेषु संभवत्येवेति नाभावस्याभावः शक्यः कर्तुमितिभावः ॥९॥

पुनराशंकते—

तत्सिद्धेरलक्षितेष्वहेतुः ॥१०॥

तत्सिद्धेः = लक्षणस्यलक्षितेषुसिद्धेः, अलक्षितेषुवस्त्रेषु, अहेतुर्व्यावृत्तिहेतुर्नसम्भवति, अभावस्यलक्षणाभावान्निःस्वरूपस्य न व्यावर्तकत्वमितिभावः ॥१०॥

समाधत्ते—

नलक्षणावस्थितापेक्षासिद्धेः ॥११॥

न = यदुक्तं तन्न, कस्मात्? लक्षितेषुवस्त्रेषु लक्षणस्य य-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दवस्थितमवस्थितिः, तदपेक्षस्य = अलक्षितेषुवस्त्रेषुतदभावस्य, सिद्धिर्ज्ञानं संभवतीत्यभावस्ययदहेतुत्वमुक्तंतन्नयुक्तम् ॥११॥

वास्तविकमुत्तरमाह—

प्रागुत्पत्तेरभावोपपत्तेश्च ॥१२॥

अलक्षितेषु लक्षणोत्पत्तितः प्रागभावोपपत्तेः।सिद्धमभावस्य-प्रमाणत्वमनुमानविषयाप्रतिपादकत्वादनुमानेऽन्तर्भावश्च॥१२॥

शब्दार्थयोः सम्बन्धंपरीक्ष्य शब्दानित्यत्वंपरीक्षयति—

आदिमत्वादैन्द्रियकत्वात्कृतकवदुपचाराच्च ॥१३॥

आदिमत्त्वात्कारणवत्वात्, ऐन्द्रियकत्वादिन्द्रियग्राह्यत्वात्, कृतकवत्कार्यवदुपचारोव्यवहारस्तद्विषयत्वाच्च, अनित्यः शब्द इतिप्रतिज्ञा, यत्खलुकारणवत्तदनित्यं दृष्टंयथाघटादि, शब्दोऽपि कारणवान्-सहि संयोगादितोनिष्पद्यते। तथाचवैशेषिकसूत्रम् "संयोगाद्विभागाच्छब्दाच्चशब्दनिष्पत्तिः २।२।३१, तस्मादनित्यः। यदिन्द्रियेणगृह्यते तदनित्यंदृष्टं, यथारूपादि। शब्दोऽपिश्रोत्रेन्द्रियेणगृह्यतेतस्मादनित्यः। कृतकोघटादिरुत्पत्तिविनाशगोचरोदृष्टः शब्दोऽपितादृशः-जातः शब्दो विनष्टःशब्द, इतिव्यवहारात्तस्मादनित्य इतिभावः ॥१३॥

पूर्वोक्तहेतुत्रयस्य व्यभिचारमाशङ्कते—

नघटाभावसामान्यनित्यत्वान्नित्येष्वप्यनित्यवदुपचाराच्च १४

आदिमत्वादिहेतूनां व्यभिचारेणशब्दस्यानित्यत्वं न संभ-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वति, कस्मात् ? घटाभावसामान्यनित्यत्वात्=घटध्वंसोघटा-भावस्तस्यादिमत्त्वेपिपुनर्ध्वंसाभावेननित्यत्वात्, गवादेरैन्द्रिय-कत्वेन गोत्वादिसामान्यस्यैन्द्रियकत्वेऽपिनित्यत्वात्,नित्येषुआ काशादिषुचाकाशस्यप्रदेश,इत्यादिवनित्यवदुपचाराच्चेत्यर्थः ॥

पूर्वोक्तहेतूनांव्यभिचारंवारयति—

तत्वभाक्तयोर्नानात्वविभागादव्यभिचारः ॥१५॥

अव्यभिचारः=आदिमत्वस्यहेतोर्घटाभावे व्यभिचारोना स्ति, कस्मात् ? तत्वभाक्तयोः=मुख्यनित्यत्व गौणनित्यत्वयो र्नानात्वविभागात्=भिन्नत्वेनस्वीकारादित्यर्थः। घटध्वंसे भा क्तमेव नित्यत्वं नतु तात्विकमितिभावः ॥१५॥

द्वितीयेव्यभिचारं वारयति—

सन्तानानुमानविशेषणात् ॥१६॥

सन्तानः= सामान्यवत्वं तेनानुमानस्यहेतोर्विशिष्टीकरणाद् गोत्वादौ न व्यभिचारइत्यर्थः। नैन्द्रियकत्वमात्राद्धेतोःशब्दस्या नित्यत्वं साध्यते येनगोत्वादौव्यभिचारःस्यादपितुसामान्यवत्वे सत्यैन्द्रियकत्वात्.अस्तिचशब्दे शब्दत्वं सामान्यं गोत्वादौ तु सा मान्यवत्वं नास्तिजातौजात्यभावादितिभावः ॥१६॥

तृतीयेव्यभिचारं वारयति—

कारणद्रव्यस्यप्रदेशशब्देनाभिधानात् ॥१७॥

कारणद्रव्यस्य=कारणवतोद्रव्यस्य, सावयवद्रव्यस्येतिया

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वत्, प्रदेशशब्देनाभिधानात् = कथनसंभवात्, कृतकवदुपचारस्यनित्येषुव्यभिचारोनास्तीत्यर्थः। यथाहि कृतकस्यद्रव्यस्य परमार्थभूताः प्रदेशाभवन्ति न तथाऽकाशस्य परमार्थभूताः किन्त्वौपाधिकाः तस्मात्शब्दानित्यत्वं सिद्धम् ॥१७॥

प्रागुच्चारणादनुपलब्धेरावरणाद्यनुपलब्धेश्च ॥१८॥

उच्चारणात्प्राक् = पूर्वं शब्दस्यानुपलब्धेः, सतः प्रतिबंधकंयदावरणादितदपिशब्दस्यनोपलभ्यतेयतस्तस्माज्ज्ञायतेऽनित्यः शब्दइत्यर्थः ॥१८॥

अत्र जात्याशब्दानित्यत्वं खण्डयति—

तदनुपलब्धेरनुपलम्भादावरणोपपत्तिः ॥१९॥

तत्तस्य=शब्दावरणस्यानुपलब्धेरनुपलम्भादावरणोपपत्तिरावरणादिकंशब्दस्यसिद्धमर्थादुच्चारणात्प्राक् शब्दस्यानुपलम्भो नानित्यत्व हेतुप्रयुक्तोऽपितु आवरणादिप्रतिबन्धकप्रयुक्त इतिशब्दस्यनित्यत्वं सिद्धमितिभावः ॥१९॥

अत्रयुक्त्यंतरमाह—

अनुपलम्भादप्यनुपलब्धिसद्भाववन्नावरणानुपपत्तिरनुपलम्भात् ॥२०॥

यथा आवरणानुपलब्धेरनुपलम्भात् = अनुपलम्भेऽपिसद्भावः = सत्वमुपपद्यते, तथा शब्दावरणस्यापि, अनुपलम्भात् = अनुपलम्भेऽपि सद्भावः स्वीकरणीयः तथाचसतोऽपि शब्द-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्यावरणादिप्रयुक्तः प्रागुच्चारणादनुपलम्भोनानित्यत्वप्रयुक्त इति सिद्धं शब्दस्यनित्यत्वमितिभावः ॥२०॥

समाधानमाह—

अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः॥२१॥

अहेतुः = तदनुपलब्धेरनुपलम्भादित्ययमावरणाद्युपपत्तौ हेतुर्नभवति,कस्मात् ? अनुपलब्धेः = आवरणानुपलब्धेरनुपलम्भात्मकत्वात् । अनुपलब्ध्यनुपलम्भ आवरणसद्भावस्यहेतु र्नसंभवति, तदसंभवेचानित्यत्वप्रयुक्तः शब्दानुपलम्भोनावरणादिप्रयुक्त इतिभावः ॥२१॥

अत्रसप्रतिपक्षमांशङ्कते—

अस्पर्शत्वात् ॥२२॥

अस्पर्शत्वात् = स्पर्शरहितत्वात् , नित्यःशब्द इत्यर्थः । अस्पर्श माकाशं नित्यं दृष्टं तथाच शब्द इतिभाष्यम् ॥२२॥

समाधत्ते—

न कर्मानित्यत्वात् ॥२३॥

न = यदस्पर्शं तन्नित्य मितिकथनं नयुज्यते, कस्मात् ? कर्मानित्यत्वात् = अस्पर्शत्वेऽपिकर्मणोऽनित्यत्वादितिभावः ॥२३

पुनराशंकते—

सम्प्रदानात् ॥२४॥

सम्प्रदानात् = सम्प्रदीयमानत्वान्नित्यःशब्द इत्यर्थः। शब्दो-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

हि गुरुणा शिष्याय सम्प्रदीयते, यत्सम्प्रदीयते तदवस्थितं दृष्टं यदाचावस्थितस्तदाऽनित्यइतिभावः ॥२४॥

समाधत्ते—

तदन्तरालानुपलब्धेरहेतुः ॥२५॥

सम्प्रदानादित्ययमहेतुः, कस्मात् ? तत् = तयोर्गुरु शिष्ययोरन्तराले मध्येऽनुपलब्धेः = शब्दस्यानुपलम्भात् सम्प्रदीयमानोगवादिरुपलभ्यतेमध्येनायंशब्दः ॥२५॥

शङ्कते—

अध्यापनादप्रतिषेधः ॥२६॥

अप्रतिषेधः = संप्रदीयमानत्वस्यशब्देप्रतिषेधोनसंभवति, कस्मात् ? अध्यापनात् = यदिशब्दस्यसंप्रदानत्वंनभवेत् तदाऽध्यापनंकथं सम्भवेत्, भवतिचाध्यापनं तस्मादन्तरालेप्रत्यक्षतोऽनुपलब्धस्यापि तस्यानुमानेनोपलब्धिः संभवति, नप्रत्यक्षनिवृत्तिमात्राद्वस्त्वभावःशक्यतेवक्तुमनुमानतस्तत्सिद्धेः ॥२६॥

समाधत्ते—

उभयोः पक्षयोरन्यतरस्याध्यापनादविप्रतिषेधः॥२७॥

उभयोर्द्वयोः पक्षयोः नित्यानित्यत्वयोरन्यतरस्य = एकस्य नित्यस्य वा अनित्यस्य स्वीकारेऽध्यापनात् = अध्यापनसंभवादविप्रतिषेधः = उक्तोहेतुप्रतिषेधोनोपपद्यते, शब्दनित्यत्वपक्षे शब्दोऽवस्थित्या सम्प्रदानमाप्नोति, शब्दानित्यत्वपक्षे शब्दः सन्तानवृत्त्यासम्प्रदानमर्हति ॥२७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पुनः शङ्कते—

अभ्यासात् ॥२८॥

अभ्यासः=पुनः पुनरनुशीलनं, तच्चस्थिरस्यैवसम्भवति न क्षणिकस्येति शब्दस्य नित्यत्वं सिध्यति ॥२८॥

समाधत्ते—

नान्यत्वेऽप्यभ्यासस्योपचारात् ॥२९॥

न=यदुक्तं तन्न, कस्मात् ? अन्यत्वेऽपि=शब्दानेक त्वेऽप्यभ्यासस्योपचारात्=संभवादित्यर्थः ॥ २९ ॥

अत्र शङ्कते—

अन्यदन्यस्मादनन्यत्वादनन्यदित्यन्यताभावः ॥३०॥

यदन्यद्भवति तदन्यस्मादेवान्यद्भवति नतुस्वस्मादपि, स्वात्मनोऽनन्यत्वादनन्यत्=अन्यन्नभवति, अतोऽन्यताभावः=नास्त्यन्यत्वमित्यर्थः। वस्तुमात्रस्य वस्त्वन्तरादन्यत्वेऽपि स्वात्मनोऽन्यत्वाभावादितिभावः ॥३०॥

समाधत्ते—

तदभावेनास्त्यनन्यतातयोरितरेतरापेक्षसिद्धेः ॥३१॥

तदभावे=तस्या अन्यताया अभावे, अनन्यतापिनास्ति नसंभवति, कस्मात् ? तयोः=अन्यताऽनन्यतयोरितरेतरापेक्षसिद्धेः=परस्परापेक्षयैव सिद्धिसंभवादित्यर्थः । 'अन्यत्वं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विना तदभावरूपमनन्यत्वमपि न संभवति तस्मादन्यत्वं सिद्ध मेवंचशब्दस्यापि, अन्यत्वेऽभ्याससंभवादनित्यत्वम् ॥३१॥

पुनः शब्दनित्यत्वं शंकते—

विनाशकारणानुपलब्धेः ॥३२॥

विनाशकारणस्य = शब्दविनाशहेतोरनुपलब्धेः = अनुपलम्भात्, शब्दस्यनित्यत्वंसिध्यति ॥ ३२ ॥

प्रतिवन्द्युत्तरमाह—

अश्रवणकारणानुपलब्धेःसततश्रवणप्रसङ्गः ॥३३॥

अश्रवणकारणानुपलब्धेः = शब्दस्यविनाशकारणानुपलब्धेः र्दनित्यत्वमस्तितदाशब्दस्याश्रवणकारणमपिनोपलभ्यते, इति सततश्रवणप्रसङ्गः नचसततं निरन्तरं शब्दः श्रूयतेऽतोऽश्रवण णाभावेऽपिर्यादशब्दोनश्रूयतेतदाविनाशकारणाभावेऽपिशब्दोविनश्यति विनाशाच्चानित्यइतिभावः ॥३३॥

मुख्यमुत्तरमाह—

उपलभ्यमानेचानुपलब्धेरसत्वादनपदेशः ॥३४॥

उपलभ्यमाने = अनुमानेनोपलब्धिविषयेविनाशकारणे, पूर्वशब्दस्योत्तरशब्दे, विनाशकारणानुपलब्धेरितितदनपदेशः हेतुरित्यर्थः । कस्मात् ? अनुपलब्धेरसत्वात्शब्दस्यविनाशकारणानुपलब्धेरसंभवादितिशब्दस्यानित्यत्वंसिध्यति॥३४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पाणिनिमित्तप्रश्लेषाच्छब्दाभावेनानुपलब्धिः ॥३५॥

पाणिनिमित्तप्रश्लेषात् = शब्दायमानेकांस्यादौपाणिरूपनिमित्तकारणस्य संयोगाच्छब्दाभावे = शब्दविनाशेप्रत्यक्षेणोपलभ्यमानेनानुपलब्धिःतद्विनाशकारणानुपलब्धिर्नसिध्यति॥३५॥

सिंहावलोकन्यायेनोपसंहरति—

अस्पर्शत्वादप्रतिषेधः ॥३६॥

अप्रतिषेधः = शब्दानित्यत्वप्रतिषेधोनसंभवति, कस्मात् ? अस्पर्शत्वादितिहेतोःशब्दाश्रयस्येतिशेषःनिर्बलत्वादितिभावः ॥

अत्रैवहेत्वन्तरंसमुच्चिनोति—

विभक्त्यन्तरोपपत्तेश्चसमासे ॥३७॥

समासे = व्याकरणशास्त्रप्रसिद्धे शब्दसंस्कारविशेषे, विभक्त्यन्तरोपपत्तेः = पूर्वविभक्तितो विभक्त्यन्तरस्योत्पत्तेरपि शब्दानित्यत्वप्रतिषेधोनसंभवतीत्यर्थः । यदिशब्दोनित्यःस्यात्तदा सर्वदा संस्कृतात्मतया न कदाचित् संस्क्रियेत। संस्क्रियतेतुशब्दस्ततोजायतेविभक्तिस्तस्माज्ज्ञायते नखलुनित्यःशब्दोऽपित्वनित्यइतिभावः ॥३७॥

विकारादेशोपदेशात् संशयः ॥३८॥

विकारश्चादेशश्च तौ विकारादेशौ तयोरुपदेशात्संशयः = 'सुध्युपास्य इत्यत्र 'इकोयणचीतिसूत्रेण यदिकःस्थानेयणादिरुपदिश्यते सविकार उतादेश इतिभावः ॥३८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विकारपक्षं निराकरोति—

प्रकृतिवृद्धौ विकारविवृद्धेः ॥३९॥

प्रकृतेर्वृद्धौविकारस्यवृद्धिर्भवतीतिप्रसिद्धं, यथाक्षीरविवृद्ध्यादधिविवृद्धिरिति । नचसुध्युपास्य इत्यत्रयकारेकाचिद्वृद्धिर्दृश्यते तत्प्रकृतेरिकारस्यतुदैर्घ्यंनामवृद्धिर्दृश्यतेततोनयकारोविकारः संभवति अपित्वादेशइतिभावः ॥३९॥

शङ्कते—

न्यूनसमधिकोपलब्धेर्विकाराणामहेतुः ॥४०॥

प्रकृतिविवृद्धौविकारविवृद्धे रितिहेतुर्न संभवति, कस्मात् ? विकाराणां प्रकृतितोन्यूनसमाधिकतयोपलम्भादित्यर्थः । न्यूनत्वं यथा तूलापेक्षयातन्तोः,समत्वंयथासुवर्णं तत्कार्यकटकादेः, अधिकत्वंयथावीजापेक्षयावृक्षस्येतिनप्रकृतिवृद्धौविकारवृद्धि नियमः संभवति ॥४०॥

समाधत्ते—

न- अतुल्यप्रकृतीनां विकारविकल्पात् ॥४१॥

न=यदुक्तं तन्न, संभवति, कस्मात् ? अतुल्यप्रकृतीनां भिन्नप्रकृतीनां द्रव्याणां विकारभेददर्शनादित्यर्थः। ह्रस्वदीर्घाभ्यामिकाराभ्यां जायमानस्य यकारस्य तु भेदो न दृश्यते इति द्रव्यविकारदृष्टान्तेन वर्णविकारसिद्धिर्न संभवति ॥४१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पुनः शङ्कते—

द्रव्यविकारेवैषम्यवद्वर्णविकारविकल्पः ॥४२॥

यथावृक्षवीजयोर्द्रव्यत्वेन तुल्यत्वेऽपिस्वरूपभेदोदृश्यते,तथे कारयकारयोर्वर्णत्वेनतुल्यत्वेऽपि स्वरूपभेदोदृश्यते, तस्माद् दृष्टान्तसाम्येन विकारएवेकारस्ययकारोनादेशइतिभावः॥४२॥

समाधत्ते—

न विकारधर्मानुपपत्तेः ॥४३॥

न=यदुक्तं तन्न, कस्मात् ? विकारधर्मस्य=प्रकृत्यनुविधानस्य, यकारेऽनुपपत्तेरसिद्धेः । विकारभूतेषुकटकादिषु प्रकृतिभूतस्यु वर्णसादृश्यंवर्तते,वृक्षेषु च वीजसादृश्य मन्यथा वटवीजादश्वत्थवृक्षसंभवःस्यान्नचैवंयकारे, तस्मादवगम्यते यथानडुहःस्थाने समागतोऽश्वोनतद्विकारस्तथेकारस्थानेसमागतोयकारोऽपिनतद्विकारइतिभावः ॥४३॥

वर्णविकारासंभवेहेत्वन्तरमाह—

विकारप्राप्तानामपुनरापत्तेः ॥४४॥

विकारप्राप्तानां=विकृतिंगतानां द्रव्याणामपुनरापत्तेःपुनः प्रकृतिभावस्यप्राप्तिर्नभवति ।यथा दुग्धविकारोदधिपुनर्दुग्धं नभवति । यकारादिवर्णास्तु पुनःप्रकृतिभावमापद्यन्ते, 'दध्यत्र' इतिवचनोत्तरम्-दधि अत्र, इत्यस्यापिवक्तुंशक्यत्वात् ॥४४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अत्राव्यभिचारमाशंकते—

सुवर्णादीनांपुनरापत्तेरहेतुः ॥४५॥

अहेतुः=अपुनरापत्तेरित्युक्तोहेतुर्न संभवति, कस्मात्? सुवर्णादिविकाराणां कटकादीनां पुनरापत्तेः=पुनःसुवर्णरूपस्य प्रकृतिभावस्यप्राप्तेरित्यर्थः ॥४५॥

समाधत्ते—

न तद्विकाराराणां सुवर्णभावाव्यतिरेकात् ॥४६॥

न=अपुनरापत्तेरित्ययमहेतुर्न, कस्मात्? तद्विकाराणां=सुवर्णादिविकाराणांकटककुण्डलादीनां, सुवर्णभावस्य=सुवर्णत्वस्य, अव्यतिरेकात्=विजातीयत्वाभावादित्यर्थः ॥४६॥

विकारप्रतिषेधेहेत्वन्तरमाह—

नित्यत्वेऽविकारादनित्यत्वेचानवस्थानात् ॥४७॥

नित्यत्वे=वर्णानांनित्यत्वपक्षेऽविकारात्=विकारासंभवात्, अनित्यत्वपक्षे चानवस्थानात्=प्रतिक्षणं विनाशित्वेनावस्थितेरसंभवान्नयणादिर्विकारःसंभवतीत्यर्थः। नित्यत्वेद्वयोरविकारित्वादनित्यत्वेऽनवस्थानात्कःकस्यविकारःस्यादिति॥४७॥

नित्यत्वपक्षे समाधानमाह—

नित्यानामतीन्द्रियत्वात् तद्धर्मविकल्पाच्च वर्णविकाराणामप्रतिषेधः ॥४८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वर्णानां नित्यत्वेऽपि तद्विकाराणामप्रतिषेधः = प्रतिषेधोन संभवति, कस्मात् ? नित्यानामपिपदार्थानां केषांचिद् गोत्वादीनामैन्द्रियकत्वेऽपिनित्यत्वात् , केषांचिदाकाशादीनामतीन्द्रियत्वेन नित्यत्वात्तद्धर्मविकल्पात् धर्मस्यनानाविधत्वादित्यर्थः॥४८॥

अनित्यत्वपक्षेसमाधानमाह—

अनवस्थायित्वेचवर्णोपलब्धिवत्तद्विकारोपपत्तिः ॥४९॥

अनवस्थायित्वे च अनित्यत्वपक्षेऽपिवर्णोपलब्धिवत् = वर्णानांश्रावणप्रत्यक्षवत् , तत् तेषां वर्णानां विकारः संभवति ॥४९

उभयत्रसमाधानमाह—

विकारधर्मित्वे नित्यत्वाभावात्, कालान्तरेऽविकारोपपत्तेश्चाप्रतिषेधः ॥५०॥

वर्णानां विकारधर्मित्वस्वीकारे नित्यत्वासंभवात् , कालान्तरे = स्थितिकालतोभिन्नकालेऽविकारोपपत्तेः = विकारासंभवाच्चाप्रतिषेधः = दुग्धविकारोदधि दुग्धनाशानन्तरं न जायते यकारस्तु इकारनाशोत्तरमेवजायते इति न वर्णविकारःसंभवतीतिभावः ॥५०॥

अत्रैवहेत्वन्तरमाह—

प्रकृत्यनियमात् ॥५१॥

वर्णविकाराणां प्रकृतिनियमाभावादुक्तप्रतिषेधो न संभवतीत्यर्थः। दुग्धं दधिप्रकृतिरेव दधिचदुग्धविकृतिरेव नचैषवर्णे

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विकाराणा मस्ति नियमो 'दध्यत्र' इत्यत्रेकारस्यप्रकृतित्वेऽपि 'विध्यति" इत्यत्र संप्रसारणस्थले इकारस्यैव विकृतित्वात् ॥५१

अस्यच्छलेनोत्तरमाह—

अनियमेनियमान्नानियमः ॥५२॥

अनियमे = प्रकृत्यनियमे, नियमात् = नियमसत्वात्, अनियमो न = नास्तीत्यर्थः । यत्रयस्यप्रकृतित्वं तत्र तस्य न विकृतित्वं यत्र च विकृतित्वंतत्र न प्रकृतित्वमितिनियम एव नानियम इतिभावः ॥५२॥

समाधानमाह—

नियमानियमविरोधादनियमेनियमादप्रतिषेधः ॥५३॥

अनियमे = प्रकृत्यनियमेनियमादप्रतिषेधः, कस्मात्? नियमानियमयोःसामानाधिकरण्यविरोधादित्यर्थः । वर्णेषुप्रकृतिनियमोनोपपद्यते प्रकृतिविकारस्थलेचप्रकृतिनियमोदृश्यते ॥५३॥

गुणान्तरापत्युपमर्दह्रासवृद्धिलेशश्लेषेभ्यस्तु विकारोपपत्तेर्वर्णविकाराः ॥५४॥

उदात्तस्यानुदात्तोगुणान्तरापत्तिः। एकरूपनिवृत्तौ रूपान्तरप्राप्तिरुपमर्दः यथास्तेभूः। दीर्घस्यह्रस्वः = ह्रासोयथाश्रीपम् । ह्रस्वस्यदीर्घोवृद्धिर्यथाचीकमत । लाघवंलेशोयथा स्त इत्यत्राकारलोपः । प्रकृतेरागमः श्लेषोयथानन्दतीत्यत्रप्रकृतेनुमाग-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

मः । एतेयद्विकारास्तदावर्णविकारा अपि सिध्यन्ति ॥५४॥

पदलक्षणमाह—

ते विभक्त्यन्ताः पदम् ॥५५॥

ते = वर्णाविभक्त्यन्ताः सुप्तिङ्विभक्त्यन्ताःसन्तः पदं = पदसंज्ञका भवन्ति, यथा-'रामः' इति 'पचति' इतिचेत्यर्थः । पाणिनिरप्याह- "सुप्तिङन्तंपदम्" १। ४। १४। एवं चद्वेधापदं नामचाख्यातंच, सुबन्तंनाम तिङन्तंचाख्यातम्। उपसर्गनिपातास्तु नाम्ना संगृह्यन्ते, "अव्ययादाप्सुपः २। ४। ८२। इत्यत्रतेषामपिसुबन्तत्वाभ्युपगमात्। यास्कोप्याह- "चत्वारिपदजातानि नामाख्याते चोपसर्गनिपाताश्च ॥ ५५ ॥

पदं निरूप्य पदार्थनिरूपयति—

व्यक्त्याकृतिजातिसन्निधावुपचारात्संशयः ॥५६॥

किंव्यक्तिः = गवादिद्रव्यं, पदार्थः । आहोस्विदाकृतिः = अवयवसंयोगविशेषः पदार्थः। उतजातिर्गोत्वादिःपदार्थः। अथवा त्रितयंमिलितमितिसन्देहो जायते । कस्मात् ? व्यक्तिश्चाकृतिश्चजातिश्च तासांसंनिधौ = समुदाये, उपचारात् = गौरिति पदप्रयोगादित्यर्थः। व्यक्त्यादिस्वरूपमग्रेवक्ष्यते ॥५६॥

व्यक्तिपदार्थवादिनोमतेनाह—

याशब्द-समूह-त्याग-परिग्रह-संख्या-वृद्ध्यपचय-वर्ण-समासानुबन्धानां व्यक्तावुपचाराद्व्यक्तिः ॥५७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

व्यक्तिरेवपदार्थः कस्मात् ? याशब्दादीनां व्यक्तावेवोपचारात् = प्रयोगादित्यर्थः) यापदघटितंवाक्यंयाशब्दः, "यागौस्तिष्ठतियागौर्निषण्णा, समूहः समुदायः "गवांसमूहः" त्यागोदानम् , विप्राय गां ददाति,परिग्रहोग्रहणम् ,"गांप्रतिगृह्णाति, एकत्वादिपरार्द्धपर्यन्तासंख्या-"दशगावोविंशतिर्गावः, वृद्धिरुपचयः "अवर्द्धतगौः, अपचयोह्रासः"गौरकृश्यत्," रूपंवर्णः "शुक्लागौः, कपिलागौः. समासः संश्थितिः-'समास्तेगौः, अनुबंधः स्वसमानसंतानोत्पादकत्वम् , "गौर्गांजनयति, ॥५७॥

निराकरोति—

न—तदनवस्थानात् ॥५८॥

न = यदुक्तंतन्न,कस्मात् ? याशब्दादीनां तत्रव्यक्तावनवस्थानं = व्यवस्थितिस्तदभावादित्यर्थः । यदिप्रयुज्यमाना याशब्दप्रभृतयो व्यक्तिमात्रेव्यवतिष्ठेरन् तदास्याद्गवादिपदानां व्यक्तिरर्थः । नचते तत्रव्यवस्थातुमर्हन्ति । अपितुगोत्वविशिष्टव्यक्तौ ॥

ननुदृश्यतेकचिद्व्यक्तिमात्रेऽपिप्रयोगस्तत्राह—

सहचरण-स्थान-तादर्थ्य-वृत्त-मान-धारण-सामीप्य-योग-साधनाधिपत्येभ्योब्राह्मणमञ्चकटराजसक्तुचन्दनगङ्गाशाटकान्नपुरुषेष्वतद्भावेऽपि तदुपचारः ॥५९॥

ब्राह्मणमञ्चप्रभृतिषु सहचरणादिभ्योऽतद्भावेऽपि = ब्राह्मणाद्यर्थत्वाभावेऽपितदुपचारः = तच्छब्दप्रयोगोभवतीत्यर्थः । सहचरणात् = 'यष्टिकां भोजय, स्थानात् = 'मञ्चाः क्रोशन्ति,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तादर्थ्यात् = 'कटं करोति, वृत्तात् = यमोराजा, कुवेरोराजा, मानात् = आढकेनपरिमाणेन मिताःसक्तवः-आढकंसक्तवइति । धारणात् = तुलयाधृतंचन्दनं तुलाचन्दनमिति । सामीप्यात्- 'गङ्गायांगावश्चरन्ति, योगात् = कृष्णेनरागेणयुक्तःशाटकः कृष्णइत्युच्यते । प्राणसाधनात् = अन्नंप्राणाः, आधिपत्यात् = अयं पुरुषः कुलम्, एषु यष्टिकादेर्यष्टिधरब्राम्हणादिषुप्रयोगोलाक्षणिकएवभवतीति न केवलाव्यक्तिः पदार्थइतिभावः ॥६४॥

आकृतिपदार्थवादिमतेनाह—

आकृतिस्तदपेक्षत्वात्सत्वव्यवस्थानसिद्धेः ॥६०॥

आकृतिः पदार्थः कस्मात्? सत्वव्यवस्थानसिद्धेः = सत्वं गवादिप्राणी, तद्व्यवस्थानस्य = 'अयंगौरयमश्वः' इत्यादि व्यवस्थाया स्तदपेक्षत्वात् = आकृतिज्ञानाधीनत्वादित्यर्थः ॥६०॥

जातिपदार्थवादिमतमाह—

व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात्प्रोक्षणादीनांमृद्गवकेजातिः ६१

जातिः पदार्थः, कस्मात्? व्यक्त्याकृतियुक्तेऽपिमृद्गवके = मृत्तिकाघटिते गवाकृतिपिण्डे, दानक्रियाङ्गानां प्रोक्षणादि कर्मणा मप्रसङ्गात् = असंबन्धादित्यर्थः । 'गां प्रोक्षय,'गामानय इत्यादिवाक्यानि मृद्गवकेनप्रयुज्यंते. कस्मात् जातेरभावात्, यत्रगोत्वंवर्त्तते सास्नादिमतिपिण्डे तत्रैवतद्व्यवहार इति न व्यक्तिर्वाकृतिर्वापदार्थः किन्तुजातिः ॥६१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

निराकरोति—

नाकृतिव्यक्त्यपेक्षत्वाज्जात्यभिव्यक्तेः ॥६२॥

न=यदुक्तंतन्न, कस्मात् ? जात्यभिव्यक्तेः=जातिनिष्ठ-प्रत्यक्षयोग्यताया आकृतिव्यक्त्यपेक्षत्वात्=व्यक्त्याकृतिप्रतीति सापेक्षत्वादित्यर्थः । न केवलाजातिःपदार्थोव्यक्तिमाकृतिं च विना जातिमात्रस्य भानासंभवादितिभावः ॥६२॥

कस्तर्हिपदार्थस्तत्राह—

व्यक्त्याकृतिजातयस्तुपदार्थः ॥६३॥

व्यक्त्याकृतिजातयःपदार्थः=गवादिपदस्यार्थः । त्रिष्वेक-शक्तिलाभार्थ मेकवचनंपदार्थ इति ॥६३॥

ननु का व्यक्ति स्तत्राह—

व्यक्तिर्गुणविशेषाश्रयोमूर्तिः ॥६४॥

रूपादिगुणविशेषाणामाश्रयोमूर्तिर्व्यक्तिः ॥६४॥

नन्वाकृतिः का तत्राह—

आकृतिर्जातिलिङ्गाख्या ॥६५॥

जातिलिङ्गाख्या=जातिग्रहणकारणमाकृतिः । महाभाष्य-कारोऽपि='जातेरस्त्रीविषयादयोपधात्, इति सूत्रभाष्ये 'आ-कृतिग्रहणाजातिरित्याह । आकृतिर्ग्रहणंयस्याः साजातिरितितद-र्थः ।"तपःश्रुतंचयोनिश्चैतद्ब्राह्मणकारकम् । तपःश्रुताभ्यांयोहीन-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

नोजातिर्ब्राह्मणएवसः ॥ इत्यपिसएवाह । ब्राह्मणत्वादिजातिरितितस्याभिप्रायः ॥६५॥

ननुकाजातिः तत्राह—

समानप्रसवात्मिकाजातिः ॥६६॥

या खलु भिन्नेष्वधिकरणेषु गवादिषु समानांबुद्धिं प्रसूते सा गोत्वादिर्जातिः । ब्राम्हणत्वादिजातिस्तु योनिव्यङ्ग्या ॥६६॥

॥ इतिन्यायसूत्रवृत्तौद्वितीयाध्यायस्यद्वितीयमान्हिकम् ॥

तृतीयाध्यायेप्रथमान्हिकम् ।

प्रमाणानिपरीक्षितानि प्रमेयमिदानींपरीक्षणीयम् । तत्रप्रमेयेषुप्रथमोद्दिष्टस्यात्मनः शरीरादिभ्यः पृथक्त्वे हेतुमाह—

दर्शनस्पर्शनाभ्यामेकार्थग्रहणात् ॥१॥

दर्शनंचक्षुरिन्द्रियं, स्पर्शनंत्वगिन्द्रियं, ताभ्यामेकार्थग्रहणादवगम्यतेऽस्ति शरीरेन्द्रियादिभ्योऽव्यतिरिक्तःकश्चिदात्मेत्यर्थः । "चक्षुषायमहमद्राक्षं तंत्वचास्पृशामीत्यादिप्रत्यभिज्ञा, तस्यतथासत्येवसंभवतीतिभावः ॥१॥

शङ्कते—

न विषयव्यवस्थानात् ॥२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

आत्मादेहादिसंघातादन्योन = नभवितुमर्हति, कस्मात् ?

विषयव्यवस्थानात् = रूपंचक्षुषएवविषयो गन्धोघ्राणस्यैव विषयोनान्यस्येतिविषयव्यवस्थादर्शनादित्यर्थः। यद्यात्मादेहादिभ्यः पृथक्स्यात्तदासर्वविषयज्ञातृत्वेन गन्धादिकं चक्षुरादिनापि जानीतनचैवमस्तीतिभावः ॥२॥

समाधत्ते—

तद्व्यवस्थानादेवात्मसद्भावादप्रतिषेधः ॥३॥

अप्रतिषेधः = संघातातिरिक्तात्मनः प्रतिषेधोनयुज्यते, कस्मात् ? तद्व्यवस्थानादेवात्मसद्भावात् = आत्मसद्भावसिद्धेरित्यर्थः। व्यवस्थितविषयाणि खलु सर्वेन्द्रियाणि, रूपस्यदर्शने नैवग्रहणंभवतिनस्पर्शनेनेतिरीत्या केनचिदव्यवस्थितविषयेणापि सर्वार्थग्राहिणाभवितव्यं यः सर्वंगृह्णीयात्सखल्वात्मा ॥३॥

शरीरदाहेपातकाभावात् ॥४॥

शरीरदाहे पातकं = हिंसाकृतंपाप, तदभावाज्ज्ञायते, न चेतनं शरीरमित्यर्थः। यदिशरीरं चेतनंभवेत् तदामरणोत्तरं तद्दग्धुरात्महिंसाकृतंपातकंभवेत्, "असूर्यानामतेलोकाअन्धेनतमसावृताः। तांस्तेप्रेत्याभिगच्छन्तियेकेचात्महनोजनाः॥ यजु० ४०।३॥ इत्यात्महिंसया पापश्रवणात्। पातकाभावात्तु ज्ञायते न चेतनं शरीरमितिभावः ॥४॥

पुनराशंकते—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वात् ॥५॥

सात्मकप्रदाहेऽपि = जीवच्छरीरदाहेऽपि, तदभावः = दग्धुः पातकाभावः संभवति, कस्मात् ? तन्नित्यत्वात् = तस्यात्मनो-नित्यत्वात्, हिंसानुपपत्तेर्हिंसांविनापातकासंभवादित्यर्थः। आत्मनोनित्यत्वं भगवद्गीतादिषुव्यक्तम् ॥५॥

समाधत्ते—

न कार्याश्रयकर्तृवधात् ॥६॥

नयदुक्तं तन्न, कस्मात् ? कार्याश्रयकर्तृवधात् = सुख दुःखभोगःकार्यं तस्याश्रयः शरीरं तद्विशिष्टस्यकर्तुरात्मनो वधसंभवात्सात्मकशरीरदाहे हिंसोत्पत्तेरित्यर्थः। अत्रात्मनो नाशोहिंसानोच्यतेऽपितु शरीरात्मनो वैशिष्ट्यसंबन्धस्य, स-च सात्मकशरीरदाहेसंभवतीतिसिद्धं शरीरदाहेपातकाभावाद-चेतनंशरीरम् ॥६॥

आत्मनः शरीरादिभ्यः पृथक्त्वे हेत्वन्तरमाह—

सव्यदृष्टस्येतरेणप्रत्यभिज्ञानात् ॥७॥

सव्यदृष्टस्य = सव्येन वामेन चक्षुषा दृष्टस्य पदार्थस्य, इत-रेण = दक्षिणेन चक्षुषा प्रत्यभिज्ञानात् इन्द्रियादिभ्यःपृथगात्मा सिध्यति ॥७॥

आक्षिपति—

नैकस्मिन्नासास्थिव्यवहिते द्वित्वाभिमानात् ॥८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

न=यदुक्तं तन्न, कस्मात्? एकस्मिन्नेवचक्षुषिनासास्थि व्यवहिते=मध्येनासिकास्थनाछन्ने, द्वित्वाभिमानात्= द्वे चक्षुषी, इतिद्वित्वभ्रमादित्यर्थः। यथैकस्मिन्नेवतड़ागे मध्येसेतु-व्यवधानेनतड़ागद्वित्वभ्रमोभवति तथेतिभावः ॥८॥

परिहरति—

एकविनाशेद्वितीयाविनाशान्नैकत्वम् ॥९॥

एकत्वंचक्षुरिन्द्रियस्यन=नसंभवति, कस्मात्? एकविनाशे=एकस्य चक्षुषो विनाशेऽपि, द्वितीयाविनाशात्=द्वितीयस्यचक्षुषोविनाशोनदृश्यतेयतइतिभावः ॥९॥

अत्रव्यभिचारमाशंकते—

अवयवनाशेऽप्यवयव्युपलब्धेरहेतुः ॥१०॥

पूर्वसूत्रे चक्षुर्द्वित्वसाधनाय योहेतुरुक्तः सोऽहेतुः कस्मात्? अवयवनाशेऽपि=शाखादिरूपकतिपयावयवानां नाशे ऽपि यथाऽवयवीवृक्षः पूर्ववदुपलभ्यतेतथानेत्रावयवस्यैकस्यविनाशेऽपिनेत्रस्यसत्वंसंभवति ॥१०॥

समाधत्ते—

दृष्टान्तविरोधादप्रतिषेधः ॥११॥

अप्रतिषेधः=नेत्रद्वित्वस्यप्रतिषेधो न युज्यते, कस्मात्? दृष्टान्तविरोधात्=दृष्टान्तस्य शाखिनो दार्ष्टान्तिकेन चक्षुषा विरोधात्=सादृश्याभावादित्यर्थः। वृक्षस्यबहवोऽवयवाभव-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

न्तितेषु केषांचिन्नाशेऽपिवृत्तसत्वमुपपद्यते, चक्षुषस्तुद्वावेवावयवौ तत्रैकस्यनाशे चक्षुःसत्ता न संभवतीतिभावः ॥११॥

अत्रैवहेत्वन्तरमाह—

इन्द्रियान्तरविकारात् ॥१२॥

चक्षुरादितोऽन्यदिन्द्रियमिन्द्रियान्तरं रसनेन्द्रियं, तस्या म्रादिफलेदृष्टेतद्रसस्मृत्या मुखे जलवृद्धिलक्षणोविकारो जायते, यस्यानुभवितुरेषास्मृतिः सशरीरेन्द्रियादितोव्यतिरिक्तः कश्चिदात्मेतिभावः ॥१२॥

आक्षिपति—

न स्मृतेः स्मर्तव्यविषयत्वात् ॥१३॥

न=यदुक्तं तन्न युज्यते, कस्मात्? स्मृतेः स्मर्तव्यविषयत्वात्, स्मर्तव्यार्थश्चेहरसएव नात्मेतिरसस्मृतिरपिरसविषया संभवति नात्मविषयेति कथंरसस्मृत्या इन्द्रियादिव्यतिरिक्तआत्मासिद्धयेदितिभावः ॥१३॥

समाधत्ते—

तदात्मगुणसद्भावादप्रतिषेधः ॥१४॥

अप्रतिषेधः= स्मृतेरात्मानुमापकताप्रतिषेधोनोपपद्यते, कस्मात्? तदात्मगुणसद्भावात्=तस्यारसादिस्मृतेरात्मगुणत्वादित्यर्थः। 'रसविषयकस्मृतिमानहम्, इत्यादिज्ञानेनरसस्मृतेरात्मधर्मत्वंसिध्यति ॥१४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पूर्वपक्षयति—

नात्मप्रतिपत्तिहेतूनां मनसि संभवात् ॥१५॥

न = शरीरेन्द्रियाभ्यामतिरिक्तोभवन्नप्यात्मा मनोऽतिरिक्तो नसिध्यति. कस्मात् ? आत्मप्रतिपत्तिहेतूनाम् = आत्मसाधकानां प्रत्यभिज्ञादीनां मनसिसम्भवादित्यर्थः । यथाहिसर्वेन्द्रियविषयवेदीकश्चिदात्माकल्प्यते, तथैव सर्वेन्द्रियविषयवेदिमनोमन्यतां स्मृतिप्रत्यभिज्ञाविकारा अपितत्रसंभवन्ति ॥१५॥

उत्तरयति—

ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रम् ॥१६॥

ज्ञातु रात्मनो मनसश्च ज्ञानसाधनोपपत्तेर्वाह्यज्ञानसाधनस्येवाभ्यन्तरज्ञानसाधनस्याप्युपपत्तेः संज्ञाभेदमात्रं = केवलमात्ममनःसंज्ञयो रेव भेदो नतुपदार्थभेदोमत्स्वीकृतस्यात्मनस्त्वयामनइतिसंज्ञाकृतेतिभावः ॥१६॥

विपक्षे वाधकमाह—

नियमश्चनिरनुमानः ॥१७॥

रूपादिज्ञानकरणं चक्षुरादिकमस्ति, आभ्यन्तरमननादिकरणंमनोनास्तीतियोनियमः सनिरनुमानोनिर्हेतुकएवेत्यर्थः॥१७॥

आत्मनोदेहादिव्यतिरिक्तत्वमुपपाद्यतन्नित्यत्वमुपपादयन्नाह-

पूर्वाभ्यस्तस्मृत्यनुवन्धाज्जातस्यहर्षभयशोकसम्प्रतिपत्तेः ॥१८॥

जातस्यवालकस्य,पूर्वाभ्यस्तानां=पूर्वजन्मन्यनुभूतानांहर्षा-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दिहेतूनां स्तन्यपानादीनां, स्मृत्यनुबन्धात् = स्मरणानुवृत्या, हर्षभयशोकसम्प्रतिपत्तेः = हसितरुदितादिलिङ्गानुमितहर्षभय शोकानांसिद्धिः। ततश्च पूर्वजन्मसिद्धं तेनात्मनोऽनादित्वंसिद्ध मनादिभावस्यनाशासंभवान्नित्यश्चात्मेतिसिध्यति ॥१८॥

अत्रशंकते—

पद्मादिषुप्रबोधसम्मीलनविकारवत्तद्विकारः ॥१९॥

यथापद्मादिषु = कमलादिषु, प्रबोधसम्मीलनं = प्रफुल्लत्व मुकुलीभावौ, तल्लक्षणो विकारः स्वभावादेवजायते तथाजातस्यबालकस्य हसितादिविकारोऽपिस्वभावादेवमन्यतांनकुतश्चिन्निमित्तात्। तथाचपूर्वाभ्यस्तस्मृत्यनुबन्धानुमानासंभवान्नात्मानादिस्तथाचननित्यः ॥१९॥

समाधत्ते—

नोष्णशीतवर्षकालनिमित्तत्वात्पञ्चात्मकविकाराणाम् ॥२०॥

न = यदुक्तं तन्न, कस्मात्? पञ्चात्मक विकाराणां = पञ्चभूतात्मकानां प्रबोधसंमीलनादिविकाराणा मुष्णकालादिनिमित्तत्वात् हर्षादीनांस्मृत्यनुबन्धादिकंनिमित्तं सिध्यति, तेनपूर्वजन्मसिद्धं तस्माच्चानादित्वमात्मनो ऽनादिभावश्चनित्योयथेश्वरइतिभावः ॥२०॥

आत्मनोनित्यत्वेहेत्वन्तरमाह—

प्रेत्याहाराभ्यासकृतात्स्तन्याभिलाषात् ॥२१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रेत्य=मृत्वा जातस्य बालकस्याहाराभ्यासकृतात्स्तन्याभिलाषात्=मातृस्तनभवं क्षीरं स्तन्यं तत्पिपासाभिलाषस्तस्माज्ज्ञायते नित्य आत्मेत्यर्थः। जातमात्रस्य क्षीराहारानुभवश्च नास्मिञ्जन्मनि सं भवतीति पूर्वजन्म सिद्धं तथा चानादित्वमात्मनः प्राप्तं तस्माच्च नित्यत्वम् ॥२१॥

अत्र शंकते—

अयसोऽयस्कान्ताभिगमनवत्तदुपसर्पणम् ॥२२॥

अयसो=लोहस्य, यथा पूर्वाभ्यासं विनैवायस्कान्ताभिगमनम्, चुम्बकनामकपाषाणसमीपोपसर्पणं भवति तथैव तत् = तस्य वालकस्य पूर्वाभ्यासं विनैवोपसर्पणं=स्तनाभिमुखगमनं स्तन्यपानप्रवृत्तिरिति यावद्भवतीत्यर्थः। यदि जातोऽयं बालकः पूर्वजन्माभ्यस्तमनुस्मरन् स्तन्याभिलाषे प्रवर्तेत तदा जन्मान्तरानुभूतमन्यदपि किञ्चिदनुस्मरेन्न च स्मरतीत्यनित्य आत्मा ॥२२॥

समाधत्ते—

नान्यत्रप्रवृत्त्यभावात् ॥२३॥

न=यदुक्तं तन्न, कस्मात् ? अन्यत्र=अयसोऽन्यत्र लोष्ठादौ प्रवृत्त्यभावात्=अयस्कान्ताभिमुखप्रवृत्त्यदर्शनादित्यर्थः। यथाऽयस्कान्ते लोहाकर्षणशक्तिर्निमित्तं, तथा बालकस्य स्तनोपसर्पणे पूर्वानुभूतस्मरणं निमित्तं पूर्वानुभवश्च पूर्वजन्मन्येव सं भवतीति सिद्धं पूर्वजन्मपरम्परयात्मनो नित्यत्वमिति भावः ॥२३॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

आत्मनो नित्यत्वेऽन्यं हेतुमाह—

वीतरागजन्मादर्शनात् ॥२४॥

वीतरागस्य = रागद्वेषादिरहितस्य तत्त्वज्ञानिनो जन्म=शरीरेणसमंसंबन्धस्तस्यादर्शनादवगम्यते सरागस्तु जायते । वीतरागस्यजन्माभावस्तुसर्वैरपिस्वीक्रियते । यदुक्तं योगभाष्यकृता—"क्षीणरागस्तुनकेनचित्कश्चित्कचिज्जातोदृश्यते ॥२४॥

आशङ्कते—

सगुणद्रव्योत्पत्तिवत्तदुत्पत्तिः ॥२५॥

यथाद्रव्यस्य = घटादेः सगुणस्य = रूपादिगुणसहितस्यैवोत्पत्तिर्भवति, तथा तत् = तस्यात्मनोऽपि सरागस्यैवोत्पत्तिः संभवति,न तत्र निमित्तान्तरं किंचिदन्वेष्टव्यं येनात्मनोऽनादित्वमनादित्वाच्चनित्यत्वं स्यादितिभावः ॥२५॥

समाधत्ते—

न संकल्पनिमित्तत्वाद्रागादीनाम् ॥२६॥

न = यदुक्तं तन्न, कस्मात् ? रागादीनां = रागद्वेषादिदोषाणां, संकल्पनिमित्तत्वात् = इष्टसाधनताज्ञानजन्यत्वादित्यर्थः । इष्टसाधनताज्ञानं च जन्मान्तरसापेक्षमित्यनादित्व मात्मनः सिध्यति तस्माच्च नित्यत्वमितिभावः ॥२६॥

आत्मानंपरीक्ष्य शरीरपरीक्षामारभते—

पार्थिवं तद्विशेषगुणोपलब्धेः ॥२७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अस्मदादिशरीरं पार्थिवं, कस्मात्? तद्विशेषगुणोपलब्धेः पार्थिवोविशेषगुणोगन्धस्तस्योपलब्धेः = प्राधान्येनोपलम्भादित्यर्थः । यद्यपिजलादीनांरसरूपादयोऽपिगुणाः शरीरेसमुपलभ्यन्ते, तथापि "वैशेष्यात्तु तद्वादस्तद्वादः (२।४।२३। इतिवेदान्तसूत्राद्विशेषरूपेणपृथिव्यागुणस्तत्रवर्ततेतस्मात्पार्थिवंशरीरम्॥२७॥

उक्तार्थंश्रुतिप्रमाणयति—

श्रुतिप्रामाण्याच्च ॥२८॥

'पृथिव्यैतेशरीरंस्पृणोमि शत० ११।८।१४।६। इत्यादिश्रुतिप्रतिपाद्यत्वादपि पृथिवीप्रकृतिकत्वं शरीरस्यसिद्ध्यति,श्रुतिप्रामाण्येसतिनप्रमाणान्तरापेक्षाभवति, तथाचशाबरभाष्यम् "निरपेक्षोरवः श्रुतिरिति ॥२८॥

शरीरंपरीक्ष्यक्रमप्राप्तमिन्द्रियपरीक्षणमारभते—

कृष्णसारेसत्युपलम्भाद्व्यतिरिच्यचोपलम्भात्संशयः ॥२९॥

कृष्णसारः = कृष्णतारा, तस्मिन् चक्षुर्गोलके सति = भवत्युपलंभात् = विषयस्योपलब्धे र्व्यतिरिच्य चोपलब्धेः संशयः = किं कृष्णतारा = कनीनिकामात्रंचक्षुरिन्द्रिय माहोस्विदन्यत्किंचिदित्यर्थः ॥२९॥

कृष्णसारमेवचक्षुरितिबौद्धमतंनिराकुर्वन्नाह—

महदणुग्रहणात् ॥३०॥

कृष्णसारान्महतोमहत्तरस्य महत्तमस्य चाणोरणुतरस्या

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

णुतमस्यग्रहणादुपलम्भाजज्ञायते न कृष्णसारमात्रं चक्षुरिन्द्रियमपित्वन्यत्तैजसंद्रव्यंतस्यैवचैषस्वभावः प्रदीपादेरिवयत्स्वपरिमाणतोऽधिकपरिमाणंन्यूनपरिमाणंचवस्तुग्रहीतुंशक्नोति३०

ननुमहदणुग्रहणंकथमुपपद्येतगोलकस्थस्य तस्य तैः सह-संनिसंकर्षाभावात्तत्राह—

रश्म्यर्थसंनिकर्षविशेषात्तद्ग्रहणम् ॥३१॥

चक्षूरश्मेः महदणुपदार्थेनसहसंनिकर्षविशेषात्=संयोगात्, तद्ग्रहणम्=महदणुपदार्थग्रहणमुपपद्यते इत्यर्थः ॥३१॥

अत्रशंकते—

तदनुपलब्धेरहेतुः ॥३२॥

'रश्म्यर्थ, इतिपूर्वोक्तो हेतु रहेतुः कस्मात्? तदनुपलब्धेः, यदि चक्षूरश्मिः स्यात्तदाप्रदीपरश्मिरिव प्रत्यक्षेणोपलभ्येत, नचोपलभ्यते तस्मान्नास्ति यदानास्ति तदापूर्वोक्तहेतोरहेतुत्वान्महदणुग्रहणमनुपपन्नमितिभावः ॥३२॥

समाधत्ते—

नानुमीयमानस्यप्रत्यक्षतोऽनुपलब्धिरभावहेतुः ॥३३॥

प्रत्यक्षतोऽनुपलब्धिरनुमीयमानस्य पदार्थस्याभावहेतुर्नभवति। यथा चन्द्रमसः परभागस्य पृथिव्याश्चाधोभागस्यप्रत्य

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ततोऽनुपलब्ध्याप्यनुमानेनसद्भावस्तथारश्म्यर्थसंनिकर्षेण चक्षूरश्मे रनुमानंभवति, चक्षूरश्मिविना तत्संनिकर्षासम्भवादितिभावः ॥३३॥

ननुयद्यस्तिचक्षूरश्मिस्तदाकथंनप्रत्यक्षेणोपलभ्यतेतत्राह—

द्रव्यगुणधर्मभेदाच्चोपलब्धिनियमः ॥३४॥

यत्र द्रव्ये महत्वं तस्यप्रत्यक्षं भवति, यत्रगुणोउद्भूतरूपत्वंतस्यगुणस्यप्रत्यक्षं भवतिनान्यस्य यथापरमाणुनद्रूपयोः,चक्षूरश्मावुद्भूतरूपत्वंनास्तीतिसतोपितस्यप्रत्यक्षेणोपलब्धि र्नभवति ॥३४॥

आशंकते—

मध्यंदिनोल्काप्रकाशानुपलब्धिवत्तदनुपलब्धिः ॥३५॥

मध्यंदिने = मध्यान्हे, महतोरूपवतश्चोल्काप्रकाशस्य गगनात्पतितस्य सूर्यप्रकाशेनाभिभवाद्यथोपलब्धिर्नभवति, तथा तदनुपलब्धिर्भवत्विति भावः ॥३५॥

समाधत्ते—

न रात्रावप्यनुपलब्धेः ॥३६॥

न = यदुक्तंतन्न, कस्मात्? रात्रावपि तदनुपलब्धेः । मध्यंदिनेऽनुपलभ्यमानोह्युल्काप्रकाशोरात्रावुपलभ्यते चक्षूरश्मिस्तु नदिनेनवारात्रावुपलभ्यते, तस्मान्नोल्काप्रकाशवदभिभवनिमित्तातदनुपलब्धिरितिभावः ॥ ३६ ॥

ननु किं निमित्ता तर्हितदनुपलब्धिस्तत्राह—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वाह्यप्रकाशानुग्रहाद्विषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः ३७

वाह्यप्रकाशेन = सूर्यादिप्रकाशेन, चक्षुषोऽनुग्रहात् = घटादि विषयोपललब्धेः, सतोऽपिचक्षूरश्मेरनुपलब्धिरनभिव्यक्तितोऽनुद्भूतरूपनिमित्तासंभवति ॥३७॥

ननूल्काप्रकाशवदभिभवात्तदनुपलब्धिःकल्प्यतांतत्राह—

अभिव्यक्तौचाभिभवात् ॥ ३८॥

अभिव्यक्तौ = उद्भूतरूपवत्वेसति,अभिभवात् = अभिभवनिमित्ताऽनुपलब्धिर्भवति यथा मध्यंदिने उल्काप्रकाशस्य । चक्षूरश्मेस्तुनोद्भूतरूपमितिदनुपलब्धिकारणमनुद्भूतरूपत्वमेवनत्वभिभवः ॥३८॥

चक्षूरश्मिसत्वेहेत्वन्तरमाह—

नक्तंचरनयनरश्मिदर्शनाच्च ॥३९॥

नक्तंचराणां = मार्जारादीनामन्धकारेऽपि चक्षूरश्मिर्दृश्यते तद्वदस्माकमपि चक्षुरिन्द्रियं सिध्यतीतिभावः ॥३९॥

नन्विन्द्रियाणिपदार्थं प्राप्यगृह्णन्ति किंवाऽप्राप्य?तत्राह—

अप्राप्यग्रहणंकाचाभ्रपटलस्फटिकान्तरितोपलब्धेः॥४०

अप्राप्य = असंयुज्य, पदार्थग्रहणमनुमीयते, कस्मात् ? काचश्चाभ्रपटलंचस्फटिकश्चतैरन्तरितस्य = व्यवहितस्यापि पदार्थस्योपलब्धेःप्रत्यक्षादित्यर्थः ॥४०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

समाधत्ते—

कुडयान्तरितानुपलब्धेरप्रतिषेधः ॥४१॥

इन्द्रियाणां प्राप्यग्राहित्वस्यप्रतिषेधोन सम्भवति.कस्मात्? कुडयादिनान्तरितस्य=व्यवहितस्यानुपलब्धेरप्रत्यक्षात्। चेद् प्राप्यग्राहकाणीन्द्रियाणिभवेयुस्तदा कुडयादिना व्यवहितमपि गृह्णीयुर्नचगृह्णन्ति, तस्मादवगम्यतेप्राप्यग्राहकाणीन्द्रियाणीति भावः ॥४१॥

ननुप्राप्यग्राहित्वेकुडयान्तरितस्येवकाचाद्यन्तरितस्याप्युपलब्धिर्नस्यात्तत्राह—

अप्रतीघातात्सन्निकर्षोपपत्तिः ॥४२॥

अप्रतीघातात्=काचादिस्वच्छद्रव्येणचक्षूरश्मेःप्रतिबन्धाभावात्, काचाद्यन्तरितेनाऽपिसहचक्षूरश्मेः सन्निकर्षोपपत्तिः सन्निकर्षउपपद्यते इत्यर्थः ॥४२॥

ननुक्वेदमवलोक्यतेतत्राह—

आदित्यरश्मेः स्फटिकान्तरितेऽपिदाह्येऽविघातात् ॥

आदित्यरश्मेः=सूर्यरश्मेः, स्फटिकान्तरितेऽपि=स्फटिकादिव्यवहितेऽपि, दाह्येवस्तुन्यविघातात् ॥४३॥

अत्रशङ्कते—

नेतरेतरमसङ्गात् ॥४४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

न = यदुक्तं तन्न कस्मात् ? इतरेतरधर्मप्रसङ्गात् = इतरस्य कुडयादेर्योधर्मः प्रतीघात स्तस्य काचादौ, काचादेर्यो धर्मोऽप्रतीघात स्तस्य कुडयादौ प्रसक्तेरित्यर्थः ॥४४॥

समाधत्ते—

आदर्शोदकयोःप्रसादस्वाभाव्याद्रूपोपलब्धिवत्तदुपलब्धिः ४५॥

आदर्शोदकयोःप्रसादस्वाभाव्यात् = स्वच्छस्वभावत्वात् रूपोपलब्धिवत् = स्वरूपस्यमुखादेर्यथोपलब्धिस्तथातदुपलब्धिः=तत्तस्यकाचाद्यन्तरितस्यार्थस्यचक्षुरिन्द्रियेणोपलम्भःसंभवतीत्यर्थः।अर्थात्काचादिभिश्चक्षू रश्मेःप्रतीघातोनभवतिकुडयादिभिश्चभवतीतिवस्तुस्वभावोनियामकइतिनेतरेतरप्रसङ्गः॥४५॥

वस्तुस्वभावस्यान्यथाभावोनभवतीत्याह—

दृष्टानुमितानांनियोगप्रतिषेधानुपपत्तिः ॥४६॥

दृष्टानामनुमितानां च पदार्थानां, नियोगः = एवंभवत, इत्यनुशासनं, प्रतिषेधो मैवंभवत, इतिनिषेधश्चनोपपद्यते इत्यर्थः॥४६॥

इन्द्रियाणामेकानेकत्वंपरीक्षयति—

स्थानान्यत्वेनानात्वादवयविनानास्थानत्वाच्चसंशयः॥४७

स्थानान्यत्वे = स्थानानेकत्वे,नानात्वात् = नानास्थानेषुस्थितानां घटपटादीनां नानात्वात्, अवयविनानास्थानत्वात् = एकस्यावयविनोऽवयवरूपनानास्थानस्थत्वाच्चेन्द्रियेष्वेकत्वानेक

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

त्वक्संशयः। तत्रैकमिन्द्रियमितिपूर्वंपक्षोनानेन्द्रियाणीतिसिद्धान्तः॥४७

अत्रपूर्वंपक्षमाह—

त्वगव्यतिरेकात् ॥४८॥

त्वगेवैकमिन्द्रियं, कस्मात्? अव्यतिरेकात्=तस्याःसर्वशरीर व्यापित्वादित्यर्थः। चक्षुर्गोलकस्थात्वग्रूपंगृह्णाति। नासिकाद्यग्रस्थाचगन्धादिकमितिभावः ॥४८॥

सिद्धान्तमाह—

न-युगपदर्थानुपलब्धेः ॥४९॥

न=त्वगेवैकमिन्द्रियमितिनोपपद्यते कस्मात्? युगपत्=एकस्मिन्काले, अर्थानांशब्दस्पर्शरूपादीनामनुपलब्धेरप्रत्यक्षात् ॥४९॥

तर्हिंकतोन्द्रियाणि मन्तव्यानि, तत्राह—

इन्द्रियार्थपञ्चत्वात् ॥५०॥

इन्द्रियार्थानां=गन्धादीनां,पञ्चत्वात्पञ्चेन्द्रियाणीत्यर्थः॥५०॥

शंकते—

न-तदर्थबहुत्वात् ॥५१॥

न=इन्द्रियार्थपञ्चत्वं न संभवति, कस्मात्? तदर्थबहुत्वात्=इन्द्रियार्थानांबहुत्वादित्यर्थः। तद्यथा-गन्धोद्विविधोरसः षड्विधोरूपंसप्तविधंस्पर्शस्त्रिविधः शब्दोद्विविधइति ॥५१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

समाधत्ते—

गन्धत्वाद्यव्यतिरेकाद्गन्धादीनामप्रतिषेधः ॥५२॥

अप्रतिषेधः = इन्द्रियपञ्चत्वप्रतिषेधो न युज्यते, कस्मात् ? गन्धादीनांगन्धत्वाद्यव्यतिरेकाद्गन्धत्वादिरूपेणैक्यादित्यर्थः॥५२॥

पुनःशंकते—

विषयत्वाव्यतिरेकादेकत्वम् ॥५३॥

विषयत्वाव्यतिरेकात् = गन्धादीनां विषयत्वेनैक्यात्, एकत्वं = इन्द्रियैकत्वंस्यान्नेन्द्रियपञ्चत्वमितिभावः ॥५३॥

समाधत्ते—

न बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपञ्चत्वेभ्यः॥५४॥

न = यदिन्द्रियैक्यमुक्तं तन्न, कुतः ? बुद्धिश्चलक्षणं चाधिष्ठानंचगतिश्चाकृतिश्चजातिश्चतासांपञ्चत्वानितेभ्यः। बुद्धिर्ज्ञानं घ्राणजादि, लक्षणं गन्धग्राहकत्वादि, तयोःपंचविधत्वात्तदिन्द्रियाणिपंच । अधिष्ठानं स्थानं,पंचविधं = नासाधिष्ठानं घ्राणं जिह्वाधिष्ठानंरसनमेवमन्यत् । तदधिष्ठातृणीन्द्रियाणिपंच । गतिर्विषयग्रहणंघ्राणादीनिपंचविषयंगृह्णान्ति।आकृतेरवयवसंस्थानस्य, जातेश्चपृथ्वीत्वादेः पंचविधत्वात्तदिन्द्रियाण्यपिपंचैवेतिभावः ॥५४॥

घ्राणादीनिपृथिवीत्वादिमन्तीत्याह—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भूतगुणविशेषोपलब्धेस्तादात्म्यम् ॥५५॥

भूतानां = पृथिव्यप्तेजोवाय्वाकाशानां येविशेषगुणाः = गन्ध-रसरूपस्पर्शशब्दास्तेषां घ्राणादिभिरिन्द्रियैरुपलब्धेरवगम्यते तादात्म्यं = भूतात्मकत्वमिन्द्रियाणाम् । तथा च घ्राणं पार्थिवं रसनं जलीयं चक्षुस्तैजसं स्पर्शनं वायवीयं श्रोत्रमाकाशात्मकं च ॥५५॥

इन्द्रियाणि परीक्ष्यार्थं परीक्षयति—

गन्धरसरूपस्पर्शशब्दानां स्पर्शपर्यन्ताः पृथिव्याः ॥५६॥

गन्धादीनां मध्ये स्पर्शपर्यन्ताः गन्धरसरूपस्पर्शाः चत्वारो गुणाः पृथिव्याः = पार्थिवाः, पृथिव्यामुपलभ्यमानत्वादित्यर्थः ॥५६॥

अप्तेजोवायूनां पूर्वं पूर्वमपोह्याकाशस्योत्तरः ॥५७॥

गन्धरसरूपस्पर्शानां मध्ये पूर्वं पूर्वमपोह्य = वर्जयित्वा, परिशिष्टा अप्तेजोवायूनामाकाशस्य चोत्तरः = स्पर्शानन्तर इत्यर्थः । गन्धरसरूपस्पर्शाः पृथिव्याः । रसरूपस्पर्शा अपाम् । रूपस्पर्शौ तेजसः । स्पर्शो वायोः शब्द आकाशस्य गुण इति भावः ॥५७॥

पूर्वपक्षयति—

न-सर्वगुणानुपलब्धेः ॥५८॥

न = पूर्वोक्ता गुणव्यवस्था नोपपद्यते, कस्मात् ? सर्वगुणानुपलब्धेः, यदि गन्धरसरूपस्पर्शाश्चत्वारो गुणाः पृथिव्याः स्युस्त

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

द्राघ्राणेनगृहीताःस्युर्नचगृह्यन्ते, इतिनयुक्तापूर्वोक्तागुणव्यवस्थे तिभावः ॥५८॥

उत्तरपक्षयति—

एकैकश्येनोत्तरोत्तरगुणसद्भावादुत्तरोत्तराणांतदनुपलब्धिः ॥५९

उत्तरोत्तरगुणानांमध्येभूतेषुएकैकश्येन = एकैकस्यैवसद्भावात्, उत्तरोत्तरगुणानां = रसादीनां, तत् = तैर्घ्राणादिभिः पृथिव्यादि षूपलब्धिर्नभवतीत्यर्थः ॥५९॥

ननुकथंतदापृथिव्यादिषुरसादयोप्युपलभ्यन्तेतत्राह—

विष्टंह्यपरंपरेण ॥६०॥

हियस्मादपरं = पूर्वंपृथिव्यादि, परेणोत्तरेणजलादिना विष्टं संयुक्तं विद्यते तस्मात्पृथिव्यादिषु रसादय उपलभ्यन्ते ॥६०॥

सिद्धान्तमाह—

न-पार्थिवाप्ययोः प्रत्यक्षत्वात् ॥६१॥

न = पृथिव्यादीनामेकैकमात्रगुणवत्त्वव्यवस्था न युक्ता, कस्मात्? पार्थिवाप्ययोः = पार्थिवस्यरसस्याप्यस्यच रूपस्य प्रत्यक्षत्वात् ॥६१॥

यद्येवंतदारसादयोगन्धादिवद्घ्राणादिभिःकथंनगृह्यन्तेतत्राह—

पूर्वपूर्वगुणोत्कर्षात्तत्तत्प्रधानम् ॥६२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पूर्वंपूर्वंघ्राणादिकमिन्द्रियं, गुणोत्कर्षात् = गन्धादिगुणप्राधान्यात्, तत्तत्प्रधानं = गन्धादिगुणग्राहकमित्यर्थः । घ्राणं गन्धमेवगृह्णातीत्यत्रघ्राणादौगन्धादिगुणानामुत्कर्षएवकारणंनान्यत्किंचिदितिभावः ॥६२॥

ननुघ्राणादिषुगन्धादीनामेवोत्कर्षोनरसादीनामितिकथंतत्राह—

तद्व्यवस्थानंतुभूयस्त्वात् ॥६३॥

घ्राणं = पार्थिवमित्यादिव्यवस्थातुभूयस्त्वात् = घ्राणादौगन्धादीनां प्राधान्यादुपपद्यते, तथाच वैशेषिकसूत्रम् – "भूयस्त्वाद्गन्धवत्वाच्च पृथिवी गन्धज्ञानेप्रकृतिरिति ॥६३॥

ननुघ्राणादिषुचेद्गन्धाद्युत्कर्षस्तदाकथंनोपलभ्यन्तेतत्राह-

सगुणानामिन्द्रियभावात् ॥६४॥

सगुणानां= गन्धादिगुणसहितानां, घ्राणादीना मिन्द्रियभावात्=इन्द्रियत्वादित्यर्थः ॥६४॥

अत्रैवहेत्वन्तरमाह—

तेनैवतस्याग्रहणाच्च ॥६५॥

तेनैव = स्वेनैव, तस्य = स्वस्याग्रहणाच्च, यथा-घटेनतद्घटस्य, तद्वस्तेनतद्वस्तस्यग्रहणंनभवति, तथा-सहकारिभूतोपिस्वनिष्ठगन्धादिर्घ्राणादिभिर्नगृह्यते इतिभावः ॥६५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शंकते—

न-शब्दगुणोपलब्धेः ॥६६॥

न=इन्द्रियैः स्वनिष्ठगुणोनगृह्यते इति नियमोनोपपद्यते, कस्मात्? श्रोत्रेणस्वगुणस्यशब्दस्योपलब्धेर्ग्रहणादित्यर्थः ॥६६॥

समाधत्ते—

तदुपलब्धिरितरेतरद्रव्यगुणवैधर्म्यात् ॥६७॥

द्रव्यगुणानां=श्रोत्रघ्राणादिद्रव्याणां, गन्धशब्दादिगुणानां च इतरेतरं=परस्परं वैधर्म्यात्, तदुपलब्धिः श्रोत्रेणशब्दस्योपलब्धिर्नतुघ्राणादिनास्वनिष्ठगन्धादेरितिनव्यभिचारइतिभावः॥

॥ इतिन्यायसूत्रवृत्तौतृतीयाध्यायस्याद्यमाह्निकम् ॥

अथतृतीयाऽध्याये

द्वितीयमाह्निकम्

बुद्धयादीनांनिरूपणायद्वितीयाह्निकमारभते—

कर्माकाशसाधर्म्यात्संशयः ॥१॥

स्पर्शरहितस्यकर्मणोऽनित्यस्यसाधर्म्यात्, आकाशस्यच स्पर्शरहितस्य नित्यस्य साधर्म्यात्, बुद्धौस्पर्शरहितायां नित्या-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

नित्यत्वसंशयोभवति, अर्थात्-स्पर्शरहितत्वसाम्येन बुद्धिः कर्मवदनित्या किंवाकाशवन्नित्येतिभावः ॥१॥

पूर्वपक्षमाह—

विषयप्रत्यभिज्ञानात् ॥२॥

विषयस्यप्रत्यभिज्ञानं = 'सोऽयंदेवदत्त, इत्यादिज्ञानं, बुद्धावेवनच बुद्धेरस्थिरत्वेतदधिकरणत्वमुपपद्यते, तस्मात्प्रत्यभिज्ञानाश्रयोबुद्धिःस्थिरा, स्थिरत्वादाकाशवन्नित्येतिभावः ॥२॥

उत्तरपक्षमाह—

साध्यसमत्वादहेतुः ॥३॥

अहेतुः = विषयप्रत्यभिज्ञाना दित्ययं हेतुर्न युज्यते, कस्मात् ? साध्यसमत्वात् = साध्येनतुल्यत्वादित्यर्थः। अहंजानामीत्यादिचेतनधर्मः प्रत्यभिज्ञानमचेतनायाबुद्धेर्धर्मोनसंभवति। तस्मादनित्येतिभावः ॥३॥

ननुचेतनाबुद्धिर्नाचेतनातत्राह—

न-युगपदग्रहणात् ॥४॥

न = चेतनाबुद्धिर्नसंभवति, कस्मात् ? युगपत् = एकस्मिन्काले, नानाविषयाणामग्रहणादित्यर्थः ॥४॥

ननुमाभूत्प्रत्यभिज्ञानंकोदोषस्तत्राह—

अप्रत्यभिज्ञाने च विनाशप्रसङ्गः ॥५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अप्रत्यभिज्ञाने = प्रत्यभिज्ञानाभावे, विनाशप्रसङ्गः = बुद्धेर्विनाशः प्रसज्यते, तस्मादनित्या ॥५॥

बुद्धिविनाशमसहमानः पुनः शंकते—

क्रमवृत्तित्वादयुगपद् ग्रहणम् ॥६॥

इन्द्रियैः सह मनःसंयोगस्य क्रमवृत्तित्वात् = पर्यायेण वर्तमानत्वात्, विषयाणांशब्दस्पर्शादीनामयुगपद्ग्रहणं न बुद्धेरचेतनत्वादितिभावः ॥६॥

अप्रत्यभिज्ञानं च विषयान्तरव्यासङ्गात् ॥७॥

अप्रत्यभिज्ञानं च = क्वचित्सत्यपीन्द्रियेणसंयोगे विषयज्ञानाभावस्तु विषयान्तरव्यासङ्गात् = विषयान्तरेण मनसः संबन्धादित्यर्थः। तथाच बृहदारण्यके श्रूयते = अन्यत्रमना अभूवंनादर्शम्, अन्यत्रमना अभूवं नाश्रौषमिति। तस्मात्सन्निहितविषयाग्रहणेऽपिचेतनाबुद्धिस्तस्मान्नित्या ॥७॥

समाधत्ते—

गत्यभावात् ॥ ८ ॥

गत्यभावादचेतनाबुद्धिः तस्मादनित्या ॥८॥

स्फटिकान्यत्वाभिमानवत्तदन्यत्वाभिमानः ॥९॥

जपाकुसुमादिसन्निधेरेकस्यापिस्फटिकस्य 'रक्तःस्फटिकः'

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

नीलः स्फटिकः, इत्यन्यत्वाभिमानोयथाभवति, तथा गन्धादि विषयसन्निधेस्तस्याबुद्धेर्नानात्वाभिमानोभवति ॥९॥

क्षणिकवाद्याह—

स्फटिकेऽप्यपरापरोत्पत्तेः क्षणिकत्वाद्व्यक्तीनामहेतुः ॥१०॥

अहेतुः = स्फटिकान्यत्वाभिमानवत्तदन्यत्वाभिमानइत्ययं हेतुर्नसंभवति, कस्मात्? व्यक्तीनां क्षणिकत्वात् = स्फटिकेऽपि दृष्टान्तीभूतेऽपरापरोत्पत्तेः = अन्यान्यस्फटिकव्यक्त्युत्पत्तेः॥१०॥

सिद्धान्तमाह—

नियमहेत्वभावाद्यथादर्शनमभ्यनुज्ञा ॥११॥

यत्सत् तत्क्षणिकमितिपदार्थमात्रस्यक्षणिकत्वनियमेहेत्व भावात् = प्रमाणासंभवात्, यथादर्शनं = योभावोयथादृश्यते तत्र तदनुसारेण, अभ्यनुज्ञा = क्षणिकत्व–स्थिरत्वादिकं स्वीकार्यमित्यर्थः। गन्धज्ञानंनष्टंरूपज्ञानमुत्पन्न मित्यादिदर्शनाद्बुद्धेः क्षणिकत्वसिद्धेऽपि नच स्फटिकस्य तत् सिध्यतीतिभावः ॥ ११ ॥

ननु यथा सच्छरीरं क्षणिकं तद्वत्स्फटिकोप्यस्तु तत्राह—

नोत्पत्तिविनाशकारणानुपलब्धेः ॥१२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

न=स्फटिकस्य क्षणिकत्वं न युज्यते कस्मात् ? स्फटिके शरीरवदुत्पत्तिविनाशकारणयोरनुपलम्भादित्यर्थः ॥१२॥

शङ्कते—

क्षीरविनाशेकारणानुपलब्धिवद् दध्युत्पत्तिवच्चतदुपपत्तिः ॥१३॥

क्षीरविनाशे दध्युत्पत्तौ च कारणानुपलब्धिवत्तदुत्पत्तिः यथोभयत्रानुपलभ्यमानमपिकिंचित्कारणं स्वीक्रियते, तथा स्फटिकेऽपि पूर्वं पूर्वं स्फटिकव्यक्तीनां विनाशकारणस्य—उत्तरोत्तरस्फटिकव्यक्तीनामुत्पत्तिकारणस्य च स्वीकारः कर्तव्यस्तस्मात्स्फटिकस्य क्षणिकत्वमुपपद्यते ॥१३॥

समाधत्ते—

लिङ्गतोग्रहणान्नानुपलब्धिः ॥१४॥

क्षीरविनाशे दध्युत्तौ च कारणानुपलब्धिर्न=न विद्यते, कस्मात् ? लिङ्गतोलीनमप्रत्यक्षमर्थंगमयतीलिङ्गमनुमानंतस्मात्तदुपलब्धेरित्यर्थः । दध्नः क्षीरविनाशस्य च प्रत्यक्षोपलम्भात्तत्कारणमनुमीयते, नत्वेवं स्फटिकविनाशोत्पादावुपलभ्येते येन तत्कारणमनुमीयेतेतिभावः ॥ १४ ॥

गुणपरिणामवादीकश्चिदाशंकते—

न-पयसः परिणामगुणान्तरप्रादुर्भावात् ॥१५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

नखल्वात्मेन्द्रियार्थसंनिकर्षमात्रस्यज्ञानोत्पत्तिकारणत्वमुपदिष्टं, किन्त्विन्द्रियमनःसन्निकर्षस्यापितथासत्युक्तरीत्यानयुगपदनेकज्ञेयोपलब्धिप्रसङ्गइतिभावः ॥२२॥

ननुमास्तुबुद्धेर्मनोगुणत्वमात्मगुणत्वेपिदोषएवेत्याह—

विनाशकारणानुपलब्धेश्चावस्थानेतन्नित्यत्वप्रसङ्गः॥२३॥

बुद्धेरात्मन्यवस्थानेस्थितौ,तद्विनाशकारणस्य = आश्रयनाशादेरनुपलब्धेरभावात्तस्याबुद्धेर्नित्यत्वप्रसंग इत्यर्थः॥२३॥

उक्तदोषंनिराकरोति—

अनित्यत्वग्रहाद्बुद्धेर्बुद्ध्यन्तराद्विनाशःशब्दवत् ॥२४॥

शब्दवत् = यथाकाशगुणस्यशब्दस्य स्वोत्तरवर्तिशब्दान्तराद्विनाशोभवति । तथापूर्वबुद्धेःस्वोत्तरवर्तिबुद्ध्यन्तराद्विनाशोभवतीतिकल्प्यते कस्मात्? अनित्यत्वग्रहात् = घटबुद्धिरुत्पन्नाविनष्टा च पटबुद्धिरित्येवंबुद्धेरनित्यत्वस्यग्रहणादित्यर्थः । तथाचतस्याआत्मगुणत्वेऽपिनित्यत्वप्रसंगोनास्तीतिभावः॥२४॥

यौगपद्यंवारयति—

ज्ञानसमवेतात्मप्रदेशसन्निकर्षान्मनसः स्मृत्युत्पत्तेर्नयुगपदुत्पत्तिः ॥२५॥

ज्ञानं = संस्कारकारणंसमवेतंयस्मिन् आत्मप्रदेशे,तेनमनसः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सन्निकर्षस्यस्मृत्युत्पत्तेः स्मृतिहेतुत्वात्तस्यचक्रमिकत्वान्नयुगपदुत्पत्तिःएकस्मिन्कालेसर्वस्मृतिबुद्धयुत्पत्तिर्नसंभवतीत्यर्थः॥२५॥

दूषयति—

नान्तःशरीरवृत्तित्वात् ॥२६॥

न = यदुक्तं तन्न युक्तं कस्मात् ? अन्तःशरीरवृत्तित्वात् मनसः शरीरमध्येवर्तमानत्वादित्यर्थः । नचान्तर्वर्तमानस्य-बाह्यविषयावच्छिन्नात्मप्रदेशेनसन्निकर्षःसम्पद्यतेइतिभावः॥२६॥

शंकते—

साध्यत्वादहेतुः ॥२७॥

अहेतुः = अन्तःशरीरवृत्तित्वादित्ययंहेतुर्नसंभवति,कस्मात्? साध्यत्वात् = संदिग्धत्वात् , सिद्धस्यैवहेतुत्वादित्यर्थः। मनसो ह्यन्तःशरीरवृत्तित्वं साध्यमेवनसिद्धमितिभावः ॥२७॥

समाधत्ते—

स्मरतः शरीरधारणोपपत्तेरप्रतिषेधः ॥२८॥

अप्रतिषेधः = साध्यत्वादितिहेतुप्रतिषेधोनयुक्तः कस्मात् स्मरतः स्मरणं कुर्वतः, शरीरधारणोपपत्तेः = शरीरधारणेन मनसोऽन्तःशरीरवृत्तित्वसिद्धेरित्यर्थः ॥२८॥

शंकते—

न-तदाशुगतित्वान्मनसः ॥२९॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

न = तत् = शरीरधारणं, मनसोऽबहिर्निर्गमनेऽप्यनुपपन्नं न संभवति, कस्मात् ? मनसोहिशीघ्रगतित्वाभ्युपगमात्, शीघ्रमेवतस्यशरीरेपरावृत्तिदर्शनात् ॥२९॥

समाधत्ते –

न-स्मरणकालानियमात् ॥३०॥

न = मनस आशुगतित्वाभ्युपगमेऽपि शरीरधारणं नसंभवति, कस्मात् ? स्मरणकालानियमात् = शीघ्रमेवसर्वं स्मर्यते इतिनियमस्यासंभवादित्यर्थः ॥३०॥

शरीराद्बहिरात्मप्रदेशेनमनःसन्निकर्षेदोषमाह –

आत्मप्रेरणयदृच्छाज्ञताभिश्च न संयोगविशेषः ॥३१॥

मनसोहिशरीराद्बहिर्भावेनिमित्तत्रयमेव संभवति, आत्मप्रेरणं यदृच्छा ज्ञता च, तत्रनतावत्प्रथमं, पदार्थस्यात्मप्रेरणसमयएवज्ञातत्वेनमनसोबहिर्गमनस्यव्यर्थत्वात् । न द्वितीयम्, यदृच्छाप्रवृत्तेरदर्शनात् । नापितृतीयं, मनसोज्ञातृत्वानभ्युपगमादितिभावः ॥३१॥

निराकरोति –

व्यासक्तमनसःपादव्यथनेनसंयोगविशेषेणसमानम् ॥३२

व्यासक्तमनसः = नृत्यादिकंपश्यतः, पादव्यथनेन = कण्टकादितःपादतलस्यपीड़नेन, यथामनःसंयोगोजायतेतथात्रहि-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

त्मप्रदेशेनापि मनः संयोगः संभवतीतिभावः ॥३२॥

स्मृतियौगपद्याभावमुपपादयति —

प्रणिधानलिङ्गादिज्ञानानामयुगपद्भावादयुगपत्स्मरणम् ॥३३

प्रणिधानं = चित्तैकाग्रता, लिंगादिज्ञानं = संस्कारोद्बोधकानां लिंगादीनां ज्ञानम्, तेषामयुगपद्भावात् = एकदाऽसंभवात्, अयुगपत्स्मरणं = युगपत्सर्वस्मरणापत्तिर्नास्ति ॥३३॥

ज्ञानस्यात्मगुणत्वं सिद्धान्तयति —

ज्ञस्येच्छाद्वेषौनिमित्तत्वादारम्भनिवृत्त्योः ॥३४॥

ज्ञस्य = बोद्धुरिच्छादयोगुणाभवन्ति कस्मात्? आरम्भनिवृत्त्योः = प्रवृत्तिनिवृत्त्योरिच्छाद्वेषजन्यत्वादिच्छाद्वेषौज्ञानजन्यौ ज्ञानं चात्मगुण इतिभावः ॥३४॥

शरीरचैतन्यवादी चार्वाकः शङ्कते —

तल्लिङ्गत्वादिच्छाद्वेषयोःपार्थिवाद्येष्वप्रतिषेधः ॥३५॥

पार्थिवाद्येषु = शरीरेन्द्रियेषु, इच्छाद्वेषयोरप्रतिषेधः = प्रतिषेधो नोपपद्यते, कस्मात्? इच्छाद्वेषयोस्तल्लिङ्गत्वात् = प्रवृत्तिनिवृत्तिलिङ्गकत्वादित्यर्थः। प्रवृत्तिनिवृत्ती शरीरादिषुप्रत्यक्षे तस्मादिच्छाद्वेषावपि तेषामेवगुणौ नात्मन इतिभावः ॥३५॥

समाधत्ते —

परश्वादिष्वारम्भनिवृत्तिदर्शनात् ॥३६॥

परश्वादिषु = कुठारादिषु, आरम्भनिवृत्तिदर्शनात् = प्रवृ-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

त्तिनिवृत्योरुपलम्भात्, प्रवृत्तिनिवृत्तिभ्यां शरीरचैतन्यं न सि-
ध्यतिपरश्वादिषुव्यभिचारादितिभावः ॥ ३६ ॥

चार्वाकमतदोषान्तरमाह—

नियमानियमौतुतद्विशेषकौ ॥३७॥

प्रवृत्तिनिवृत्त्योर्नियमानियमौतद्विशेषकौशरीरपरश्वादिभेदकौ भवतइत्यर्थः। शरीरादिष्वात्मप्रयोज्येषु नियमेनारम्भनिवृत्तीजन्येतेपरश्वादिष्वात्माप्रयोज्येषुननियमेनेतिभेदस्तस्मादात्मन्येवचैतन्यं न शरीरादिषु तेषु स्वयंप्रवृत्यादेरदर्शनादितिभावः॥

ननुमास्तांशरीरादीनामिच्छाद्वेषौमनसोभविष्यतस्तत्राह—

यथोक्तहेतुत्वात्पारतन्त्र्यादकृताभ्यागमाच्चनमनसः॥ ३८

मनसइच्छाद्वेषौगुणौनभवतः कस्मात् ? यथोक्तहेतुत्वात् ज्ञस्यारम्भनिवृत्योरिच्छाद्वेषजन्यत्वात्, पारतन्त्र्यात् = मनसः कुठारादिवत्करणत्वेनपरतन्त्रत्वात्, अकृतस्यकर्मणोभोगोऽभ्यागमस्तत्प्रसङ्गाच्चमनसाकृतस्यकर्मणः फलं जोवेन भुक्तंस्यादितिभावः ॥३८॥

उपसंहरति—

परिशेषात्यथोक्तहेतूपपत्तेश्च ॥३९॥

परिशेषात् = शरीरादिहेतुनिरासात्, यथोक्तहेतूपपत्तेश्च दर्शनस्पर्शनाभ्यामेकार्थग्रहणात्, इत्यादोनांहेतूनामात्मन्येवोपपन्नत्वाच्चेच्छादिकमात्मगुणइतिभावः ॥३९॥

स्मृतेरात्मगुणत्वमुपपादयति—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्मरणंत्वात्मनोज्ञस्वाभाव्यात् ॥४०।

स्मरणंतु=स्मृतिरपि, आत्मनोगुण एव कस्मात् ? ज्ञस्वाभाव्यात्=ज्ञातृत्वादित्यर्थः। ज्ञानसमानाधिकरणत्वात् स्मरणं ज्ञातृ धर्म एव नतु ज्ञानधर्मः ज्ञाताचात्मेतिभावः ॥ ४० ॥

ज्ञानस्यात्मगुणत्वं प्रसाध्यस्मृतिकारणान्याह—

प्रणिधाननिबन्धाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रितसम्बन्धानन्तर्य वियोगैकार्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्माधर्मनिमित्तेभ्यः ॥४१॥

प्रणिधानादिभ्यः सप्तविंशतिनिमित्तेभ्यः स्मृतिबुद्धिरुत्पद्यते इत्यर्थः । तत्र प्रणिधानं=चित्तैकाग्रयम्, निबन्धनं यथा वैशेषिके—द्रव्यगुणकर्मादीनामत्रचप्रमाणप्रमेयादीनाम् । अभ्यासः = दृढतरसंस्कारः, लिङ्गंयथाधूमोवन्हेः। लक्षणं चिन्हं, यथा कपिध्वजादि अर्जुनादेः । सादृश्यंदेहादेः । परिग्रहः=स्वीकारः । आश्रयः=यथाप्रजाधिपः प्रजायाः । आश्रितंयथा प्रजाप्रजाधिपस्य । सम्बन्धोगुरुशिष्यभावादिः। आनन्तर्यं=प्रोक्षणावघातादेः। वियोगोयथा स्त्रीपुत्रादेः । एककार्याः=यथाछात्राः । विरोधोयथाश्रीरामरावणयोः, श्रीकृष्णशिशुपालयोर्वा। अतिशयःसंस्कारउपनयनादिराचार्यस्मारकः। प्राप्तिर्धनादेः दातारंविक्रमभोजादिकंस्मारयति । व्यवधानंयथाखड्गादेःकोशादिकम् । सुखं दुखंच प्रसिद्धं ताभ्यांतत्कारणंस्मर्यते। इच्छाद्वेषौ=प्रसिद्धौ, ताभ्यां यमिच्छति यंच-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

द्वेष्टितस्यस्मरणम् । भीतिर्भयम् = भयहेतोःस्मारकम् । अर्थित्वंयथाभोजनार्थीभोजनंस्मरति । धर्माधर्माभ्यां = जन्मान्तरानुभूतसुखदुःखसाधनयोःस्मरणम् ॥४१॥

बुद्धेरात्मगुणत्वं प्रसाध्यतस्याः क्षणिकत्वमाह—

कर्मानवस्थायित्वग्रहणात् ॥४२॥

बुद्धेःकर्मवत् = क्रियावदनवस्थायित्वग्रहणात्क्षणिकत्वं सिध्यति । कर्मवदित्युपलक्षणं शब्दवत्सुखवदित्यपि द्रष्टव्यम् ॥४२॥

बुद्धेःक्षणिकत्वेदोषमाह—

अव्यक्तग्रहणमनवस्थायित्वाद् विद्युत्संपाते रूपाव्यक्तग्रहणवत् ॥४३॥

विद्युत्संपाते = तड़ित्प्रकाशे, यथारूपस्याव्यक्तमस्पष्टं ग्रहणं भवति विद्युत्प्रकाशस्यक्षणिकत्वात् , तद्वद्यदिबुद्धेरपिक्षणिकत्वं स्यात् , तदाबुद्ध्यावोद्धव्यस्यघटादेरपिग्रहणमव्यक्तं स्यान्नचैवं दृश्यते तस्मान्नक्षणिकाबुद्धिरपितुस्थिरा ॥४३॥

क्षणिकत्वेदोषाभावमाह—

हेतूपादानात्प्रतिषेद्धव्याभ्यनुज्ञा ॥४४॥

हेतूपादानात् = विद्युत्संपातरूपहेतुग्रहणात् , त्वयाप्रतिषेद्धव्यस्य = बुद्धिक्षणिकत्वस्य, अभ्यनुज्ञा = अनुमतिः प्राप्तेतितेवैपरीत्यमापन्नंबुद्धेश्चक्षणिकत्वं सिद्धमितिभावः ॥४४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सिद्धान्तयति—

प्रदीपार्चिः सन्ततयभिव्यक्तग्रहणवत्तद्ग्रहणम् ॥४५॥

यथाऽनवस्थायिनापिप्रदीपार्चिषाविषयस्याभिव्यक्तग्रहणं सम्भवति तथाऽनवस्थायिन्याबुद्धयापिविषयस्याभिव्यक्तग्रहणं सम्भवत्येवतस्मादनवस्थायिनीबुद्धिरितिसिद्धम्। तथाच वार्तिकम्—"व्यवस्थितं क्षणिकाबुद्धिरिति ॥४५॥

बुद्धिःशरीरगुण आहोस्विदात्मगुणइत्याह—

द्रव्येस्वगुणपरगुणोपलब्धेः संशयः ॥४६॥

द्रव्ये=शरीरे, स्वगुणस्यरूपादेः परगुणस्यचौष्ण्यादेरुपलब्धेर्दर्शनात्संशयः, किं शरीरे उपलभ्यमानाबुद्धिः शरीरगुण आहोस्विदात्मगुणः ॥४५॥

सिद्धान्तमाह—

यावच्छरीभावित्वाद्रूपादीनाम् ॥४७॥

शरीरधर्माणां=रूपादीनां यावच्छरीरभावित्वादवगम्यतेनशरीरगुणोबुद्धिरयावद्द्रव्यभावित्वादित्यर्थः। शरीरधर्मा रूपादयो मृतेऽप्युपलभ्यन्तेनचबुद्धिरितितदयावद्द्रव्यभावित्वमितिभावः॥४७॥

अत्रशंकते—

न पाकजगुणान्तरोत्पत्तेः ॥४८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

रूपादीनांयावच्छरीरभावित्वंनघटते,कस्मात्? पाकजगुणान्तरोत्पत्तेःघटादौश्यामादिगुणस्थाने रक्तादीनांपाकेनोत्पत्तेरित्यर्थः ॥४८॥

समाधत्ते –

प्रतिद्वन्द्विसिद्धेः पाकजानामप्रतिषेधः ॥४९॥

अप्रतिषेधः = रूपादीनांयावच्छरीरभावित्वप्रतिषेधो नोपपद्यते, कस्मात्? पाकजानांगुणानां प्रतिद्वंद्विसिद्धेःयथाघटे श्यामरक्तरूपयोः। बुद्धिविरोधिगुणः शरीरेनोपलभ्यते येनबुद्धिनाशः स्यादिति बुद्धेः शरीरगुणत्वे सदैवसोपलभ्येत नचोपलभ्यते इतिनबुद्धिःशरीरगुणइतिभावः ॥४९॥

अत्रैवहेत्वन्तरमाह –

शरीरव्यापित्वात् ॥५०॥

रूपादीनांशरीरव्यापित्वान्नशरीरगुणोबुद्धिर्यावच्छरीरव्यापित्वाभावेनशरीरैकदेशहृदयमात्रोऽव्यापित्वात्तस्या इतिभावः॥५०॥

शंकते –

न केशनखादिष्वनुपलब्धेः ॥५१॥

रूपादीनां शरीरव्यापित्वंनघटते, कस्मात्? केशनखादिषुशरीरसंबन्धिषुगौररूपानुपलम्भादित्यर्थः ॥५१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

समाधत्ते –

त्वक्पर्यन्तत्वाच्छरीरस्यकेशनखादिष्वप्रसङ्गः ॥५२॥

शरीरस्यत्वक्पर्यन्तत्वात्, केशनखादिषुअप्रसङ्गः शरीरावयवत्वंनास्ति, हस्तपादादिष्विव छिन्नेषुतेषुवेदनाऽदर्शनादितिभावः ॥५२॥

अत्रैवहेत्वन्तरमाह –

शरीरगुण वैधर्म्यात् ॥५३॥

शरीरगुणेभ्यो रूपादिभ्यो वैधर्म्यात् = वैलक्षण्यात्, बुद्धिर्नशरीरगुणः। वैधर्म्यंच – वहिरिन्द्रियावेद्यत्वेसतिमनसावेद्यत्वं बुद्धौवहिरिन्द्रियवेद्यत्वेसतिमनसाऽवेद्यत्वं रूपादिषु ॥५३॥

शंकते –

न-रूपादीनामितरेतरवैधर्म्यात् ॥५४॥

न = बुद्धेः शरीरगुणत्वप्रत्याख्यानंनोपपद्यते, कस्मात्? रूपादीनां = शरीरगुणानां, परस्परवैधर्म्यात्तथाचविधर्मणामपि-रूपादीनां यथाशरीरगुणत्वं, तथा विधर्मणोबुद्धेरपि शरीरगुणत्वं संभवतीतिभावः ॥५४॥

समाधत्ते –

ऐन्द्रियकत्वाद्रूपादीनामप्रतिषेधः ॥५५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अप्रतिषेधः – रूपादीनांशरीरगुणत्वप्रतिषेधोनयुक्तः कस्मात् ? रूपादीनामैन्द्रियकत्वात् = बाह्येन्द्रियग्राह्यत्वात्, रूपादयो हिपरस्परविरुद्धे न्द्रियग्राह्या अपि बहिरिन्द्रियग्राह्यत्वं नातिवर्तन्ते, बुद्धिस्त्वतिवर्ततेतस्मान्नशरीरगुणः किन्त्वात्मगुणः ॥५५॥

बुद्धिपरीक्षांसमाप्यमनसः परीक्षामारभते –

ज्ञानायौगपद्यादेकंमनः ॥५६॥

मनः प्रतिशरीरमेकंमन्तव्यं, कस्मात् ? ज्ञानायौगपद्यात् = इन्द्रियार्थसन्निकर्षेसत्यपि, एकस्मिन्क्षणे एकमेवज्ञानमुत्पद्यतेयतइतिभावः ॥५६॥

शंकते—

न-युगपदनेकक्रियोपलब्धेः ॥५७॥

न = प्रतिशरीरमेकंमनो न संभवतिकस्मात् ? अनेकक्रियोपलब्धेः = दीर्घशष्कुलीभक्षणसमये चाक्षुष-रासन-घ्राणज-स्पार्शनानामनेकेषां ज्ञानानामुपलम्भादित्यर्थः ॥५७॥

समाधत्ते –

अलातचक्रदर्शनवत्तदुपलब्धिराशुसंचारात् ॥५८॥

अर्धदग्धकाष्ठमलातं, तस्याशुसंचाराच्चक्रवद्दर्शनमुपलब्धिर्यथाभवतितथाशुसंचारान्मनसस्तदुपलब्धिर्युगपदनेकज्ञानोपलब्धिर्भवति नवस्तुतो येन मनो बहुत्वं सिध्येतेतिभावः॥५८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ननु किंपरिमाणं मनः तत्राह—

यथोक्तहेतुत्वाच्चाणु ॥५९॥

यथोक्तहेतुत्वात्=ज्ञानायौगपद्याद्धेतोरेव मनसः प्रतिशरीरमेकत्वमिवाणुत्वं सिध्यति। महत्वे तु सर्वेन्द्रियसंयोगादेकदा सर्वविषयग्रहणं स्यादिति न्यायभाष्यम्। कणादोऽप्याह—“तदभावादणु मनः (वै०२३।७।१।) अणु चापि द्विविधं नित्यमनित्यं च नित्यं परमाणु मनःसु, इति प्रशस्तपादभाष्यम् ॥५८॥

मनःपरीक्ष्य शरीरोत्पत्तिमाह—

पूर्वकृतफलानुबन्धात्तदुत्पत्तिः ॥६०॥

पूर्वस्मिन् जन्मनि कृतस्य=यागदानहिंसादेः, फलस्य=धर्माधर्मरूपस्य, अनुबन्धात्संबन्धात्, तस्य=शरीरस्योत्पत्तिर्भवतीत्यर्थः। नहि सर्वेषामेकप्रकारकं शरीरं भवति उत्कृष्टनिकृष्टत्वादिभेदात्। तत्र कारणं कर्मणोऽन्यन्न संभवति। तथा च सांख्यसूत्रम्—“कर्मवैचित्र्यात्सृष्टिवैचित्र्यम् (६।४१।) कर्म=धर्माधर्माविति सांख्यभाष्यम्। शंकराचार्यैरपि शारीरकभाष्ये—“सृष्टिवैषम्ये किं बीजमिति चेत्, धर्माधर्माविति गृहाणेत्युक्तम् ॥६०॥

अत्र नास्तिकमाह—

भूतेभ्यो मूर्त्युपादानवत्तदुपादानम् ॥६१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यथा कर्मनिरपेक्षेभ्य एव स्थूलभूतेभ्यः पाषाणादिमूर्तय उत्पद्यन्ते तथा कर्मनिरपेक्षेभ्यएवभूतेभ्यस्तत् = तस्यशरीरस्योपादानमुत्पत्तिर्भवति न तत्र कर्मणोहेतुत्वमितिभावः॥६१॥

सिद्धांतीनिराकरोति –

न-साध्यसमत्वात् ॥६२॥

न = कर्मनिरपेक्षभूतेभ्यः पाषाणादिमूर्तयोनस्संभवन्ति कस्मात्? साध्यसमत्वात् = कर्मनिरपेक्षभूतकृतेतिदृष्टान्तस्यसाध्यसमत्वात्संदिग्धत्वादितिभावः ॥६२॥

नोत्पत्तिनिमित्तत्वान्मातापित्रोः ॥६३॥

न = शरीरोत्पत्तिःकेवलभूतेभ्यो न संभवति, कस्मात्? मातापित्रोः = मातापितृ लोहितरेतसोरपि शरीरोत्पत्तिनिमित्तत्वात्। अन्यथा शुक्रशोणिते विनापि शरीरमुत्पद्येतेतिनशरीरोत्पत्तौमूर्तिदृष्टान्तोयुक्तो वैषम्यादितिभावः ॥६३॥

शरीरोत्पत्तौहेत्वन्तरमाह –

तथाऽऽहारस्य ॥६४॥

मातापितृशुक्रशोणितवदाहारस्य = मात्राभुक्तपीतपदार्थस्यापिशरीरोत्पत्तौनिमित्तत्वमस्तितस्य शरीरवर्धकत्वात्॥६४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विपक्षेबाधकमाह—

प्राप्तौचानियमात् ॥ ६५॥

मातापितृशुक्रशोणितयोर्गर्भाशये प्राप्तौ सत्यामपि सन्तानोत्पत्तेरवश्यभावानियमात्कर्मसापेक्षत्वं सिध्यति । कर्मनिरपेक्षत्वेतु तदा सन्तानरहितत्वं कस्यापिनस्यात् ॥६५॥

उपसंहरति—

शरीरोत्पत्तिनिमित्तवत्संयोगोत्पत्तिनिमित्तंकर्म ॥६६॥

यथा शरीरोत्पत्तौ निमित्तमदृष्टंकर्म, तथा स्त्री-पुरुषयोः संयोगोत्पत्तिनिमित्तमप्यदृष्टंकर्मैव सत्यदृष्टे गर्भाधानहेतुः संयोगो भवति नान्यथा ॥ ६६ ॥

एतेन नियमः प्रत्युक्तः ॥ ६७ ॥

एतेन=शरीरोत्पत्तौ कर्मणोनिमित्तत्वकथनेन, सर्वशरीराणामेकरूपतानियमोऽपि प्रत्युक्तः=प्रत्याख्यातोवेदितव्यः । कस्यचिदुच्चकुलेजन्म कस्यचिन्निकृष्टकुलेजन्मेतियोऽयंजन्मभेदः सकर्मभेदादुपपद्यते नान्यतोहेतोरितिभावः ॥ ६७ ॥

तददृष्टकारितमितिचेत्पुनस्तत्प्रसङ्गोऽपवर्गे ॥६८॥

तत्=तेषांभूतानांयददृष्टं तेन कारितं=सम्पादितं, शरीरमितिचेत्= यदिमन्यसे, तदाऽपवर्गे = मोक्षानन्तरमपितत्प्र-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सङ्गः = शरीरप्रसङ्गः स्याभूतानांनित्यत्वान्नरकरितुरगादिशरीरोपग्रहेविनिगमकंचकिमपिनस्यात् ॥६८॥

मनः कर्मनिमित्तत्वाच्च संयोगाविच्छेदः ॥६९॥

जैनमते-शरीरसंयोगोमनोवृत्यदृष्टनिमित्तकस्तत्रमनोगुणस्यादृष्टस्यनित्यत्वेननिवृत्यसंभवात्संयोगाविच्छेदः = मनः शरीरसंयोगस्यविच्छेदोनस्यादितिमरणानुपपत्तिरितिभावः ॥६९॥

नित्यत्वप्रसङ्गश्चप्रायणानुपपत्तेः ॥७०॥

प्रायणस्य = मरणस्यानुपपत्तेरसिद्धेः, शरीरादेर्नित्यत्वस्य अविनाशित्वस्य प्रसङ्ग स्तथाचमोक्षानुपपत्तिरितिभावः ॥७०॥

आक्षिपति—

अणुश्यामतानित्यत्ववदेतत्स्यात् ॥७१॥

यथा-परमाणु श्यामतानित्याप्यग्निसंयोगान्नश्यति नचपुनरुत्पद्यते । तथैतत् = मनःशरीरसंयोगस्यनित्यत्वेऽपिविनाशो भविष्यति नचमोक्षेसतिपुनरुत्पत्स्यते ॥७१॥

सिद्धान्तयति—

नाकृताभ्यागमप्रसङ्गात् ॥७२॥

न = जैनमतंनयुक्तं, कस्मात् ? अकृताभ्यागमप्रसङ्गात् =

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

मनसोनित्यादृष्टाच्छरीरसंबंधोपगमेऽकृतात्स्वयमकृतात्कर्मणोऽभ्यागमः फलसंबन्धः स्यादात्मनः । तस्मादद्भूतादृष्टनिमित्तोयथाशरीरारम्भोनमन्तव्यस्तथैवमनोनिष्ठादृष्टनिमित्तोमनःशरीरसंयोगोपिनमन्तव्यइतिभावः ॥७२॥

॥ इतिन्यायसूत्रवृत्तौतृतीयाध्यायवृत्तिः समाप्ता ॥

॥ अथचतुर्थोऽध्याये ॥

प्रथमाह्निकम् ।

क्रमप्राप्तांप्रवृत्तिं परीक्षयितुमाह—

प्रवृत्तिर्यथोक्ता ॥१॥

प्रवृत्तिः = "प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः" इतिसूत्रेयथोक्ता तथैवपरीक्षिता, नचतत्रकश्चिदंशः संशय्यतेइतिभावः ॥१॥

तथादोषाः ॥२॥

"प्रवर्तनालक्षणादोषाः,इत्यत्रसूत्रेदोषाअपितथैवपरीक्षिताः तत्रापि न कश्चित्संशयःसंशयपूर्विकाहिपरीक्षेतिभावः॥२॥

ननुकतिदोषाः तत्राह—

तत्त्रैराश्यं रागद्वेषमोहार्थान्तरभावात् ॥३॥

तत् = तेषांदोषाणां, त्रैराश्यं = त्रयः पक्षाः सन्ति, कस्मात्

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

रागद्वेषमोहार्थान्तरभावात्। तत्ररागपक्षः—कामोमत्सरः स्पृहा तृष्णा लोभो माया दम्भ इति। द्वेषपक्षः क्रोधईर्ष्या असूया द्रोहोऽमर्षोऽभिमानइति। मोहपक्षः — विपर्यय संशय तर्कमान प्रमादभयशोकाइति। लक्षणान्येषां विश्वनाथवृत्तौ, वैदिकवृत्तौ-चकृतानितत्रैवद्रष्टव्यनीत्यलंपिष्टपिष्टया ॥३॥

शंकते—

नैकप्रत्यनीकभावात् ॥४॥

न = रागद्वेषमोहाः परस्परं भिन्नान, कस्मात्? एकप्रत्यनीकभावात् = एकेन पदार्थतत्वज्ञानेननाश्यत्वादित्यर्थः। ज्ञातेपदार्थतत्वज्ञानेनमोहोऽवतिष्ठतेनरागद्वेषावितिभावः ॥४॥

समाधत्ते—

व्यभिचारादहेतुः ॥५॥

रागादीनामभेदे य एकप्रत्यनीकत्वंहेतुरुक्तःसोऽहेतुरसद्धेतुरित्यर्थः कस्मात्? व्यभिचारात् = अनैकान्तिकत्वादित्यर्थः। रूपादयोह्येकेनपाकेन निवर्त्यन्ते भिद्यन्तेचेतिव्यभिचारः ॥५॥

ननुत्रिषुकः प्रथमं निवर्त्यः तत्राह —

तेषांमोहः पापीयान् नामूढस्येतरोत्पत्तेः ॥६॥

तेषां = रागद्वेषमोहनां मध्ये, मोहः पापीयानतिशयेनपापः प्रबलः कस्मात्? अमूढस्य = मोहरहितस्य, नेतरोत्पत्तेः = रागद्वेषयोरभावादित्यर्थः ॥६॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शंङ्कते –

निमित्तनैमित्तिकभावादर्थान्तरभावो दोषेभ्यः ॥७॥

रागादिदोषेभ्योमोहस्यार्थान्तरभावः = भिन्नार्थत्वंप्राप्तं कस्मात् ? निमित्तं कारणंमोहः नैमित्तिकोकार्यौ रागद्वेषौ तेषां भावस्तस्मात्कार्यकारणभावादित्यर्थः।कार्यकारणयोर्भेदःस्पष्टः, अन्यद्धिनिमित्तमन्यच्च नैमित्तिकमितिभाष्यात् ॥७॥

समाधत्ते –

नदोषलक्षणावरोधान्मोहस्य ॥८॥

मोहस्य दोषेभ्योऽर्थान्तरभावोनसंभवति, कस्मात् दोषलक्षणावरोधात्प्रवृत्तिजनकत्वरूपदोषलक्षणस्यात्रापिसत्त्वत्॥८॥

मोहस्य दोषकारणत्वेऽपिदोषत्वोपपत्तिमाह –

निमित्तनैमित्तिकोपपत्तेश्चतुल्यजातीयानामप्रतिषेधः॥९॥

अप्रतिषेधः = मोहस्यदोषत्वप्रतिषेधोनोपपद्यते, कस्मात् ? तुल्यजातीयानां = समानजातीयानामपि निमित्तनैमित्तिकभावोपपत्तेः:कार्यकारणभावसंभवादित्यर्थः। घटपटादीनांदण्डादीनां चद्रव्यत्वरूपसमानजातीयत्वेऽपिकार्यकारणभावदर्शनात् ॥९॥

दोषपरीक्षां समाप्य प्रेत्यभावंपरीक्षितुमाह –

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

आत्मनित्यत्वे प्रेत्यभावसिद्धिः ॥१०॥

आत्मनः पूर्वोक्तयुक्त्या नित्यत्वे = सिद्धे सति, प्रेत्यभाव स्तस्य सिध्यति । पूर्वशरीरं त्यक्त्वा शरीरान्तरग्रहणं प्रेत्यभावः सचात्मनो नित्यत्व एव संभवति नान्यथेतिभावः ॥१०॥

शरीरोत्पत्तिप्रकारमाह—

व्यक्ताद्व्यक्तानांप्रत्यक्षप्रामाण्यात् ॥११॥

व्यक्तानां = शरीरादीनां, व्यक्ताद्भूतपदार्थादुत्पत्तिर्भवति । कस्मात् ? प्रत्यक्षप्रामाण्यात् = प्रत्यक्षप्रमाणसिद्धत्वादित्यर्थः। यथाव्यक्ताद् बीजादेर्व्यक्तस्याङ्कुरस्यमृदादेश्च घटादीनामुत्पत्ति र्दृश्यते तथा शरीरस्यापि शुक्रशोणितादिभ्यो बोध्या, शरीरोत्पत्तिक्रमोयाज्ञवल्क्यस्मृतौ "प्रथमेमासि संक्लेदभूतोधातुविमूर्छित मासि पिण्डंद्वितीयेतुतृतीयेऽङ्गेन्द्रियैर्युतः इत्यादौद्रष्टव्यः" ॥११

नघटाद्घटानिष्पत्तेः ॥१२॥

न = व्यक्ताद्व्यक्तस्योत्पत्तिर्नसंभवति, कस्मात् ? व्यक्ताद् घटाद् व्यक्तस्य घटस्योत्पत्तेरभावादित्यर्थः ॥१२॥

समाधत्ते—

व्यक्ताद्घटनिष्पत्तेरप्रतिषेधः ॥१३॥

अप्रतिषेधः = व्यक्ताद्व्यक्तोत्पत्तेः प्रतिषेधोनोपपद्यते, कस्मात् ? व्यक्तात् = कपालद्वयात् व्यक्तस्य घटस्य निष्पत्तेरुत्पत्ति दर्शनादित्यर्थः ॥ ॥१३॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शून्यवादी शंकते—

अभावाद्भावोत्पत्तिर्नानुपमृद्यप्रादुर्भावात् ॥१४॥

अभावात् = असतः, भावोत्पत्तिः = सदुत्पद्यते, कस्मात् ? अनुपमृद्य = बीजादेर्विनाशंविना, न प्रादुर्भावात् = अंकुराद्युत्पत्तेरसंभवादित्यर्थः तस्मादसतःसज्जायतेनसतःसदितिभावः॥१४

समाधत्ते –

व्याघातादप्रयोगः ॥१५॥

नानुपमृद्यप्रादुर्भावादित्यप्रयोगः = वक्तुंनशक्यते, कस्मात्? व्याघातात् = उपमर्दकस्यांकुरस्य बीजात् पूर्वमसत्त्वेन बीजाद्युपमर्दकत्वासंभवात्सत्वेच प्रादुर्भावायोगादित्यर्थः ॥१५॥

पुनःशँकते –

नातीतानागतयोःकारकशब्दप्रयोगात् ॥१६॥

न = व्याघातदोषोनसंभवति, कस्मात् ? अतीतानागतयोः अतीते भूतेऽनागतेभविष्यत्यर्थे च कारकशब्दप्रयोगात् = कर्तृकर्मादिबोधकशब्दप्रयोगादित्यर्थः । यथालोकेऽनुत्पन्नेऽपिपुत्रेपितावदति = एतत्कार्यंमेपुत्रःकरिष्यति, तथाप्रकृतेऽप्यनुत्पन्नस्यांकुरादेर्बीजाद्युपमर्दकर्तृत्वमितिभावः॥१६॥

समाधत्ते –

न विनष्टेभ्योऽनिष्पत्तेः ॥१७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

न = अभावाद्भावोत्पत्तिर्नसंभवति, कस्मात् ? विनष्टेभ्यो वीजादिभ्यःकारणेभ्योऽनिष्पत्तेरङ्कुरादिकार्याणामुत्पत्तेरभावादित्यर्थः। विद्यमानानि हि कारणानिकार्यमुत्पादयन्ति, न विनष्टानि तस्मान्नाभावाद्भावोत्पत्तिः संभवति किन्तुभावादितिभावः१७

ननुवीजोपमर्दंसतिभावाद्भावोत्पत्तिः कथंयुज्यते तत्राह –

क्रमनिर्देशादप्रतिषेधः ॥१८॥

अप्रतिषेधः = भावाद्भावोत्पत्तेःप्रतिषेधोनसंभवति कस्मात् क्रमनिर्देशात् = प्रत्येकस्मिन्वीजेद्वे दलेभवतः । तयोश्चसंयोगः पूर्वावस्था। भूमिसलिलसंयोगादूमध्यतोविभागःपरावस्था। तयोश्चपौर्वापर्यंक्रमएवतदुपमर्दो नच नाशःतस्माद्भावाद्भावोत्पत्तिःसंभवतिनचदुष्यतीतिभावः ॥१८॥

मतान्तरमाह –

ईश्वरः कारणंपुरुषकर्माफल्यदर्शनात् ॥१९॥

क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः कारणं अधिष्ठातृकारणमुच्यते, कस्मात् ? पुरुषकर्माफल्यदर्शनात् पुरुषकर्मणोहिवैफल्यमपिदृश्यते, तस्मात्सहकार्यन्तरमवश्यंवाच्यंसचसर्वज्ञःसर्वशक्तिमानीश्वरएव तथाचसांख्यसूत्रं--सहिसर्ववित् सर्वकर्तेति।"फलमत उपपत्तेः, इतिवेदान्तसूत्रंच ॥१९॥

शंकते –

नपुरुषकर्माभावेफलानिष्पत्तेः ॥२०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

न = ईश्वरः कारणं न, कस्मात् ? पुरुषकर्माभावे फलानिष्पत्तेः = सुखदुःखरूपफलप्राप्तेरसंभवादित्यर्थः। नहिपुरुषकर्माभावेकथमपीश्वरो विलक्षणमिदंजगत्कर्तुं प्रभवति वैषम्यनैर्घृण्य दोषात् ,तस्माकर्मणा जगत्कारणत्वं नखल्वीश्वरस्येतिभावः॥२०॥

समाधत्ते—

तत्कारितत्वादहेतुः ॥२१॥

अहेतुः = पुरुषकर्माभावेफलानिष्पत्तेरितिहेतुर्नयुक्तः कस्मात् ? तत्कारितत्वात् = कर्मणोपीश्वरकारितत्वादित्यर्थः। जगदुत्पत्तौनिमित्तमात्रंभवदपिपुरुषकर्म,नकर्तृ भवितुमर्हति.जड़त्वात् । जगतांपतिरीश्वरस्तुसर्वंकर्तुं शक्नोतिस्वतन्त्रत्वात् ॥२१॥

स्वभाववादिमतमाह –

अनिमित्ततोभावोत्पत्तिःकण्टकतैक्ष्ण्यादिदर्शनात् ॥२२॥

भावोत्पत्तिः = घटपटादि कार्योत्पत्तिः,अनिमित्ततोनिमित्त कारणं विनैवभवति, कस्मात् ? कण्टकतैक्ष्ण्यादिदर्शनात् = कारणंविनापिकण्टकतैक्ष्ण्यमयूरचित्राद्युत्पत्तिवदित्यर्थः:उक्तंच-केनशुक्लीकृताःहंसामयूराः केनचित्रिताः । स्वभावेनेति ॥२२॥

छलेन समाधत्ते –

अनिमित्तनिमित्तत्वान्नानिमित्ततः ॥२३॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अनिमित्तत: =विनानिमित्तं भावोत्पत्तिर्नभवितुमर्हति । कस्मात् ? अनिमित्तनिमित्तत्वात् =अनिमित्तस्यैवतत्रनिमित्तत्वादित्यर्थः । अनिमित्तस्यनिमित्तत्वान्नानिमित्ताभावोत्पत्तिरिति भाष्यम् ॥२३॥

वास्तवंसमाधानमाह—

निमित्तानिमित्तयोरर्थान्तरभावादप्रतिषेधः ॥२४॥

निमित्तानिमित्तयोरर्थान्तरभावात् =परस्परंभेदात्, अप्रतिषेधः =अनिमित्तस्य निमित्तत्वं नसंभवति । तथाच कार्योत्पत्तिरनिमित्ता सिध्यति नेश्वरस्यकारणत्वमितिभावः ॥२४॥

सर्वानित्यत्ववादमाह –

सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वात् ॥२५॥

सर्वं =भावमात्र मनित्यं =विनाशि,कस्मात् ? उत्पत्तिविनाशधर्मकत्वात् =उत्पत्तिविनाशधर्माश्रयत्वादित्यर्थः। उत्पत्तिमतोविनाशधर्मकत्वादितिविश्वनाथः। उत्पत्तिविनाशरहितं चकिमपिन दृश्यतेऽतिसर्वस्यानित्यत्वंसिद्धमितिभावः ॥२५॥

समाधते –

नानित्यतानित्यत्वात् ॥२६॥

न =सर्वस्यानित्यत्वं न संभवति, कस्मात् ? अनित्यतानित्यत्वात =सर्वानुगताया अनित्यताया नित्यत्वादित्यर्थः ॥२६॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शङ्कते—

तदनित्यत्वमग्नेर्दाह्यं विनाश्यानुविनाशवत् ॥२७॥

तत् = तस्या अनित्यताया अनित्यत्वमेव । यथाग्नेः दाह्यमिन्धनादिकंविनाश्यदग्ध्वा विनाशोभवति, तथाऽनित्यतापि सर्वंविनाश्य स्वयमपिविनश्यतीतिनकस्यापिनित्यत्वम् ॥२७॥

समाधत्ते—

नित्यस्याप्रत्याख्यानं यथोपलब्धिव्यवस्थानात् ॥२८॥

नित्यस्य = नित्यत्वस्याप्रत्याख्यानं = प्रत्याख्यानं न संभवति कस्मात् ? यथोपलब्धि = उपलब्ध्यनुसारेण, व्यवस्थानात् = नित्यानित्यत्वयोर्व्यवस्थायाः संभवादित्यर्थः । यत्खलु प्रमाणेनोत्पत्तिविनाशधर्मकमुपलभ्यते तदनित्यं यथा घटादि । यच्चन तथातन्नित्यंयथात्मादि । तस्मान्नित्यपदार्थस्यप्रत्याख्यानासंभवात्सर्वमनित्यमित्ययुक्तं भाषणम् ॥२८॥

सर्वनित्यत्वमतमाह—

सर्वं नित्यं पञ्चभूतनित्यत्वात् ॥२९॥

सर्वं = गोघटादिकं, नित्यं, कस्मात् ? पञ्चभूत नित्यत्वात् पंचानां पृथिव्यादिभूतानां नित्यत्वात्तद्विकारात्मकमपिसर्वंनित्यमेवेतिभावः तत्र सततभावो नित्यत्वंबोध्यम् ॥२९॥

दूषयति—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

नोत्पत्तिविनाशकारणोपलब्धेः ॥३०॥

न = सर्वनित्यत्वं न सम्भवति, कस्मात् ? गोघटादीनामुत्पत्तिविनाशयोः कारणस्योपलब्धेःप्रत्यक्षत्वादित्यर्थः। यच्चोत्पद्यते विनश्यतिचनतन्नित्यमितिभावः ॥३०॥

आक्षिपति—

तल्लक्षणावरोधादप्रतिषेधः ॥३१॥

अप्रतिषेधः = सर्वनित्यत्वप्रतिषेधोनयुक्तः कस्मात् ? तल्लक्षणावरोधात् = सर्वस्य गोघटादेः भूतलक्षणाक्रान्तत्वात्, भूतानांपृथिव्यादीनामुत्पत्तिविनाशयोरभावान्नित्यत्वम् ॥३१॥

दूषयति—

नोत्पत्तितत्कारणोपलब्धेः ॥३२॥

न = सर्वनित्यत्वंनसम्भवति कस्मात् ? गोघटादीनामुत्पत्तेर्विनाशस्यतत्कारणस्य च प्रत्यक्षेणोपलम्भादित्यर्थः ॥३२॥

ननूत्पत्तितत्कारणोपलब्धिर्भ्रान्तिः स्यात्तत्राह—

न व्यवस्थानुपपत्तेः ॥३३॥

न = उत्पत्तितत्कारणोपलब्धिर्भ्रान्तिर्नसम्भवति कस्मात् ? "इदंकार्यकारणमिदमितिलोकसिद्धायाव्यवस्थायाअनुपपत्तेरसिद्धेः तथाचायुक्तः सर्वनित्यत्वाभ्युपगमइतिभाव ॥३३॥

बौद्धस्यसर्वपृथक्त्वप्रकरणमाह—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सर्वं पृथक् भावलक्षणपृथक्त्वात् ॥३४॥

सर्वं = गोघटादिकं, पृथक् = नाना, कस्मात् ? भावलक्षण पृथक्त्वात् = भावलक्षणानां = पदार्थावयवानांपृथक्त्वात् = नानात्वात ,अवयवसमुदायस्यैवगोघटादिपदार्थत्वादितिभावः ॥३४

दूषयति—

नानेकलक्षणैरेकभावनिष्पत्तेः ॥३५॥

न = सर्वंपृथक् न सम्भवति कस्मात् ? अनेकलक्षणैः नानावयवैरेकस्यावयविनोघटादेरुत्पत्तिसम्भवादित्यर्थः। अवयवावयविनोश्चभेदः स्पष्टएव,तथाचवार्तिकम्--"गुणव्यतिरिक्तो गुणी, अवयवव्यतिरिक्तश्चावयवीति ॥३५॥

अवयविनः सद्भावे हेत्वन्तरमाह—

लक्षणव्यवस्थानादेवाप्रतिषेधः ॥३६॥

अप्रतिषेधः = एकस्यावयविनः प्रतिषेधो न सम्भवति, कस्मात् ! लक्षणव्यवस्थानात् = यंघटमद्राक्षंतं स्पृशामीत्यादौ,यंतमित्याद्येकवचनमेकस्यावयविनोवाचकमितिलक्षणस्य = वाचकशब्दस्यव्यवस्थासम्भवादेकोऽवयवी ननानेतिभावः ॥३६॥

बौद्धस्य शून्यतावादमाह—

सर्वमभावोभावेष्वितरेतराभावसिद्धेः ॥३७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सर्वं = गोघटादिकमभावः = शून्यमेव, कस्मात्? प्रत्येकभावेषु = घटादिषु, इतरेतराभावसिद्धेः = घटः पटो नेत्यादिप्रतीत्या सर्वेषामभावत्वसिद्धेरित्यर्थः ॥३७॥

शून्यतावादेदोषमाह –

न स्वभावसिद्धेर्भावानाम ॥३८॥

न = सर्वमभावो न संभवति कस्मात्? भावानां = गोघटादीनां स्वभावसिद्धेः = स्वरूपस्य विद्यमानत्वात्, यस्य च स्वरूपं विद्यते न तदभावो भवितुमर्हति । निःस्वरूपस्यैव खपुष्पादेरभावत्वं भवात्तथा चोक्तं वाक्यपदीये – "नाभावो जायते भावो नैति भावोऽनुपाख्यतामिति ॥३८॥

पुनः शंकते –

न स्वभावसिद्धेरापेक्षिकत्वात् ॥३९॥

भावानां स्वभावेन सिद्धिर्न = न भवति कस्मात्? आपेक्षिकत्वात् = परसापेक्षत्वात्, यच्च सापेक्षं तत्सर्वमवास्तवं दृष्टं यथा जपाकुसुमापेक्षं स्फटिकलौहित्यमिति तथा च सिद्धं सर्वमभाव इति ॥३९॥

समाधत्ते —

व्याहतत्वादयुक्तम् ॥४०॥

गोघटादीनां भावानां परसापेक्षत्वमयुक्तं = न संभवति कस्मात्?

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

व्याहतत्वात्=परसापेक्षत्वस्यान्योन्याश्रयदोषेणदुष्टत्वात्तस्माद् युक्तंभावानामापेक्षिकत्वंतथाचसिद्धं नसर्वमभावइतिभावः ॥४०॥

वेदान्ताभिमतसंख्यैकान्तवादंदूषयति—

संख्यैकान्तासिद्धिःकारणानुपपत्त्युपपत्तिभ्याम् ॥४१॥

एकमेवाद्वयमितिश्रुतेःसर्वंप्रपंचजातमेकमेककारणकत्वादिति द्वैतनिषेधःसंख्यैकान्तस्तस्यासिद्धिः=सिद्धिर्नभवति, कस्मात्? कारणस्य=निःसहायस्यानुपपत्तेःससहायस्यचोपपत्तेः ॥४१॥

संख्यैकान्तवादीशङ्कते—

न कारणावयवभावात् ॥४२॥

न=संख्यैकान्तासिद्धिर्नभवति, कस्मात्? कारणावयवभावात्=एकंकारणंतदवयवानांभावःसद्भावस्तस्मादित्यर्थः । निःसहायस्यतस्य कारणस्य बहवोऽवयवाः सन्ति सत्सुतेषुनतस्य किंचिदनुपपन्नयन्नकर्तुं शक्नुयादितिभावः ॥४२॥

सिद्धान्तीसमाधत्ते—

निरवयवत्वादहेतुः ॥४३॥

उक्तोहेतुर्नयुक्तःकस्मात्? निरवयवत्वात्=कारणस्यनिरवयवत्वनियमादित्यर्थः । निरवयवस्य निःसहायस्य च तस्य कारणत्व मनुपपन्नं,ससहायेचतस्मिन्नेकत्वाभावस्तस्मान्नद्वैत

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

निषेधःसम्भवतीतिभावः । एषखलुसंख्यैकान्तवादःषोड़शपदार्थसिद्धयर्थंनिराकृत इतिप्रसन्नपदाकारःसुदर्शनाचार्यः॥४३॥

प्रेत्यभावानन्तरंफले परीक्षणीयेसंशयमाह –

सद्यः कालान्तरे च फलनिष्पत्तेः संशयः ॥४४॥

पाकादिक्रियायाः सद्योझटिति, कृष्यादिकर्मणः कालान्तरे फलनिष्पत्तेः = फलस्य भोजनसस्यादेःदर्शनात्संशयः = किमग्निहोत्रादेः हिंसादेर्वा फलंसद्योभवति कालान्तरेवाभवति ॥४४॥

सिद्धान्तयति—

न सद्यः कालान्तरोपभोग्यत्वात् ॥४५॥

अग्निहोत्रादिकर्मणोहिंसादिकर्मणोवा फलं सद्यो न भवति कस्मात् ? कालान्तरोपभोग्यत्वात् = कालान्तरे = देहत्यागानन्तरं, स्वर्गनरकयोरुपभोग्यत्वादित्यर्थः । 'अत्युग्रपुण्यपापानामिहैव फलमश्नुते, इतित्वन्यदेतत् ॥ ४५ ॥

अत्रशंकते—

कालान्तरेणानिष्पत्तिर्हेतुविनाशात् ॥ ४६ ॥

कालान्तरेण = कालान्तरेऽपि, अनिष्पत्तिः = फलनिष्पत्तिर्नयुज्यते कस्मात् ? फलहेतुकर्मणोऽग्निहोत्रादेर्हिंसादेर्वा विनाशात् = विनष्टत्वादित्यर्थः । 'न खलु विनष्टात्कारणात् किंचिदुत्पद्यते इतिभाष्यम् । कुसुमाञ्जलिकारश्चाह— 'चिरध्वस्तं फला

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

याल्लं न कर्मातिशयं विना ॥ ४६ ॥

समाधत्ते—

प्राङ्निष्पत्तेर्वृक्षफलवत् तत् स्यात् ॥ ४७ ॥

फलनिष्पत्तेः प्राग् विनष्टादपिमूलसेकादि-कर्मणो वृक्ष फलंभवति तथा प्रकृतेऽपि स्वर्गादिफलनिष्पत्तेः प्राग् विनष्टा-दप्यग्निहोत्रादिकर्मणःतत् = स्वर्गादिफलंस्याद्भविष्यति॥४७॥

ननुकार्यकारणभावएवनयुज्यते इत्याशंकते—

नासन्नसन्नसदसत् सदसतोर्वैधर्म्यात् ॥४८॥

निष्पत्तेः प्राक् फल मसत् न संभवति, असत उत्पत्तौ शशविषाणादेरप्युत्पत्तिः स्यात्स्याच्च सिकतादिषुतैलम् । नवा सत्संभवति सत उत्पत्यसंभवात् । अतएव सदसदपि न संभ-वति सदसतोर्वैधर्म्यात्परस्परंविरोधात् ॥ ४८ ॥

सिद्धान्तमाह—

उत्पादव्ययदर्शनात् ॥ ४९ ॥

निष्पत्तेः प्राक् फलं सदसत् कस्मात् ? उत्पादव्ययदर्शनात् यद्युत्पत्तेः प्राक् फलमसत्स्यात् न कदाचिदुत्पद्येत । सच्चेत् नकदाचिद्विनश्येत । भवति च प्रतिपत्तिरिदानींपटउत्पन्नइदानीं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पटोविनष्टस्तस्मादुत्पत्तेः प्राङ् नासन्नसत् किन्तुसदसत् ॥४९॥

प्रागुत्पत्तेः फलासत्वं समाधत्ते—

बुद्धिसिद्धं तु तदसत् ॥५०॥

तत्फलं प्रागुत्पत्ते रसत् बुद्धिसिद्धं = प्रमाणसिद्धमेव, इहतन्तुषुपटोभविष्यतीतिज्ञात्वातन्तुवायप्रवृत्तिदर्शनान्न पटोऽस्तीतिज्ञात्वा ॥ ५० ॥

ननुवृक्षफलवदितिदृष्टान्तो न युज्यते इतिशंकते—

आश्रयव्यतिरेकात् वृक्षफलवदित्यहेतुः ॥ ५१ ॥

वृक्षफलवदित्यहेतुः कस्मात् ? आश्रयव्यतिरेकात् = येन शरीरेण कर्मकृतं न तेन स्वर्गादिफलं भोक्तुं शक्यते, तस्यनाशात्, किन्तु शरीरान्तरेणेतिफलतत्कारणयोराश्रयस्य व्यतिरेकोभेदः वृक्षस्तुसिक्तः फलपर्यन्तमवतिष्ठते इतिवैधर्म्य मितिभावः ॥ ५१ ॥

समाधत्ते—

प्रीतेरात्माश्रयत्वादप्रतिषेधः ॥ ५२ ॥

अप्रतिषेधः = वृक्षफलवदितिहेतुप्रतिषेधो न संभवति कस्मात् ? प्रीतेः सुखस्यात्माश्रयत्वात् = आत्मनिष्ठत्वादित्यर्थः अग्निहोत्रादिफलं = प्रीतिः सुखमेव तच्चात्माश्रयमात्माचवृक्षवत्फलपर्यन्तमवतिष्ठतेनित्यत्वादिति समस्त भावार्थः ॥ ५२ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शङ्कते—

न पुत्र-पशु-स्त्री-परिच्छद-हिरण्यान्नादिफलनिर्देशात् ॥५३॥

न=अग्निहोत्रादिफलं सुखं न भवति, कस्मात्? पुत्रादीनां फलत्वेन निर्देशात्=कथनादित्यर्थः। पुत्रादीनां फलत्वबोधकवाक्यानि 'पुत्रकामो यजेत' इत्यादीनि भाष्ये द्रष्टव्यानि ॥५३॥

समाधत्ते—

तत्संबन्धात्फलनिष्पत्तेस्तेषु फलवदुपचारः ॥ ५४ ॥

तेषु=पुत्रादिषु फलवदुपचारः तत्सम्बन्धात्=पुत्रादिसंबन्धादित्यर्थः। यथा "अन्नं वै प्राणिनां प्राणाः" इत्यत्र प्राणसाधनेऽन्ने प्राणनिर्देशस्तथा फलसाधनेषु पुत्रादिषु फलवन्निर्देश इति भावः ॥५४॥

क्रमप्राप्तं दुःखं परीक्षयति—

विविधबाधनायोगाद्दुःखमेव जन्मोत्पत्तिः ॥ ५५ ॥

जन्मोत्पत्तिः=जन्मग्रहणं, दुःखमेव जन्म हि शरीरसंबंधस्तं विना जरामरणादि दुःखासंभवात्, "अशरीरं वावसन्तं न प्रियाप्रिये स्पृशतः" इति श्रुतेः। 'परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः' इति योगसूत्राच्च ॥५५॥

शंकते—

न=सुखस्याप्यन्तरालोत्पत्तेः ॥५६॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

न = दुःखमेव जन्मोत्पत्तिरिति न कस्मात् ? दुःखमध्ये सुख स्यापि निष्पत्तेरित्यर्थः । तथाचोक्तं योगवासिष्ठे —'सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम् । चक्रनेमिक्रमेणैकं न भवेद्रघुनन्दन॥सुखदुखं च सर्वदैवात्र नास्ति कस्यापीति दुर्गाभ्युदये ॥५६॥

समाधत्ते—

वाधनाऽनिवृत्तेर्वेदयतःपर्येषणदोषादप्रतिषेधः ॥५७॥

दुःखमेव जन्मोत्पत्तिरित्यस्य न प्रतिषेधः कस्मात् ? वेदयतः = सुखमनुभवतः पुरुषस्य पर्येषणे = सुखार्थं प्रवर्तनेदोषात् । विविधवाधनानिवृत्यभावरूपादित्यर्थः । सुखं चानेक दुःख संपृक्तं हेयमेव भवति । तथा च सांख्यसूत्रं—'तदपि दुःखशवल मिति दुःख कोटौ निक्षिपन्ति विवेचकाः ॥५७॥

हेत्वन्तरमाह—

दुःखविकल्पेसुखाभिमानाच्च ॥५८॥

दुःखस्यविविधः कल्पोयत्रतादृशेपुत्रकलत्रादौ कदाचित सुखाभिमानात्सुखत्वज्ञानान्नतुवास्तवंसुखंतत्रास्तीतिभावः॥५८॥

दुःख परीक्ष्यापवर्गपरीक्षणायपूर्वपक्षमाह—

ऋणक्लेशप्रवृत्यनुवन्धादपवर्गाभावः ॥५९॥

ऋणानिचक्लेशाश्च प्रवृत्तिश्चतासामनुवन्धः= सर्वदाकरणी

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यता, तस्मादपवर्गाभावः। तथा च श्रुतिः— 'जायमानोह ब्राह्मणः त्रिभिर्ऋणैर्ऋणवान् जायते। ब्रह्मचर्येण ऋषिभ्यः,यज्ञेनदेवेभ्यः प्रजयापितृभ्यः, इति ॥ अत्रषिभ्यःऋषिऋणेभ्यएवमग्रेपि। नचानपाकृतेषुतेषुमोक्षानुष्ठानंशक्यम्। तद्यथाहभगवान्मनुः— "ऋणानित्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्। अनपाकृत्य मोक्षं तुसेवमानःपतत्यधः॥ एवंपञ्चक्लेशानुबन्धात्प्रवृत्तिर्धर्माधर्मौ तदनुरोधाच्चापवर्गाभावे सिद्धे "दुःखजन्मेतिसूत्रेणयदपवर्गस्त्वमुक्तंतदयुक्तमितिभावः॥ ५९ ॥

ऋणानुबन्धादपवर्गाभावपक्षं समाधत्ते—

प्रधानशब्दानुपपत्तेर्गुणशब्देनानुवादोनिन्दाप्रशंसोपपत्तेः ६०

प्रधानशब्दयोः=जायमान, ऋणै, रितिश्रुत्युक्तशब्दयोरनुपपत्तेः=प्रधानार्थपरत्वस्यासिद्धेर्गुणशब्देन=गौणप्रयोगेणानुवादः क्रियते,यागादीनामननुष्ठाने निन्दाया अनुष्ठानेच प्रशंसायाः उपपत्तेः सिद्ध्यर्थमित्यर्थः। तस्माद्दणानुबन्धादपवर्गाभावइति नसुष्ठूक्तमितिभावः॥६०॥

नन्वेवं संन्यासिनामपवर्गाभावस्तेषामग्निहोत्रादिकर्मानुष्ठानाभावात्तत्राह—

समारोपणादात्मन्यप्रतिषेधः॥६१॥

अप्रतिषेधः= संन्यासिनामपवर्गप्रतिषेधोनोपपद्यते,कस्मा·

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

त्? आत्मनि=शरीरे ऽग्निसमारोपणादित्यर्थः। मनुरप्याह—"आत्मन्यग्नीन्समारोप्य ब्राह्मणःप्रव्रजेद् गृहात्॥ अतएव "चत्वारः पथयो देवयानाः, इतिचातुराश्रम्यश्रुतिःसंगच्छते ॥६१॥

ननुसंन्यासिकृताग्निहोत्रादिकर्मफलंस्वर्गोऽपवर्गप्रतिबन्धकःस्यात्तत्राह—

पात्रचयान्तानुपपत्तेश्चफलाभावः॥६२॥

तत्वज्ञानिसंन्यासिनः फलस्य= स्वर्गस्याभावः कस्मात्? पात्राणि=अग्निहोत्रपात्राणि, तेषां चयनं मृतस्याग्निहोत्रकर्तुःशरीरेभवति, तस्मिन्कर्माणिकृतेसतिस्वर्गादिफलंभवति,संन्यासिनस्तदसंभवस्तत्परित्यागात्। वस्तुतस्तु'तस्यपुत्रादायमुपयन्तिसुहृदः साधुकृत्यांद्विषन्तःपापकृत्यामितिकौषीतकीश्रुतेरग्निहोत्रादिकर्मणः फलंतस्य न भवतीतिभावः ॥६२॥

क्लेशानुबन्धंदूषयति—

सुषुप्तस्यस्वप्नादर्शनेक्लेशाभाववदपवर्गः॥६३॥

यथा-सुषुप्तस्य पुरुषस्य स्वप्नादर्शने=सुषुप्तिकाले,प्रवृत्यभावातक्लेशाभावस्तथापवर्गेऽपि रागद्वेषाभावात् क्लेशाभावःसंभवतीतिनक्लेशानुबन्धादपवर्गाभावःसिध्यतीतिभावः॥६३॥

प्रवृत्त्यनुबन्धादपवर्गाभावं निराकरोति—

न-प्रवृत्तिःप्रतिसंधानाय हीनक्लेशस्य ॥६४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

हीनक्लेशस्य=रागद्वेषादिरहितस्यपुंसः प्रवृत्तिः=वाचा बुद्धया शरीरेण कृतं कर्म, प्रतिसन्धानाय=पुनर्जन्मसंपादकं नभवतीतिनप्रवृत्त्यनुबन्धोऽपवर्गप्रतिबन्धकइतिभावः ॥६७॥

शङ्कते—

न क्लेशसन्ततेः स्वाभाविकत्वात् ॥ ६५ ॥

न=क्लेशसन्ततेरुच्छेदो न संभवति, तस्मादपवर्गाभावः सिध्यति । कस्मात् ? स्वाभाविकत्वात् क्लेशसन्ततेरनादित्वात् । नचानादिः शक्य उच्छेत्तुमात्मवदितिभाष्यम् ॥ ६५ ॥

प्रागुत्पत्तेरभावानित्यत्ववत्स्वाभाविकेऽप्यनित्यत्वम् ॥६६॥

प्रागुत्पत्तेरभावस्यप्रागभावस्ययथानादित्वेऽप्यनित्यत्वंतथा स्वाभाविकेऽपि =क्लेशसन्तेरनादिभूतायामप्यनित्यत्वं विनाशित्वं संभवतीतिक्लेशनिवृत्तिसंभवात्सिद्धोऽपवर्गइतिभावः ॥६६॥

तत्रैवाह—

अणुश्यामतानित्यत्ववद्वा ॥६७॥

यथाणोः=पार्थिवपरमाणोः, श्यामताया अनादिभूतत्वेऽप्यग्निसंयोगेननाशादनित्यत्वं,तथानादिभूतायाःक्लेशसन्ततेरपिविनाशःसंभवतीतिनापवर्गानुपपत्तिरितिभावः ॥६७॥

सिद्धान्तमाह—

न सङ्कल्पनिमित्तत्वाच्चरागादीनाम् ॥६८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

न=रागादिक्लेशनिवृत्तेरनुपपत्तिर्नास्ति, कस्मात् ? रागद्वेषादीनां संकल्पनिमित्तत्वात्=संकल्पो मिथ्याज्ञानं तस्यतत्वज्ञानेन निवृत्तौ रागादयः क्लेशाः स्वयं निवर्तन्ते निमित्तापाये नैमित्तिकस्याप्यपायादितिभावः। एवंचापवर्गसिद्धिर्जाताश्रुतिश्चापवर्गाभिधायिनीभवति—

"कर्मभिर्मृत्युमृषयोनिषेदुः प्रजावन्तोद्रविणमीहमानाः।
अथापरेऋषयोमनीषिणः परंकर्मभ्योऽमृतत्वमानशुः ॥

अमृतत्वंमोक्षमानशुः प्रापुरिति श्रुत्यर्थः ॥६८॥

॥ इतिन्यायसूत्रवृत्तौचतुर्थाध्यायस्याद्यमान्हिकम् ॥

अथचतुर्थाऽध्यायेद्वितोयान्हिकम् ॥

अपवर्गंपरीक्ष्य तत्वज्ञानं परीक्षयति—

दोषनिमित्तानां तत्वज्ञानादहङ्कारनिवृत्तिः ॥१॥

दोषा रागादयस्तेषां निमित्तानि स्त्र्यादयः शरीरादयोवा तेषां तत्वज्ञानात्=स्वरूपज्ञानात्, "नामीसुखहेतव, इत्येवंरूपादहंकारोममत्वज्ञानं तस्य निवृत्तिर्भवतीत्यर्थः ॥१॥

दोषनिमित्तं दर्शयति—

दोषनिमित्तंरूपादयोविषयाः संकल्पकृताः ॥२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

रूपादयो विषयाः = रूपादिमुखेन दोषजनकाः स्त्र्यादयोविषयाः, सङ्कल्पकृताः = सङ्कल्पविषयीभूता दोषनिमित्तं = रागादिदोषाणामुत्पादकाभवन्तीत्यर्थः ॥२॥

दोषनिमित्तं दर्शयति—

तन्निमित्तंत्ववयव्यभिमानः ॥३॥

अवयविषु=स्त्र्यादिभोग्यव्यक्तिषु,अभिमानः = भोग्यत्वज्ञानं, तन्निमित्तं = संकल्पनिमित्तं ,तथाचस्त्र्यादिषु "चर्मनिर्मितपेशीयं मांसासृक् पूयपूरिता । अस्यां रज्यति योमूढः सपिशाचोहि मन्यताम् ॥ "उत्तानोच्छूनमण्डूकपाटितोदरसंनिभे । क्लेदिनि स्त्रीव्रणेसक्तिरकृमेः कस्यजायते ॥ इत्येवं भावना कर्तव्या साच विरागाय भवति विरागोमोक्षायभवतीतिभावः ॥३॥

प्रसङ्गादवयविपरीक्षणायपूर्वतदंगभूतंसंशयमाह—

विद्याऽविद्याद्वैविध्यात् संशयः ॥४॥

उपलब्धिर्विद्या, अनुपलब्धिरविद्या,'असदपिशुक्तिरजतादिकमुपलभ्यतेसदपिकिंचिन्नोपलभ्यतेकूपेपतितमितितयोःसदसद्विषयत्वेनद्वैविद्यात्संशयःकिमुलभ्यमानोह्यनुपलभ्यमानश्चावयवीसद्वाऽसद्वाउभयथाप्यवयविनिसत्वासत्वसंशयोभवति ॥४॥

सिद्धान्तमाह—

तदसंशयःपूर्वहेतुप्रसिद्धत्वात् ॥५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तदसंशयः=तत्रावयविनि, संशयो नोपपद्यते। कस्मात्? पूर्वहेतुप्रसिद्धत्वात्=पूर्वहेतुभिः द्वितीयाध्यायप्रथमाह्निके 'सर्वाग्रहणमवयव्यसिद्धे' रित्यादिसूत्रोक्तैरवयविनः प्रकर्षेण सिद्धत्वात् न कश्चित्संशय इति भावः ॥५॥

अवयविनि बाधकमाशंकते—

वृत्त्यनुपपत्तेरपि तर्हि न संशयः ॥६॥

तर्हि चेदवयविनि पूर्वहेतुप्रसिद्धत्वान्न संशयस्तदाऽवयविनोऽवयवेषु वृत्त्यनुपपत्तेरपि नास्त्यवयवीति संशयो न भवतीत्यर्थः ॥६॥

हेत्वन्तरमाह—

पृथक् चावयवेभ्योऽवृत्तेः ॥७॥

अवयवेभ्यः पृथक्=अन्यत्रावृत्तेः=अवयविनोऽवृत्तेरपि संशयो नोपपद्यते इत्यर्थः। नह्यवयवेभ्योऽन्यत्र वर्तमानोऽवयवीति व्यपदेष्टुं शक्यतेऽवयवेषु वर्तमानाद्ध्यवयवी इति भावः ॥७॥

अवयवावयविनोस्तादात्म्यं नेत्याह—

न चावयव्यवयवाः ॥८॥

अवयवा एव नावयवी, परस्परं भेदात्। नहि तन्तुः पटः स्तम्भो गृहमिति कश्चित्प्रत्येति, अतस्तदवस्था=संशयानुपपत्तिरिति नास्त्यवयवीति सिद्धमिति भावः ॥ ८ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सिद्धान्तयति—

एकस्मिन्भेदाभावाद्भेदशब्दप्रयोगानुपपत्तेरप्रश्नः ॥९॥

अवयवी प्रत्यवयवं कृत्स्नतयावर्तते किंवा एकदेशेनेति प्रश्नस्त्वप्रश्नः कस्मात् ? एकस्मिन्नवयविनिभेदाभावात् । भेदशब्दप्रयोगानुपपत्तेः = कात्स्न्यैकदेशशब्दयोरवयविनि प्रयोगोनोपपद्यते तस्यैकत्वेनानेकत्वाभावादितिसिद्धोऽवयवीतिभावः॥ ९ ॥

इतश्चवृत्तिविकल्पोनयुक्तइत्याह—

अवयवान्तरभावेऽप्यवृत्तेरहेतुः ॥१०॥

अहेतुः = अवयवान्तरसद्भावोहेतुर्नयुक्तः कस्मात् ? अवयवान्तरसद्भावेप्यवयविनोऽवयवेषुवृत्त्यनुपपत्ते रन्तर्भावोनोपपद्यतेतन्नियामकसम्बन्धाभावादितिसिद्धोऽवयवीतिभावः ॥१०॥

सर्वाग्रहणमवयव्यसिद्धेरिति पूर्वोक्तयुक्तिपूर्वपक्षीदूषयति…

केशसमूहेतैमिरिकोपलब्धिवत्तदुपलब्धिः॥११॥

तैमिरिकस्य = तिमिरनामक—नेत्ररोगविशिष्टस्य, पुरुषस्य नैकः केशः प्रत्यक्षः परन्तुकेशसमूहः प्रत्यक्षोभवति । तथैकस्य परमाणोरप्रत्यक्षेऽपि परमाणुसमूहस्यघटादेः प्रत्यक्षं सम्भवेदतोघटः पटो गौरश्च इतियत्प्रत्यक्षन्तन्नावयविनंगोचरयति किन्तुपरमाणुपुञ्जमितिनावयवीकश्चित्पदार्थ इतिसिध्यति॥११॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

समाधत्ते—

स्वविषयानतिक्रमेणेन्द्रियस्यपटुमन्दभावात्विषयग्रहणस्य तथाभावोनाविषयेप्रवृत्तिः ॥१२॥

इन्द्रियस्य = तत्तदिन्द्रियस्य, स्वविषयानतिक्रमेण = स्वस्व विषयमनतिलंघ्य, पटुमन्दभावात् विषयग्रहणस्यतथाभावः = पटुमन्दभावःसम्भवति, नाविषयेप्रवृत्तिः = स्वाविषयेप्रवृत्तिर्नभव ति, तथाच—परमाणुरपीन्द्रियस्याविषयएवेति परमाणुसमूहप्र त्यक्षमपीन्द्रियेणनसंभवतीतिघटःपटो गौरश्वइत्यादिप्रत्यक्षवि षयोऽवयवीपरम। पुञ्जव्यतिरिक्तएवस्वीकार्यइतिभावः ॥१२॥

अत्रानिष्टमाशंकते—

अवयवावयविप्रसङ्गश्चैवमाप्रलयात् ॥१३॥

एवं=वृत्तिविकल्पेनावयव्यसिद्धौ, यथाऽवयविनोऽवयवेषुन वृत्तिस्तथाऽवयवानामपिस्वावयवेषुवृत्तिर्नस्यात्तथाचाप्रलयात् प्रलयः सर्वाभावस्तत्पर्यन्तमवयवानामुत्तरोत्तरमवयवप्रसङ्गोभ- वेदितिपरमाणुरपिनसिध्येत नचैतद्युक्तमितिभावः ॥१३॥

समाधत्ते—

न = प्रलयोऽणुसद्भावात् ॥१४॥

प्रलयः=सर्वाभावोनसंभवति, कस्मात्? परमाणुसद्भा

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वात्=मूलकारणपरमाणूनामवशिष्यमाणत्वादित्यर्थः। सर्वं पदार्थ प्रलयेऽपि मूलकारणं परमाणुर्नप्रलीयते इति न पुनःसृष्ट्यनुपप त्तिः । मीमांसकास्तु-बीजाङ्कुरन्यायेन संसारप्रवाहोऽनादिरन न्तःप्रलयसद्भावेनमानमित्याहुः।तदसत् "धातायथापूर्वं मकल्पय दित्याद्यागमस्यप्रलयेमानत्वान्नचागमस्तर्केणवाध्यते । यदुक्तं वाक्यपदीयेभर्तृहरिणा—"धर्मस्य चाव्यवच्छिन्नायेपन्थानोऽव्यव स्थिताः । नतान्लोकप्रसिद्धत्वात्कश्चित्तर्केणवाधयेत् ॥

ननुकोऽयंपरमाणुस्तत्राह—

परं वा त्रुटेः ॥१५॥

त्रुटेः=त्रसरेणोः, परं=यदतिसूक्ष्मंतत्परमाणुः । "यस्मा न्नाल्पतरमस्ति तंपरमाणुं प्रचक्ष्महे इतिभाष्यम् ॥१५॥

पूर्वपक्षी परमाणोरनित्यत्वमाह—

आकाशव्यतिभेदात्तदनुपपत्तिः ॥१६॥

तदनुपपत्तिः— परमाणुनित्यत्वस्यानुपपत्तिरसिद्धिः । कस्मात्? आकाशव्यतिभेदात्=परमाणोरन्तः आकाशसमावे शादित्यर्थः। यदाकाशेनव्यतिभिन्नं, तदाघटादिवत्सावयवंसाव यवस्यविनाशात्प्रलयेसद्भावोनयुक्तइतिभावः ॥१६॥

विपक्षेवाधकमाह—

अकाशासर्वगतत्वं वा ॥१७॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यदि परमाणु राकाशेन नव्यतिभिद्यते तदाऽकाशस्यासर्वगतत्वं स्यात् = सर्वगतमाकाशंनभवेत्, तदपिनतवाभीष्टमित्युभयतःपाशारज्जुरितिभावः ॥१७॥

समाधत्ते—

अन्तर्बहिश्चकार्यद्रव्यस्यकारणान्तरवचनादकार्येतदभावः ॥१८॥

अन्तर्बहिश्चावयवौ कार्यद्रव्यस्य भवतः । कस्मात्? कारणान्तरवचनात्, अकार्ये परमाणौ तदभावः= अन्तर्बहिरवयवयोरसंभव इति परमाणावाकाशसमावेशोनभवति । तस्मान्नित्यत्वं नित्यत्वात्परमाणुसद्भावान्नसर्वाभावइतिभावः ॥१८॥

ननुकथंतर्हि सर्वगतमाकाशंतत्राह—

शब्दसंयोगविभवाच्चसर्वगतम् ॥१९॥

शब्दजनक—संयोगस्य यो विभवोव्यापकत्वं, तस्मात्सर्वगतमाकाशमित्यर्थः । नच तत् किंचिन्मूर्तद्रव्यमुपलभ्यते यदाकाशेननसंयुज्यते तस्मात्सर्वमूर्तद्रव्यसंयोगात्सर्वगत—माकाशंसिद्धमितिभावः ॥१९॥

आकाशस्यसर्वगतत्वे हेत्वन्तरमाह—

अव्यूहाविष्टम्भविभुत्वानिचाकाशधर्माः ॥२०॥

व्यूहः=एकत्रीकरणम्, विष्टम्भः=प्रतिरोधः, तयोराकाशेऽभावो निःस्पर्शत्वात्, व्यूहविष्टम्भयोःसावयवपदार्थेसंभवः।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

आकाशस्यतु निरवयवत्वान्नित्यंत्वं सर्वगतत्वंच श्रुति रप्यात्मान मुद्दिश्याह—"आकाशवत्सर्वगतो नित्य इति ॥२०॥

पूर्वपक्षी पुनः शंकते—

मूर्तिमतांचसंस्थानोपपत्तेरवयवसद्भावः ॥ २१॥

मूर्तिमतां=मूर्तपदार्थानां संस्थानोपपत्तेः=अवयवसंनिवेशः = संस्थानंतस्योपपत्तेरवयवसद्भावः = अवयवसत्वंप्राप्नोति। परमाणुरपिमूर्तपदार्थोऽतस्तेनापि संस्थानवताभवितव्यं संस्थानवत्वात्सावयवत्वंतस्यसिध्यति ॥२१॥

पूर्वपक्षीपरमाणोःसावयवत्वेहेत्वन्तरमाह—

संयोगोपपत्तेश्च ॥२२॥

परमाणोः संयोगोपपत्तेः=परमाण्वन्तरेण संयुज्यमानत्वादपितस्यावयवसद्भावोऽवगम्यते इत्यर्थः । द्व्यणुकादीनामुत्पत्तये परमाणुद्वयसंयोगोऽवश्यंस्वीकार्यः सच परमाणोः सावयवत्वेसति संभवति नान्यथा तथाच प्रयोगः परमाणुःसावयवः संयोगित्वाद्घटादिवत्सावयवत्वाद्विनाशीतिभावः ॥२२॥

समाधत्ते—

अनवस्थाकारित्वादनवस्थानुपपत्तेश्चाप्रतिषेधः॥२३॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अप्रतिषेधः= परमाणुनिरवयवत्वप्रतिषेधो न संभवति कस्मात् ? अनवस्थाकारित्वात्=अनवस्थासंपादकत्वात्, अनवस्थानुपपत्तेः=अनवस्थायाश्चानुपपत्तेरसिद्धेरित्यर्थः । परमाणुश्चेत्सावयवस्तदा तदवयवधारायाः क्वापि विश्रामो न भवेदित्यनवस्था प्रसज्येत न च सा युक्ता मेरुसर्षपयोः साम्यप्रसङ्गादिति भावः॥२३॥

विज्ञानवाद्याह—

बुद्ध्या विवेचनात्तु भावानां याथात्म्यानुपलब्धिः
तन्त्वपकर्षणेपटसद्भावानुपलब्धिवत्तदनुपलब्धिः॥२४॥

भावानां=घटादिपदार्थानां, बुध्या धिया,विवेचनात्=याथात्म्यानुपलब्धिः=याथात्म्यं =सत्वंनोपलभ्यते। यथातन्तूनामपकर्षणेकृते तन्तुभ्यो ऽतिरिक्तस्य पटस्य सद्भावः=सत्वंनोपलभ्यते तथा तन्त्वनुपलब्धिः= घटादिसत्वस्यानुपलब्धिरितितेमिथ्याभूतादृश्यन्ते विज्ञानमेवैकंसत्यमितिभावः॥२४॥

समाधत्ते—

व्याहतत्वादहेतुः ॥२५॥

बुद्धयाविवेचनादितिहेतुर्न साध्यसाधकः कस्मात् ? व्याहतत्वात्=व्याघातदोषदुष्टत्वादित्यर्थः । यदिबुध्याविवेचनंभावानां तदा न सर्वभावयाथात्म्यानुपलब्धिः । अथ सर्वभावानां याथात्म्यानुपलब्धि स्तदा न बुध्याविवेचनं भावानां सिध्यति,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

बुद्ध्या विवेचने 'तंतुभ्यः पट इतिप्रतीयते 'न तन्तवएवपटः, इति भावानांयाथात्म्योपलब्धेर्नसर्वं मिथ्यात्वमुपपद्यते ॥२५॥

तदाश्रयत्वादपृथग्ग्रहणम् ॥२६॥

तन्त्वाद्याश्रयत्वादपृथक्ग्रहणं= पटादीनांतन्त्वादिभ्यः पृथक्त्वेनग्रहणंनभवतीत्यर्थः। तन्त्वादीनाँ पटादीनां चाश्रयाश्रितभावः संबन्धोविद्यते । तस्मात्तं त्वादिभ्यःपृथक्त्वेऽपि न तेपृथक्त्वेनगृह्यन्ते, नचापृथगग्रहणाद्भावानां मिथ्यात्वं सिध्यतीतिभावः ॥२६॥

पदार्थसद्भावेहेतुमाह—

प्रमाणतश्चार्थप्रतिपत्तेः ॥२७॥

अर्थानाँ=घटादीनां,प्रतिपत्तिःसिद्धिः,प्रमाणतः= प्रत्यक्षादिप्रमाणेनभवति ,तदभावेविज्ञानमपिनसिध्येदितिभावः ।२७॥

हेत्वन्तरमाह=

प्रमाणानुपपत्त्युपपत्तिभ्याम् ॥२८॥

यदिप्रमाणस्यानुपपत्तिः=मिथ्यात्वं, तदासर्वाभावसाधकस्यप्रमाणस्याभावादेवसर्वाभावोनसंभवति । यदिप्रमाणस्योपपत्तिः= सद्भावोमन्यते, तदा प्रमाणस्यसत्वादेवसर्वाभावोनभवतिपदार्थानांसत्वासत्वे प्रमाणात्सिध्यत इतिभावः ॥२८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पूर्वपक्षी सर्वमिथ्यात्वंसमाधत्ते—

स्वप्नविषयाभिमानवदयंप्रमाणप्रमेयाभिमानः ॥२९॥

यथास्वप्नेविषयाभिमानः=विषयानुभवोमिथ्याभवति, तथा जाग्रत्कालिकएवमेवप्रमाणप्रमेयाभिमानोऽपिमिथ्यैवेतिसर्वाभावः सिध्यतीतिभावः ॥२९॥

सर्वमिथ्यात्वेसाधकान्तरमाह—

मायागन्धर्वनगरमृगतृष्णिकाद्वा ॥३०॥

यथेन्द्रजालमायाया मिथ्यात्वेऽपितज्ज्ञानंभवति,गन्धर्वनगरे मृगतृष्णिकायां च मिथ्याज्ञानंभवति तथाघटपटादिपदार्थाअपि मिथ्याभूताज्ञायन्तेनपरमार्थभूताइतिसर्वाभावः सिध्यति ॥३०॥

सिद्धान्तीसर्वाभावंनिरस्यति—

हेत्वभावादसिद्धिः॥३१॥

सर्वाभावस्य सिद्धिर्नसंभवति, कस्मात् ? हेत्वभावात्= सर्वाभावसाधकाभावादित्यर्थः। घटपटादिपदार्थजातस्य,प्रत्यक्ष प्रमासिद्धत्वेनापलपितुमशक्यत्वादितिभावः ॥३१॥

ननुस्वप्नवदयंप्रमाणप्रमेयाभिमानोऽसद्विषयःकिंनस्यात्तत्राह-

स्मृतिसंकल्पवच्चस्वप्नविषयाभिमानः॥३२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यथा स्मृतिसंकल्पौ पूर्वानुभूतपदार्थविषयत्वात्सद्विषयौ तथा स्वप्नविषयाभिमानोऽपिसद्विषयइत्यर्थः । ननु यदि स्वप्नस्य सद्विषयकत्वं तदास्वप्नस्य मिथ्यात्वं कथंमन्यते, शृणुजाग्रज्ज्ञानापेक्षया स्वप्नज्ञानस्य मिथ्यात्वंमन्यते, नतुस्वरूपेणस्वप्नकाले तत्सत्वस्य बाधकाभावात् ॥३२॥

ननुशरीरेन्द्रियमनोगोचरंमिथ्याज्ञानं कुतोनिवर्ततेतत्राह—

मिथ्योपलब्धेर्विनाशस्तत्वज्ञानात्स्वप्नविषया भिमानविनाशवत्प्रबोधे ॥३३॥

यथा—प्रबोधे=जाग्रद्बोधेन, स्वप्नविषयाभिमानस्यविनाशो भवति तथातत्वज्ञानात्= आत्मतत्वज्ञानात्, मिथ्योपलब्धेः= मिथ्याज्ञानस्य, शरीरादावात्मत्वाद्यभिमानस्येतियावद्विनाशो-निवृत्तिर्भवतीत्यर्थः ॥३३॥

मिथ्याज्ञानवदात्मतत्वज्ञाननिवर्ततेइत्याह—

बुद्धेश्चैवंनिमित्तसद्भावोपलम्भात् ॥३४॥

एवंमायागन्धर्वनगरादिमिथ्याज्ञानवत्, बुद्धेरात्मतत्वज्ञानस्यविनाशोनसंभवति । कस्मात्? निमित्तसद्भावोपलम्भात् । घटपटादियथार्थज्ञानस्व तस्य यथार्थत्वात् ॥३४॥

मिथ्याबुद्धिनिमित्तस्यद्वैविध्यमाह—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तत्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः॥ ३५॥

मिथ्याबुद्धेः=मिथ्याज्ञानस्य, तत्वप्रधानभेदाद्द्वैविध्यं भवति, यद्बाह्यविषयेषुमिथ्याज्ञानंतत्तत्त्वं गौणं, यच्छरीरादावात्मत्वादिमिथ्याज्ञानंतत्प्रधानमुभयोस्तत्वज्ञानान्नाशश्च ॥३५॥

ननुतत्वज्ञानंकथमुत्पद्यतेतत्राह—

समाधिविशेषाभ्यासात् ॥ ३६ ॥

समाधिविशेषोविषयेभ्यश्चित्तवृत्तिनिरोधःतस्याभ्यासोवैशारद्यं, तस्मात्तत्वज्ञानमुत्पद्यते, यदायं वैराग्येणयमादीनामभ्यासेनच चित्तं समादधाति, तदास्वात्मसाक्षात्कारं करोति । समाधौ मानन्तु "क्षणमात्रमृषिस्तस्थौसुप्तमीनइवह्रद इत्यादिबोध्यम् ॥

पूर्वपक्षीशंकते—

नार्थविशेषप्राबल्यात् ॥ ३७ ॥

न=समाधिविशेषाभ्यासोनसंभवति कस्मात् ? अर्थविशेषस्य=पुत्रकलत्रादिस्नेहस्य,प्राबल्यात् = समाधिविशेषाभ्यासस्यप्रतिबन्धकत्वादित्यर्थःसमाधिकालेपुत्रादिसुखदुःखस्मृतेरितिभावः॥

क्षुदादिभिःप्रवर्तनाच्च ॥ ३८ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

क्षुत्पिपासाशातोष्णादिभिर्द्वन्द्वैस्तन्निवृत्तिसाधनेषुवाह्यविषयेषुअन्नजलवस्त्रादिषुचित्तस्याऽनिक्षग्प्रवर्तनाच्चकुतःसमाधिः समाध्यसंभवेचकुतःतत्वज्ञानसंभवइतिभावः ॥ ३८ ॥

समाधत्ते—

पूर्वकृतफलानुबन्धात्तदुत्पत्तिः ॥ ३९ ॥

पूर्वजन्मान्दुष्ठित समाधिजन्य संस्कारवशात्समाधिसिद्धिरित्यर्थः । तथाचश्रूयते—"तदेवसक्तःसहकर्मणैतिलिङ्गंमनोयत्रनिषिक्तमस्य, 'तंविद्याकर्मणोसमन्वारभेतेपूर्वप्रज्ञाचेति । एतदेवाभिप्रेत्य 'अनेकजन्मसंसिद्धइत्यादिभगवद्गीतायामुक्तम्॥३९

योगाभ्यासस्थानमुपदिशति—

अरण्यगुहापुलिनादिषुयोगाभ्यासः ॥ ४० ॥

गृहंपरित्यज्ययोगाभ्यासस्संपादनार्थमरण्यगुहापुलिनादिषुगन्तव्यंगृहेविषयासक्त्याचित्तस्थैर्यासंभवात् । एतदेवाभिप्रेत्यभगवद्गीतासुयोगीयुञ्जीतसततमात्मानंरहसिस्थितइति॥४०

शंकते—

अपवर्गेऽप्येवंप्रसङ्गः ॥ ४१ ॥

एवंगन्धादिविषयप्रावल्यादपवर्गेऽपिविषयज्ञानंप्रसज्येते

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्यर्थः । प्रसंगवशादपवर्गप्रकारःकश्चित्प्रदर्श्यते सर्वेषांदार्शनिकानामेते विषयाःसन्ति, ईश्वरोजीवःसंसारोमोक्षश्च । न्यायमतेईश्वरोनिराकारःसर्वज्ञःसर्वव्यापकोजगन्निमित्तकारणंच । जीवःप्रतिशरीरंभिन्नोविभुर्नित्यश्च । पृथिव्यादिपंचभूतानांपरमाणुभिद्व्यणुकमारभ्यब्रह्माण्डपर्यन्तंजगज्जायते । मनोवर्जंसर्वाणीन्द्रियाणिशरीरेणसहोत्पद्यन्तेनश्यन्तिच । मनस्तुमहाप्रलयपर्यन्तमात्मसहायकमात्मादिपदार्थतत्वज्ञाना 'ज्जीवस्यमुक्तिर्भवतिनचपुनरावृत्तिःसंसारेनसपुनारावर्तते,इतिश्रुतेः ॥ ४१ ॥

समाधत्ते—

ननिष्पन्नावश्यंभावित्वात् ॥ ४२ ॥

न = अपवर्गेविषयज्ञानंनसंभवतिकस्मात् ? निष्पन्नस्य = उत्पन्नस्यशरीरादेः अवश्यम्भावित्वात = विषयज्ञानंप्रतिकारणत्वादित्यर्थः ॥ ४२ ॥

सूत्रशेषमाह—

तदभावश्चापवर्गे ॥४३॥

अपवर्गे = मोक्षे = विषयज्ञानहेतोःशरीरादेरभावएव,शरीरारम्भकधर्माधर्माभावात्तथाचमुक्तस्यशरीराद्यभावेनविषयज्ञानोत्पत्तिप्रसंगोनेतिभावः ॥४३॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तदर्थं यमनियमाभ्यामात्मसंस्कारोयोगाच्चाध्यात्मविध्युपायैः॥

तदर्थं = अपवर्गसिद्धयर्थम् यमनियमाभ्यां = शास्त्रोक्ताभ्यां, योगात् = चित्तवृत्तिनिरोधात, अध्यात्मविध्युपायैः = आत्मतत्वज्ञानमधिकृत्यपातंजलयोगशास्त्रेऽभिहितैः आसन – प्राणायाम—प्रत्याहार – धारणा – समाधिभिःसाधनैश्चात्मसंस्कारः आत्मनो मनसःसंस्कारोऽशुद्धिक्षयपूर्विका समाधियोग्यता संपादनीयेत्यर्थः। तथाचोक्तं "यद्यात्मामलिनोऽस्वच्छोविकारी स्यात्स्वभावतः। नहितस्यभवेन्मुक्तिर्जन्मान्तरशतैरपि ॥४४॥

ननुसमाधिश्चेत्तत्वज्ञानोपायः तर्हि किंन्यायशास्त्रेणेत्यतआह—

ज्ञानग्रहणाभ्यासस्तद्विद्यैश्चसंवादः ॥४५॥

ज्ञानं = मोक्षसाधनंगृह्यतेयेनशास्त्रेण तज्ज्ञानग्रहणं = न्यायशास्त्रं, तस्याभ्यासोमननं, तत्वज्ञानपरिपाकायतद्विद्यैर्न्यायशास्त्राभिज्ञैःसहसंवादोविचारश्चकर्तव्यइत्यर्थः। "आत्मावारेश्रोतव्योमन्तव्य, इत्यत्रमननंविदधतीभगवतीश्रुतिरपिन्यायशास्त्रमाद्रियते। कुसुमांजलिकारश्चाह — "न्यायचर्चेयमीशस्यमननव्यपदेशभाक्। उपासनैवक्रियतेश्रवणानन्तरागता ॥४५॥

ननुकैःसहसंवादंकुर्यात्तत्राह—

तं गुरुशिष्यसब्रह्मचारिशिष्ट-श्रेयोर्थिभिरनसूयुभिरभ्युपेयात् ॥

तं = संवादमनसूयुभिः = अविजिगीषुभिः, गुरुशिष्यसब्रह्मचारि

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शिष्टश्रेयोऽर्थिभिरभ्युपेयात् = कुर्यादित्यर्थः । तत्र गुरुशिष्यौ प्रसिद्धौ । सब्रह्मचारी = सहाध्यायी, शिष्टोयथार्थवक्ता । श्रेयोर्थी = मोक्षकामः ॥४६॥

यदिगुरुशिष्यादीनांप्रतिपक्षग्रहणंनरोचेततत्राह—

प्रतिपक्षहीनमपिवाप्रयोजनार्थमर्थित्वे ॥४७॥

अर्थित्वे=संवादार्थित्वेसति, प्रयोजनार्थं=तत्वनिर्णयार्थं प्रतिपक्षहीनं=पक्षप्रतिपक्षग्रहणंवर्जयित्वापि संवादं कुर्यात्प्रयोजनसिद्धेरेवोद्देश्यत्वादितिभावः ॥४७॥

जल्पवितण्डयोःप्रयोजनमाह—

तत्वाध्यवसाय-संरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत् ॥४८॥

यथा-धान्यादिबीजाङ्कुराणां पश्वादिनिवारणेन पालनाय कण्टकशाखाभिरावरणं(बाड़)क्रियते तथा तत्वाध्यवसायस्य= तत्वनिर्णयस्य,संरक्षणार्थं जल्पवितण्डयोःप्रयोगः कर्तव्यइत्यर्थः। परन्तु धूर्ता एव पुरुषाजल्पवितण्डे प्रयुञ्जते नतु विद्वांसो विदुषां वादेनैव तत्वनिर्णय-रक्षासंभवादितिभावः ॥४८॥

ननु जल्पवितण्डाभ्यां किंकर्तव्यंतत्राह—

ताभ्यां विगृह्य कथनम् ॥४९॥

CC-0. In Public Domain. Funding by IKS-MoE

ताभ्यां=जल्पवितण्डाभ्यां,विगृह्य=परपक्षंनिगृह्य,कथनं= तत्वकथनं कर्तव्यमित्यर्थः। यदिकश्चिन्नास्तिकः—

"अङ्गनालिङ्गनाजन्यंसुखमेवपुमर्थता। कण्टकादिव्यथाजन्यंदुःखंनिरयउच्यते ॥ लोकसिद्धोभवेद्राजा परेशो नापरः स्मृतः। देहस्यनाशोमुक्तिर्हि न ज्ञानान्मुक्तिरिष्यते ॥ इत्येवंस्वकपोलकल्पनाभिर्वैदिकसिद्धान्तान् दूषयितुं प्रवर्तेत, आस्तिकश्च कदाचिदप्रतिभयात्तत्कल्पनासु दूषणं न स्मरेत्तदा जल्पवितण्डेऽवतार्य तमभिभवेत्स्वपक्षरक्षणं चकुर्यादितिभावः ॥४६॥

०॥ इतिन्यायसूत्रवृत्तौचतुर्थाध्यायस्यद्वितीयमान्हिकम् ॥०

अथपञ्चमाऽध्याये

प्रथमान्हिकम्।

जातिनिग्रहस्थानयोर्भेद निरूपणायपञ्चमाध्यायमारभते—

साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्य
प्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्था
पत्त्यविशेषोपपत्त्युपलब्धिअनुपलब्धिनित्यानित्य
कार्यसमाः ॥१॥

अत्रसाधर्म्यादीनां कार्यान्तानां द्वन्द्वे तैः समा इत्यर्थः।

CC-0. In Public Domain. Funding by IKS-MoE

 Digitized by eGangotri and Sarayu Trust.

वादिना साध्यसाधनायस्थापनाहेतौप्रयुक्ते सति प्रतिवादिना पराभिभूत्यै साधर्म्यवैधर्म्याभ्यांयत्तस्यखण्डनंक्रियतेसाजातिस्त स्याश्चसाधर्म्यसमादयःचत्वारिंशद्भेदा भवन्तीतिभावः ॥१॥

तत्रसाधर्म्यवैधर्म्यसमौलक्षयति—

साधर्म्यवैधर्म्याभ्यामुपसंहारेतद्धर्मविपर्ययोपपत्तेः साधर्म्यवैधर्म्यसमौ ॥२॥

साध्यस्य साधर्म्येणवावैधर्म्येणवादिनोपसंहारेकृते, तद्धर्मविपर्ययोपपत्तेः=साध्यापेक्षयाविपरीतेनसाधर्म्येणखंडनेसाधर्म्यसमो विपरीतेनवैधर्म्येण खंडने वैधर्म्यसमः । साधर्म्यसमो यथा='शब्दोऽनित्यःकृतकत्वाद्घटवत्'इत्युपसंहारेकृते यद्यनित्यघटसाधर्म्यादनित्यस्तदा नित्याकाशसाधर्म्यादमूर्तत्वान्नित्यःकिं न स्यात् वैधर्म्यसमो यथा शब्दोऽनित्यःकृतकत्वाद्घटवदाकाशवद्वेति स्थापनायामनित्यपटवैधर्म्यादमूर्तत्वान्नित्यः किंनस्यादिति॥

साधर्म्यवैधर्म्यसमयोरुत्तरमाह—

गोत्वाद्गोसिद्धिवत्तत्सिद्धिः॥३॥

गोत्वात्=गोसाधर्म्यादश्वादिवैधर्म्याच्च जातिविशेषाद्गोसिद्धिवत्तत्सिद्धिः=कृतकत्वादितःसाध्यधर्मस्यानित्यत्वस्य शब्देसिद्धिर्भवतीत्यर्थःनचसाधर्म्यमात्रं वैधर्म्यमात्रं वा साध्यसाधनंभवतीतिनपूर्वोक्तरीत्यानित्याकाशसाधर्म्यादमूर्तत्वाच्छब्दे

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

नित्यत्वंसिध्यतीतिभावः ॥३॥

सम्प्रति उत्कर्षसमादिजातिषट्कमेकेनलक्षयति—

साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्यावर्ण्य विकल्पसाध्यसमाः॥४॥

साध्यदृष्टान्तयोः धर्मविकल्पात् = धर्मभेदादुत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसमा जातयोभवन्ति । उभयसाध्यत्वात् = पक्षदृष्टान्तयोरुभयोरपि प्रदनीयधर्मस्यसाध्यत्वेसाध्यसमाजातिरित्यर्थः। वादिना पक्षेसाध्योपसंहारेकृते प्रतिवादिनस्तत्राविद्यमानस्यधर्मस्यापादनमुत्कर्षसमः । पक्षेविद्यमानधर्माभावापादनमपकर्षसमः। दृष्टान्तेपक्षधर्मापादनं वर्ण्यसमः। पक्षेदृष्टान्तधर्मापादन मवर्ण्यसमः। धर्मान्तरविकल्पदर्शनात्पक्षेसाध्यधर्मविकल्पापादनं विकल्पसमः। पक्षदृष्टान्तयोस्तुल्यतयासाध्यत्वापादनं साध्यसमइत्यर्थः। साध्यदृष्टान्तयोर्विकल्पादिति षड्चानामुत्थानबीजमुभयसाध्यत्वादितिषष्ठस्य ॥४॥

अथपञ्चानामुत्तरमाह—

किंचित्साधर्म्यादुपसंहारसिद्धेर्वैधर्म्यादप्रतिषेधः ॥५॥

किंचित्साधर्म्यात् = कस्यचित्साधर्म्याद्व्याप्तिविशिष्टादुपसंहारसिद्धेः = साध्योपसंहारे सिद्धे, कस्यचिद्वैधर्म्याद्व्याप्तिनिरपेक्षात्साधर्म्यमात्रात्साध्यस्यप्रतिषेधोनसंभवतीत्यर्थः ॥५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

षष्ठस्यसाध्यसमस्योत्तरमाह—

साध्यातिदेशाच्चदृष्टान्तोपपत्तेः ॥६॥

साध्यातिदेशात् = साध्यसत्वप्रदर्शनेनयथाशब्दाश्रयत्वेन-साध्यस्यानित्यत्वधर्मस्यातिदेशात्साधनात्, घटस्य दृष्टान्ततोपपत्तेरप्रतिषेधः = पक्षे साध्यप्रतिषेधोनसंभवतीत्यर्थः ॥६॥

प्राप्त्यप्राप्तिसमौलक्षयति—

प्राप्यसाध्यमप्राप्यवाहेतोः प्राप्त्याऽविशिष्टत्वादप्राप्त्याऽसाधकत्वाच्च प्राप्त्यप्राप्तिसमौ ॥७॥

वह्निमान् धूमादितित्वत्प्रयुक्तोहेतुः किं प्राप्य साध्यं साधयेदप्राप्यवा, प्राप्यचेत्तदा वह्निधूमयोः संयोगस्यसमानत्वाद्धूमवद्वह्नेरपिहेतुत्वंस्यादथवावह्निवद्धूमस्यापिसाध्यत्वंस्यादिति द्वयोः साध्यसाधनभावोनसंभवतीतिप्राप्तिसमाजातिः।अप्राप्य चेदप्राप्त्यासाधकत्वात् संबन्धाभावेसाधकत्वासंभवादप्राप्ति समाजातिर्यथावह्न्यसंयुक्तस्यधूमस्यवह्निसाधकत्वाभावः ॥७॥

अनयोरुत्तरमाह—

घटादिनिष्पत्तिदर्शनात्पीडनेचाभिचारादप्रतिषेधः ॥८॥

साध्यं प्राप्य दण्डादिसाधनैर्घटादिनिष्पत्तिदर्शनात् = प्रत्य

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

त्तसिद्धत्वात् । "श्येनेनाभिचरन्यजेत" इतिश्रुत्याश्येनस्याभिचार साधनत्वमुक्तं तत्राप्राप्यासंयुक्तं नैवश्येनयागेनशत्रुपीड़ासाधनाच्च प्राप्तस्याप्राप्तस्यचसाधनस्य साधकत्वप्रतिषेधोनसंभवतीत्यर्थः ॥ ८ ॥

प्रसङ्गसमप्रतिदृष्टान्तसमौलक्षयति—

दृष्टान्तस्य कारणानपदेशात् प्रत्यवस्थानाच्चप्रतिदृष्टान्तेन प्रसङ्गप्रतिदृष्टान्तसमौ ॥९॥

दृष्टान्तस्य हेतुमत्वे कारणानपदेशात् = हेतोरनभिधानात्, हेतुवचनानवस्थायां प्रसङ्गसमाजातिः । तदुक्तमाचार्यैःअनवस्थाभासः प्रसङ्गसमइति । प्रतिदृष्टान्तेन = प्रतिकूलदृष्टान्तेन, प्रत्यवस्थानात्साध्यविपर्यायापादनात्प्रतिदृष्टान्तसमाजातिरित्यर्थः ॥

प्रसङ्गसमस्योत्तरमाह—

प्रदीपोपादानप्रसङ्गनिवृत्तिवत्तद्विनिवृत्तिः ॥१०॥

यथाप्रदीपदर्शनार्थं प्रदीपान्तरग्रहणस्य प्रसङ्गःप्रयोजनंनास्ति तथा दृष्टान्ते साध्यसिद्धयेहेत्वन्तरप्रदर्शनप्रसङ्गस्यविनिवृत्तिर्वेदितव्येत्यर्थः ॥१०॥

प्रतिदृष्टान्तसमस्योत्तरमाह—

प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः ॥११॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यथैव प्रतिदृष्टान्तस्तथैवदृष्टान्तः। तत्र प्रतिदृष्टान्तस्य हेतुत्वे = स्वार्थसाधकत्वे, मदुपात्तस्यदृष्टान्तस्यापि नाहेतुत्वं सम्पद्यनेसमानत्वात्तथाचतुल्यबलत्वान्नबाधइतिभावः ॥११॥

अनुत्पत्तिसमंलक्षयति—

प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः ॥१२॥

"शब्दोऽनित्यः कृतकत्वाद् घटवदित्यत्रयश्चोत्पत्तिधर्मकस्त स्योत्पत्तेः प्रागनुत्पत्यावश्यंभाव्य मनुत्पन्नेचतस्मिन्ननित्यत्व साधकस्य = कृतकत्वस्यहेतोरभावः स्पष्ट स्तदभावाच्चप्राप्तः खलु नित्यः शब्दो नानित्य इत्येवंपक्षे साध्याभावप्रसञ्जनमनु त्पत्तिसमइतिभावः ॥१२॥

अस्योत्तरमाह—

तथाभावादुत्पन्नस्यकारणोपपत्तेर्नकारणप्रतिषेधः ॥१३॥

उत्पन्नस्यशब्दस्य तथाभावात् = सन्दिह्यमानत्वात्, नानु त्पन्नस्य, उत्पन्नेचतस्मिन्कारणस्यहेतोःकृतकत्वस्योपपत्तेःकार णस्यानित्यत्वहेतोःकृतकत्वस्यप्रतिषेधोनसंभवतीतिभावः ॥१३॥

संशयसमस्यलक्षणमाह—

सामान्यदृष्टान्तयोरैन्द्रियकत्वेसमाने नित्यानित्यसाधर्म्या त्संशयः ॥१४॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पक्षवृत्तिसामान्यस्य दृष्टान्तस्यचैन्द्रियकत्वे=इन्द्रियग्राह्यत्वे समानेतुल्येसति,नित्यंसामान्यमनित्योदृष्टान्तस्तयोर्नित्यानित्य योरिन्द्रियग्राह्यत्वसाधर्म्यात्संशयसमोभवति । यथोक्तोदाहरणे पक्षः शब्दस्तद्वृत्तिसामान्यंशब्दत्वं नित्यं दृष्टान्तोघटोऽनित्य उभयोरिन्द्रियग्राह्यत्वसाधर्म्याच्छब्देशब्दत्ववद्घटवद्वानित्यानि त्यत्वसंशयोभवति ॥१४॥

अस्योत्तरमाह—

साधर्म्यात्संशयेनसंशयोवैधर्म्यादुभयथाचसंशयेऽत्यन्त संशयप्रसङ्गोनित्यत्वानभ्युपगमाच्चसामान्यस्याप्रतिषेधः ॥१५॥

समानधर्मदर्शनात्संशयः कस्मात् ? वैधर्म्यात्=विशेष धर्मदर्शनात्तस्यनिवृत्तेः। यथाशब्देकृतकत्वविशेषधर्मस्यानित्यत्व हेतोर्दर्शनान्नित्यानित्यत्वसंशयोनिवर्तते उभयथा=साधर्म्यवैध र्म्यदर्शनाभ्याञ्च संशयाभ्युपगमेऽत्यन्तसंशयः=सदापिसंशय निवृत्तिर्नस्यात्, सामान्यस्यनित्यत्वानभ्युपगमाच्चसामान्यस्य शब्दत्वस्यापिनित्यत्वंनस्वीक्रियतेयेनतद्दृष्टान्तेनशब्दस्यनित्य- त्वमापद्येत तस्मादप्रतिषेधःपूर्वोक्तसंशयसमोनसंभवति ॥१५॥

प्रकरणसमंलक्षयति—

उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसमः ॥१६॥

उभयेनानित्यसाधर्म्येण नित्यसाधर्म्येण वा प्रक्रियासिद्धेः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रकरणसमः । "शब्दोऽनित्यः कृतकत्वाद्घटवत्" इत्यत्रानित्येन कृतकत्वसाधर्म्येणानित्यत्वेसाधिते "शब्दोनित्यः श्रावणत्वात् शब्दत्ववदितिनित्यसाधर्म्येणनित्यत्वसाधनंप्रकरणसमः॥१६॥

अस्योत्तरमाह—

प्रतिपक्षात्प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः १७

प्रतिपक्षात्मतप्रतिकूलाद्धेतोः श्रावणत्वादितः त्वयाप्रकरणस्यशब्दनित्यत्वस्यसिद्धयाप्रतिपक्षोपपत्तेः कदाचित्कृतकत्वादितोऽनित्यत्वस्यापिसिद्धेः शब्दानित्यत्वप्रतिषेधानुपपत्तिः॥१७॥

अहेतुसमंलक्षयति—

त्रैकाल्यासिद्धेर्हेतोरहेतुसमः ॥१८॥

"अनित्यःशब्दःकृतकत्वाद्घटवदितिवादिनाप्रयुक्तो किमयंहेतुः साध्यात्पूर्वपश्चाद्वासहवा, पूर्वचेद्धेतुत्वासिद्धिःतदानींहेतुमतः साध्यस्यैवाभावात् । पश्चाद्यदि तदापि तथा साध्यस्यपूर्वमेव सिद्धत्वात् । नहिसिद्धसाध्यस्यकश्चिद्धेतुर्भवति । सहचेत्सहभाविनोर्हेतुहेतुमद्भावासंभवःसव्येतरविषाणयोरिवेतिभावः ॥

अस्योत्तरमाह—

न हेतुतः साध्यसिद्धेः त्रैकाल्यासिद्धिः ॥१९॥

हेतुतः = साधनतःसाध्यसिद्धिसंभवाद्धेतोस्त्रैकाल्यासिद्धि

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

र्न संभवति । यद्धि यतः सिद्ध्यति ततस्तेन पूर्वमवश्यं भवितव्यमन्यथा ततस्तत्सिद्ध्यनुपपत्तेः साध्यसिद्धिर्हेतुतः सर्वजनप्रत्यक्षैव १९

अहेतुसमस्य प्रतिषेधान्तरमाह—

प्रतिषेधानुपपत्तेश्च प्रतिषेद्धव्याप्रतिषेधः ॥२०॥

प्रतिषेधस्यानुपपत्तेः = त्रैकाल्यासिद्धेः प्रतिषेद्धव्यस्य हेतोरप्रतिषेधः = प्रतिषेधो न सम्भवति। प्रतिषेधस्याहेतुसमस्यानुपपत्त्या प्रतिषेद्धव्यस्य शब्दानित्यत्वस्य प्रतिषेधानुपपत्तिरिति भावः ॥

अर्थापत्तिसमं लक्षयति—

अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः ॥२१॥

अर्थापत्त्या प्रतिपक्षसाधनाय प्रत्यवस्थानमर्थापत्तिसम इत्यर्थः। "अनित्यः शब्दः कृतकत्वाद्घटवदिति वदर्थादेव "नित्यः शब्दोऽस्पर्शत्वादाकाशवदिति पक्षस्य सिद्धत्वादियमर्थापत्तिसमा जातिः॥

अस्योत्तरमाह—

अनुक्तस्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तत्वादनैकान्तिकत्वाच्चार्थापत्तेः ॥२२॥

किमुक्तेनानुक्तमर्थादापद्यते, उक्तोपपादकं वा, प्रथमपक्षेत्वत्पक्षहानिः त्वयानुक्तत्वात् = शब्दनित्यत्वस्य सद्धेतुनाऽसाधितत्वात्। द्वितीयपक्षे एतस्या अर्थापत्तेरनैकान्तिकत्वं वादिप्रति

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वाद्युभयपक्षसाधारणत्वान्नचोभयपक्षपातिनाकिंचित्सिध्यति तथाचनार्थापत्तिसमेन शब्दनित्यत्वमुपपद्यते इतिभावः ॥२२॥

अविशेषसमं लक्षयति—

एकधर्मोपपत्तेरविशेषेसर्वाविशेषप्रसङ्गात्सद्भावोपपत्तेरविशेषसमः ॥२३॥

एकस्यधर्मस्य कृतकत्वादेः शब्दे घटेचोपपत्तेः सद्भावात् यदिशब्दघटयोरनित्यत्वेनाविशेषः कथ्यते तदासर्वेषामविशेषप्रसङ्गःकस्मात्सद्भावोपपत्तेःसत्ताख्यधर्मस्यसर्वत्रसिद्धेः तथा चसन्मात्रवृत्तिधर्मेणाविशेषापादनमविशेषसमाजातिः ॥२३॥

अस्योत्तरमाह—

क्वचिद्धर्मानुपपत्तेः क्वचिच्चोपपत्तेः प्रतिषेधाभावः॥२४॥

कस्यचिद्धर्मस्य क्वचिदुपपत्तिर्भवतिक्वचिच्चानुपपत्तिर्यथाऽनित्यत्वधर्मस्यघटादावुपपत्तिराकाशादावनुपपत्तिरितित्वदुक्तस्यप्रतिषेधस्याविशेषसमस्याभावोऽसंभवइतिभावः ॥२४॥

उपपत्तिसमं लक्षयति—

उभयकारणोपपत्तेरुपपत्तिसमः॥२५॥

उभयोःपक्षप्रतिपक्षयोःकारणस्योपपत्तेः=हेतूपपत्तिप्रदर्शने, उपपत्तिसमोभवति । पक्षप्रतिपक्षौपरस्परविरुद्धौग्राह्यौयथा

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शब्देनित्यत्वानित्यत्वधर्मौकृतकत्वादनित्यत्वमस्पर्शवत्वान्नित्यत्वम् ॥२५॥

अस्योत्तरमाह —

उपपत्तिकारणाभ्यनुज्ञानादप्रतिषेधः॥२६॥

मत्पक्षस्योपपत्तौसिद्धौयत्कारणं तस्यप्रतिवादिनात्वयाभ्यनुज्ञानात्=दृष्टान्तीकरणादनित्यत्वस्यनप्रतिषेधइत्तिनोपपत्तिसमा जातिरुभयधर्मोपपत्ता वेवतत्संभवा दितिभावः ॥२६॥

उपलब्धिसमंलक्षयति—

निर्दिष्टकारणाभावेऽप्युपलम्भादुपलब्धिसमः ॥२७॥

वादिनिर्दिष्टहेतो रभावेपि =अनुपलब्धावपि, प्रत्यक्षादिनोपलम्भादुपलब्धौ, उपलब्धिसमाजातिः। शब्दोऽनित्यःकृतकत्वाद्घटवदितिवादिनाप्रयुक्ते हेतौ न कृतकत्वेनैवहेतुनाऽनित्यत्वंसम्भवति, प्रवलवायुनोदनेनवृक्षशाखाभङ्गादुत्पन्ने शब्देपिक्षणान्तरेश्रवणाभावादनित्यत्वोपलब्धेरितिभावः ॥२७॥

अस्योत्तरमाह--

कारणान्तरादपितद्धर्मोपपत्ते रप्रतिषेधः॥२८॥

वादिनिर्दिष्टकारणाभावेऽपि कारणान्तरात्तद्धर्मोपपत्तेः=साध्यसिद्धिसंभवात् । यत्र शब्दे एकस्माद्धेतोरनित्यत्वंनोपल

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भ्यते तत्रकारणान्तरादुपलभ्यते तथासति कारणान्तरेणानित्यत्व सिद्धेः शब्दानित्यत्वप्रतिषेधोनोपपद्यतेतिभावः॥२८॥

अनुपलब्धिसमं लक्षयति—

तदनुपलब्धेरनुपलम्भादभावसिद्धौतद्विपरीतोपपत्तेरनुपलब्धिसमः ॥२९॥

शब्दावरणादिप्रतिबन्धकानुपलब्धेरनुपलम्भात्तदभावस्य सिद्धौततोविपरीतायाःशब्दावरणादिसत्वोपलब्धेःशब्दस्यनित्यत्वंसिध्यतीत्येषाऽनुपलब्धिसमाजातिरित्यर्थः॥२९॥

अस्योत्तरमाह—

अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः॥३०॥

शब्दावरणसद्भावसाधनाययोहेतुरुक्तःसोऽहेतुः=शब्दावरणसद्भावस्यासाधकएव,कस्मात्? अनुपलब्धेरनुपलम्भात्मकत्वात्, प्रागुच्चारणाद्यःशब्दश्रवणस्याभावःसशब्दस्यासत्वादेवेतिशब्दस्यानित्यत्वंसिध्यति ॥३०॥

वास्तवमुत्तरमाह—

ज्ञानविकल्पानांभावाभावसंवेदनादध्यात्मम् ॥३१॥

अध्यात्म मात्मनि मनसि ज्ञानविकल्पानां =ज्ञानविशेषाणां

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भावाभावयोः = सत्वासत्वयोः संवेदनाच्चयेनेन्द्रियेणयद्गृह्यते तेनतदभावोऽपिगृह्यतेइतिन्यायेनयथामनसाज्ञानानांभावोगृह्यते तथाशब्दावरणविषयकज्ञानाभावोऽपिगृह्यते तथाच प्रागुच्चारणाद्याशब्दानुपलब्धिःसाशब्दस्याविद्यमानत्वादेवेति शब्दस्यानित्यत्वंसिध्यतीतिभावः ॥३१॥॥

अनित्यसमंलक्षयति—

साधर्म्यात्तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसमः॥३२॥

यदिदृष्टान्तघटसाधर्म्यात्कृतकत्वाच्छब्देतत्तुल्योधर्मोऽनित्यत्वमुपपद्यते,तदासर्वस्यैवानित्यत्वंप्रसज्येतशब्दवत्। अनित्येन घटेनसत्वादिरूपसाधर्म्यस्यसर्वेषांविद्यमानत्वादितिभावः॥३२॥

अस्योत्तरमाह—

साधर्म्याद्दसिद्धेः प्रतिषेधासिद्धिःप्रतिषेध्यसाधर्म्याच्च॥३३॥

यदिघटसाधर्म्यात्कृतकत्वादसिद्धेः शब्देनित्यत्वंनसिध्यति तदा'नित्यःशब्दः श्रावणत्वातशब्दत्ववत्, इतिप्रतिषेधस्यत्वदीयानुमानस्याप्यसिद्धिः। तस्यापिप्रतिषेध्यमनित्यत्वं तत्साधर्म्येणप्रवृत्तत्वात्प्रतिज्ञाद्यवयवयोगोनित्यत्वानित्यत्वानुमानवाक्योः साधर्म्यम् ॥३३॥

वास्तवमुत्तरमाह—

दृष्टान्तेचसाध्यसाधनभावेनप्रज्ञातस्यहेतुत्वात्तस्यचोभयथा

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भावान्नाविशेषः ॥३४॥

साध्यसाधनभावेनदृष्टान्तेप्रज्ञातस्य = प्रमितस्यकृतकत्वादिधर्मस्यहेतुत्वात्तस्य = हेतुत्वस्यमदीयहेतावुभयथा = अन्वयव्याप्त्या व्यतिरेकव्याप्त्या च भावात्सत्वात्त्वदीयहेतौमदीयहेतौचाविशेषोविद्यतेतथासतिशब्दानित्यत्वेऽपित्वदीयसत्वादिहेतोरनित्यव्याप्यत्वासंभवात्सर्वानित्यत्वंनप्रसज्यते इतिभावः ॥३४॥

नित्यसमंलक्षयति—

नित्यमनित्यभावादनित्येनित्यत्वोपपत्तेर्नित्यसमः॥३५॥

अनित्ये = शब्देनित्यंसर्वकालमनित्यभावादनित्यत्वस्थित्या, नित्यत्वोपपत्तेर्नित्यत्वसाधनेनित्यसमोभवतियदिशब्देसदानित्यत्वंतदातदाधारस्य शब्दस्य सर्वकालेसत्वंस्यादितिनित्यत्वं यदिचानित्यत्वं नसदातदापि शब्दस्यनित्यत्वमितिभावः ॥३५॥

अस्योत्तरमाह—

प्रतिषेध्येनित्यमनित्यभावादनित्येऽनित्यत्वोपपत्तेःप्रतिषेधाभावः ॥३६॥

प्रतिषेध्येमत्पक्षेशब्देनित्यसर्वकालमनित्यंभावादनित्यत्वस्वीकारादनित्येशब्देऽनित्यत्वमुपपद्यतेतस्मात्प्रतिषेधस्यनित्यसमस्याभावोऽनित्यत्वप्रतिषेधोनसंभवतीतिभावः ॥३६॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कार्यसमंलक्षयति—

प्रयत्नकार्यानेकत्वात्कार्यसमः ॥३७॥

प्रयत्नकार्याणामनेकत्वादनेकविधत्वादुत्पत्तिरपिप्रयत्नकार्यं भवत्यभिव्यक्तिरपिभवतिशब्दस्योत्पत्तिरेवभवतीत्यत्रनियामकाभावादभिव्यक्तिपक्षोमन्यतां तस्माच्छब्दस्यनित्यत्वंप्राप्तमितिप्रयत्नकार्याविशेषेणप्रत्यवस्थानात्कार्यसमोभवति ॥३७॥

अस्योत्तरमाह—

कार्यान्यत्वेप्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः ॥३८॥

शब्दस्यकार्यान्यत्वेऽकार्यत्वेऽनुपलब्धिकारणस्यावरणादेरुपपत्तेः प्रयत्नस्य = कर्तृप्रयत्नस्याहेतुत्वमकारणत्वंस्यात्, स्वीक्रियतेचशब्दस्यप्रयत्नकार्यत्वंतस्माच्चानित्यत्वम् ॥३८॥

सम्प्रतिदुरुत्तरंप्रयुञ्जानंप्रतिषट्पक्षीमवतारयति—

प्रतिषेधेऽपिसमानोदोषः ॥३९॥

यदिप्रयत्नकार्यत्वंशब्देऽनित्यत्वंनसाधयत्यनैकान्तिकत्वादितिदोषस्तदाप्रतिषेधेऽपि = अनित्यत्वप्रतिषेधहेतावप्यनैकान्तिकत्वंदोषःसमानएवेति न प्रतिषेधःसंभवतीतिभावः ॥३९॥

सर्वत्रैवम् ॥४०॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एवंविधमसदुत्तरंसर्वत्र=सर्वजातिषु प्रयोक्तुं शक्यतेइत्यर्थः॥४०॥

प्रतिषेधविप्रतिषेधेप्रतिषेधवद्दोषः ॥४१॥

यथामत्कृतेप्रतिषेधेऽनैकान्तिकत्वंदोषस्तथात्वत्कृते प्रतिषेध विप्रतिषेधेऽपिदोषःसं भवतीतिप्रतिषेधप्रतिषेधस्यापिनसिद्धिः॥४१॥

प्रतिषेधंसदोषमभ्युपेत्यप्रतिषेधविप्रतिषेधेसमानदोषप्रसङ्गोमतानुज्ञा ॥४२॥

प्रतिषेधं = द्वितीयपक्षं,सदोषंस्वीकृत्य तत्रदोषमनुद्धृत्यप्रतिषेध विप्रतिषेधेतृतीयपक्षे समानदोषप्रसङ्गोमतानुज्ञा—नामकंनिग्रह स्थानंभवति ॥४२॥

स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारेहेतुनिर्देशेपरपक्षदोषाभ्युप गमात्समानोदोषः॥ ४३॥

स्वपक्षः=प्रथमपक्षः तल्लक्षणोद्वितीयपक्षः तदपेक्षःतृतीय पक्षःतस्योपपत्त्युपसंहारे हेतुनिर्देशे=पंचमपक्षे परपक्षदोषस्वी काराच्चतुर्थपक्षे इव मतानुज्ञादोष इतिपंचमपक्षेऽपिमतानुज्ञा दोषप्रदर्शनं षष्ठःपक्षइत्यर्थः। अत्र प्रथमतृतीयपंचमपक्षाःस्था पनाहेतुवादिनः । द्वितीयचतुर्थषष्ठपक्षाः प्रतिषेधहेतुवादिन इतिबोध्यम् ॥ ४३ ॥

॥ इतिन्यायसूत्रवृत्तौपंचमाध्यायस्याद्यमाह्निकम् ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथपंचमाध्यायेद्वितीयान्हिकम् ।

जातिपरीक्षयनिग्रहस्थानपरीक्षणायतद्विभागमाह—

प्रतिज्ञाहानिःप्रतिज्ञान्तरंप्रतिज्ञाविरोधःप्रतिज्ञासंन्यासो हेत्वन्तरमर्थान्तरं निरर्थक मविज्ञातार्थ मपार्थक मप्राप्तकालं न्यून मधिकं पुनरुक्त मननुभाषण मज्ञान मप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्चनिग्रहस्थानानि ॥ १॥

प्रतिज्ञाहान्यादीनिद्वाविंशतिर्निग्रहस्थानानिभवन्ति, 'विप्रतिपत्ति रप्रतिपत्तिश्चनिग्रहस्थानलक्षणम् । तत्राननुभाषणमज्ञानमप्रतिभाविक्षेपः पर्यनुयोज्यापेक्षण. मितिपञ्चाप्रतिपत्त्यास' गृह्यन्ते शेषाणिविप्रतिपत्त्येतिबोध्यम् ॥१॥

प्रतिज्ञाहानिं लक्षयति—

प्रतिदृष्टान्तधर्माभ्यनुज्ञास्वदृष्टान्तेप्रतिज्ञाहानिः॥२॥

स्वोक्तदृष्टान्ते प्रतिदृष्टान्तधर्मस्याभ्यनुज्ञा=स्वीकृतिःप्रतिज्ञाहानिनामकंनिग्रहस्थानंभवति। यथा"शब्दोऽनित्यःप्रत्यक्षगुणत्वादितिस्वप्रतिज्ञा,तत्र—सोऽयंगकारइतिप्रत्यभिज्ञावलेनोद्भाविते वाधदोषे तमनुसृत्य "अस्तु नित्योऽपिशब्दः" इतिप्रतिज्ञाविरुद्धार्थस्वीकारात्प्रतिज्ञाहानिर्भवतीत्यभिप्रायः॥२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रतिज्ञान्तरंलक्षयति—

प्रतिज्ञातार्थप्रतिषेधेधर्मविकल्पात्तदर्थनिर्देशःप्रतिज्ञान्तरम् ॥

प्रतिज्ञातार्थस्य=शब्दानित्यत्वस्य, परेण प्रतिषेधेकृतेसति, यथा—घटोऽसर्वगतोऽनित्य एवंशब्दोऽप्यसर्वगतोऽनित्यइति धर्मविकल्पात्=दृष्टान्तप्रतिदृष्टान्तयोर्धर्म्यैवयात्, प्रतिज्ञातार्थ साधनार्थं योनिर्देशः"अनित्यःशब्द इति पूर्वप्रतिज्ञातोऽसर्वगत इतिद्वितीयाप्रतिज्ञातत्प्रतिज्ञान्तरंनामनिग्रहस्थानंभवति ॥ ३ ॥

प्रतिज्ञाविरोधंलक्षयति—

प्रतिज्ञाहेत्वोर्विरोधःप्रतिज्ञाविरोधः ॥४॥

प्रतिज्ञाया हेतोश्च यः परस्परंविरोधः स प्रतिज्ञाविरोधनामकंनिग्रहस्थानंभवति। यथा "गुणव्यतिरिक्तं द्रव्यं रूपादिभ्यो ऽर्थान्तरत्वेनानुपलब्धेरित्यत्र "गुणव्यतिरिक्तं द्रव्यमितिप्रतिज्ञा रूपादिभ्योऽर्थान्तरत्वेनानुपलब्धेरितिहेतुना हेतुश्च प्रतिज्ञयाविरुध्यतेइतिप्रतिज्ञाहेत्वोर्विरोधेभवतिप्रतिज्ञाविरोधइतिभावः ॥४॥

प्रतिज्ञासंन्यासंलक्षयति—

पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासंन्यासः॥५॥

स्वपक्षस्यपरेण हेतुव्यभिचारादिप्रदर्शनेन प्रतिषेधेकृतेसति यत्प्रतिज्ञातार्थस्यापनयनं=परित्यागः स प्रतिज्ञासंन्यासनामकं निग्रहस्थानंभवति। यथाशब्दोऽनित्यःकृतकत्वादितिस्वपक्षे

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रतिवादिना प्रतिषिद्धे "कएवमाहशब्दोऽनित्यः,इतिस्वप्रतिज्ञातस्यशब्दानित्यत्वार्थस्यपरित्यागाद्भवतिसइतिभावः ॥ ५ ॥

हेत्वन्तरंलक्षयति—

अविशेषोक्तहेतौ प्रतिषिद्धे विशेषमिच्छतोहेत्वन्तरम् ॥६॥

वादिना हेतावविशेषोक्ते = सामान्यरूपेणोक्ते यथा 'शब्दोऽनित्यः प्रत्यक्षत्वादिति, प्रतिवादिना तस्मिन्प्रतिषिद्धे = दूषिते सति,तत्रहेतौ विशेषमिच्छतः = जातिमत्वेसतीति निवेशंकुर्वतो हेत्वन्तरंनामनिग्रहस्थानं भवति ॥ ६ ॥

अर्थान्तरंलक्षयति—

प्रकृतादर्थादप्रतिसंबद्धार्थमर्थान्तरम् ॥७॥

प्रकृतात् = प्रकृतोपयुक्तादर्थादसंबद्धस्यार्थस्याभिधानमर्थान्तरनामकंनिग्रहस्थानंभवति । यथा"शब्दोऽनित्यःकृतकत्वादित्युक्त्वाशब्दोगुणःसचाकाशस्येत्यादिवचनमर्थान्तरम् ॥ ७ ॥

निरर्थकंलक्षयति—

वर्णक्रमनिर्देशान्निरर्थकम् ॥८॥

वर्णानांक्रमेणनिर्देशोनित्यःशब्दोजबगड़दशत्वादित्यादिसाध्यासाधकपदप्रयोगा निरर्थकंनामनिग्रहस्थानंभवति ॥ ८ ॥

अविज्ञातार्थं लक्षयति—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

परिषत्प्रतिवादिभ्यांत्रिरभिहितमप्यविज्ञातमविज्ञातार्थम् ॥९॥

वादिनात्रिवारमभिहितमुच्चारितमपि, परिषदा = मध्यस्थभूतयाप्रतिवादिनाचार्थतोयन्नविज्ञायतेतदविज्ञातवाक्यंश्लिष्टपदमप्रसिद्धार्थकमविज्ञातार्थनामकं निग्रहस्थानं भवति ॥ ६ ॥

अपार्थकंलक्षयति—

पौर्वापर्यायोगादप्रतिसंबद्धार्थमपार्थकम् ॥१०॥

यत्र पौर्वापर्येण = पूर्वापरभावेनायोगादसंबन्धादप्रतिसंबद्धार्थं = परस्परानन्वितार्थकं "दशदाडिमानिषड्पूपाइत्यादि पदजातंप्रयुज्यते, तत्रापार्थकं नामनिग्रहस्थानंभवति । वाच्यार्थशून्यं निरर्थकं समुदायार्थशून्यमपार्थकमितिसंप्रदायः ॥१०॥

अप्राप्तकालं लक्षयति—

अवयवविपर्यासवचनमप्राप्तकालम् ॥११॥

प्रतिज्ञाहेतूदाहरणोपनयननिगमनान्यवयवास्तेषामनुमानवाक्येविपर्यासेन व्युत्क्रमेणवचनं = कथनमप्राप्तकालं नामनिग्रहस्थानंभवति, उदाहरणंयथा पूर्वं हेतोःततःप्रतिज्ञायाधूमाद्वह्निमानित्यादि ॥ ११ ॥

न्यूनं लक्षयति—

हीनमन्यतमेनाप्यवयवेनन्यूनम् ॥१२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अनुमानवाक्ये प्रयोक्तव्यानामवयवानांमध्येऽन्यतमेन=एकेनाप्यवयवेन हीनमनुमानवाक्यं प्रयुञ्जानस्य न्यून नामनिग्रहस्थानंभवति।यथा वह्निमानमहानसवत्इत्यादिहेत्वादिहीनम्॥१२॥

अधिकं लक्षयति—

हेतूदाहरणाधिकमधिकम् ॥१३॥

एकेनैवहेतुनोदाहरणेनवासिद्धेऽर्थे,चेद्धेत्वन्तरमुदाहरणान्तरंवाप्रयुज्यतेतदाधिकं नामनिग्रहस्थानंभवति। यथा "शब्दो नित्यःशब्दत्वात्श्रावणत्वाच्चेतिहेत्वधिकम् । "जगन्मिथ्या शुक्तिरजतवद्गन्धर्वनगरवच्चेतिउदाहरणाधिकम्॥१३॥

पुनरुक्तं लक्षयति—

शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात् ॥१४॥

अन्यत्रानुवादात्=अनुवादंवर्जयित्वा, शब्दस्यचार्थस्यपुनरभिधानंपुनरुक्तंनामनिग्रहस्थानंभवति । 'घटोघटइतिशब्दपुनरुक्तस्यघटःकलशइतिचार्थपुनरुक्तस्योदाहरणम्॥१४॥

अन्यमर्थपुनक्तं लक्षयति—

अर्थादापन्नस्य स्वशब्देनपुनरभिधानम् ॥ १५ ॥

यस्तावदर्थोऽर्थादापद्यते "यथाऽसत्सुमेघेषुवृष्टिर्नभवतीत्युक्ते–'सत्सुभवतीतितस्यतद्वाचकशब्देनपुनरभिधानमर्थपुनरुक्तनामकं निग्रहस्थानं भवति ॥ १५ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अननुभाषणं लक्षयति—

विज्ञातस्यपरिषदात्रिरभिहितस्याप्यप्रत्युच्चारणमननुभाषणम् ॥१६॥

परिषदा = मध्यस्थैर्विज्ञातस्य, प्रतिवादिना त्रिवारमुच्चारितस्यापिवाक्यस्ययद्वादिनोऽप्रत्युच्चारणंतदननुभाषणंनामनिग्रहस्थानं भवति ॥१६॥

अज्ञानं लक्षयति—

अविज्ञानंचाज्ञानम् ॥१७॥

प्रतिवादिनात्रिरुक्तस्यापिवाक्यस्ययदविज्ञानंतदज्ञानंनामनिग्रहस्थानं भवति ॥१७॥

अप्रतिभांलक्षयति—

उत्तरस्याप्रतिपत्तिरप्रतिभा ॥१८॥

उत्तरस्य = परपक्षखण्डनस्याप्रतिपत्तिरस्फुरणमप्रतिभानामकं निग्रहस्थानंभवति ॥१८॥

विक्षेपं लक्षयति—

कार्यव्यासङ्गात् कथाविच्छेदो विक्षेपः॥१९॥

यदा वादी प्रतिवादिनोदार्ढ्यमवलोक्येदंमेकरणीयमस्तितस्मिन्नवसितेश्वोवापरश्वो वा कथयिष्यामीत्युक्त्वाकथाप्रसङ्गंव्यवच्छिनत्तितदाविक्षेपोनामनिग्रहस्थानंभवति ॥१९॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

मतानुज्ञां लक्षयति—

स्वपक्षे दोषाभ्युपगमात्परपक्षे दोषप्रसङ्गोमतानुज्ञा ॥२०॥

स्वपक्षे दोषमभ्युपगम्यस्वीकृत्यपरपक्षे दोषप्रदर्शनंमतानुज्ञानामकंनिग्रहस्थानंभवति । यथाचौरोभवान्पुरुषत्वादित्युक्तेसत्याह-भवानपिचौरः पुरुषत्वादिति ॥२०॥

पर्यनुयोज्योपेक्षणं लक्षयति—

निग्रहस्थानप्राप्तस्यानिग्रहःपर्यनुयोज्योपेक्षणम् ॥२१॥

निग्रहस्थानंप्राप्तस्यप्रतिवादिनोऽनिग्रहः निग्रहस्थानंप्राप्तोऽसीत्यकथनं, पर्यनुयोज्योपेक्षणंनामनिग्रहस्थानंभवति ॥२१॥

निरनुयोज्यानुयोगं लक्षयति—

अनिग्रहस्थानेनिग्रहस्थानाभियोगोनिरनुयोज्यानुयोगः ॥२२॥

योनिग्रहस्थानमप्राप्तमपिनिग्रहस्थानं प्राप्तोसीति कथयतितस्यनिरनुयोज्यानुयोगनामकं निग्रहस्थानं भवति ॥२२॥

अपसिद्धान्तं लक्षयति—

सिद्धान्तमभ्युपेत्यानियमात्कथाप्रसङ्गोऽपसिद्धान्तः॥२३

योह्येकं सिद्धान्तमभ्युपेत्यस्वीकृत्यतद्विरुद्धसिद्धान्तेनोत्तरयति,तस्यापसिद्धान्तं नामनिग्रहस्थानं भवति ॥२३॥

हेत्वाभासानां निग्रहस्थानत्वमतिदिशति—

हेत्वाभासाश्च यथोक्ताः ॥२४॥

सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीतानाम

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

हेत्वाभासाः यथोक्ताः=प्रथमाध्यायद्वितीयाह्निके येनरूपेण निरूपिताः तेनैवरूपेण ते निग्रहस्थानभूतावोध्यानात्रतेषांलक्षणान्तरापेक्षावर्त्ततेइतिभावः ॥२४॥

येनाधीत्यव्याकरणंशिवदत्तात्पितृव्यतः ।
साहित्यन्यायसांख्यादि सीतारामाख्यशास्त्रिणः ॥१॥

न्यायमुक्तावलीटीकाविदधे मूलचन्द्रिका ।
साहित्यबिन्दुरथचदुर्गाभ्युदयनाटकम् ॥२॥

तेन खाङ्कग्रहेन्द्वब्दे वृत्तिरेषा प्रकाशिता ।
इन्द्रप्रस्थे पाठयता गौरीशङ्करमन्दिरे ॥३॥

भाष्यवृत्तिविकटाक्षरैरिदं न्यायशास्त्रमभवत्सुदुर्गमम् ।
तद्यथाशुसुखमल्पधीरपि वेदितुं प्रभवतीत्ययंश्रमः ॥४॥

अज्ञानाद्विस्मृतेर्भ्रान्त्या यन्न्यूनमिहचाधिकम् ।
लिखितं विपरीतं च क्षम्यतां पाठकैरिदम् ॥५॥

पुत्रीद्वयं सुशीलादि सांभलीग्रामजन्मनि ।
भक्तिदेव्यां समुत्पाद्य पुत्रार्थं स्मर्यते शिवः॥६॥

॥ इति न्यायसूत्रवृत्तौ पञ्चमाध्यायस्यद्वितीयमाह्निकम् ॥

॥ समाप्तंन्यायदर्शनम् ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पंजाबयूनिवर्सिटीशास्त्रिपरीक्षायादशवर्षीयप्रश्नपत्राणि ।

न्यायसूत्रभाष्ययोः ।

कान्यात्मनो लिङ्गानि कथं च तेषां तत्र लिङ्गत्वमिति भाष्योक्तदिशासमर्थनीयम् । 15

स्वसंस्कृतगिरा प्रमाणानां सामान्यतो विशेषतश्च परीक्षा विधेया । 20

हेतुसिद्धान्तदृष्टान्तोपनयच्छलानां लक्षणसूत्राणि लेख्यानि 10

कथास्वरूपं तद्भेदा सलक्षणोदाहरणा लेख्याः । 10

स्मृतिहेतवोनामतोऽर्थतश्च निरूपणीयाः । 13

न संकल्पनिमित्तत्वाद्रागादीनामितिसूत्रं भाष्याशयेन व्याख्येयम् । 12

परमाणूनां निरवयवत्वं कथं तत्समर्थनीयम् । 8

(अ) इन्द्रियार्थसंनिकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् ।

(आ) समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः ।

(इ) साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

लक्षणान्येतानि स्वीयसंस्कृतगिरा लक्षणवाक्यस्थपदोपपत्तिप्रदर्शनपूर्वकं स्फुटीकर्तव्यानि । 15

वाद – वितण्डा – सिद्धान्त – दृष्टान्त – इत्येतेषां लक्षणानि गोतमकृतानि देयानि । 12

गौतमेन सर्वशून्यवादः कथं निराकृतः । अत्र विषये पूर्वपक्षसिद्धान्तसूत्राणि देयानि । 12

प्रकरणसमः – अतीतकालः – सव्यभिचारः –

इत्येतेषामर्थः सोदाहरणं स्पष्टीक्रियताम् । 15

किमुत्पत्तिकारणं संयोगविभागौ शब्दस्याहोस्विदभिव्यक्तिकारणमिति,—

भाष्यकारेणपूर्वपक्षनिरसनपूर्वकं कथमेतत् सिद्धान्तितम् 12

अनुमानस्य प्रकारत्रयं विव्रियताम् । 12

मनः प्रतिशरीरमेकं नाना वेत्यत्र गौतमकृतपरीक्षा स्वीयगीर्वाणगिरा लेख्या । 12

तर्कस्वरूपं सम्यक् प्रतिपादनीयं तद्विषयकं गौतमसूत्रं च विशदीकर्तव्यम् । 10

अर्थापत्तेः कथमप्रामाण्यनिरासः कुत्र च प्रमाणे तस्या अन्तर्भाव उच्यतां सूत्रोपन्यासपूर्वकम् । 15

जातिशक्तिवादः केन कारणेन खंडितः 15

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

चक्षुरद्वैतं साध्यताम्। 10

आकाशव्यतिभेदात्तदनुपपत्तिः सूत्रमिदं व्याख्यायताम् 10

प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः सूत्रमिदं भाष्यमनुसृत्य व्याख्यातव्यम्। 10

अवयविसाधनं क्रियताम्। 20

नित्यं सुखमात्मनो महत्त्ववन्मोक्षे व्यज्यते तेनाभिव्यक्तेनात्यन्तं विमुक्तः सुखी भवतीत्यारभ्य अनित्यत्वे हेतुवचनमित्यन्तं भाष्यमुल्लिख्य व्याख्येयम्। 20

अपवर्गसद्भावे किंमानं सूत्रोपन्यासपुरस्सरं प्रदर्श्यतामे 10

सूत्रकारोक्तं प्रत्यक्षलक्षणं सम्यग् व्याख्याय, तत्राव्यपदेश्यमिति विशेषणस्य फलं भाष्यकारोक्तदिशा स्वसंस्कृतेन सम्यगुपपाद्यताम्। 16

निम्ननिर्दिष्टेषु सूत्रेषु यथेच्छं कान्यपि चत्वारि सूत्राणि सन्दर्भप्रदर्शनपुरःसरं स्वसंस्कृतेन व्याख्येयानि—

(क) प्रमेया च तुलाप्रामाण्यवत्।

(ख) न प्रदीपप्रकाशसिद्धिवत् तत्सिद्धेः।

(ग) विभक्त्यन्तरोपपत्तेश्च समासे।

(घ) कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः।

(ङ) स्मरतः शरीरधारणोपपत्तेरप्रतिषेधः।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

(च) प्रातिभवत्तु प्रणिधानाद्यनपेक्षे स्मार्ते यौगपद्यप्रसङ्गः।

(छ) नासन्नसन्न सदसत् सदसतोर्वैधर्म्यात्। 14

वेदस्यप्रामाण्यं सूत्रकृता कैर्हेतुभिराशङ्कितम्, कथं च परिहृतम्? अग्रे च 'मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात्' इति सूत्रेण कया युक्त्या वेदप्रामाण्यं समर्थ्यते? सर्वमिदं स्वसंस्कृतेनव्याख्येयम्। 4

अवयवानां पंचसंख्या समाक्षिप्य समर्थ्यताम्।

सूत्रभाष्योक्तरीत्या संशयलक्षणं सम्यक् परीक्ष्यताम्।

निग्रहस्थानसामान्यलक्षणं निरूप्य प्रतिज्ञासंन्यासमतानुज्ञाऽपसिद्धान्तानां लक्षणान्युदाहरणानि च दर्श्यन्ताम्। 42

शरीरोत्पत्तेः कर्मनिमित्तत्वं कर्मणश्च प्रत्यात्मनियतत्वं कथं विज्ञायते शरीरस्यादृष्टकारितत्वाभ्युपगमे कीदृश्योऽनुपपत्तयः I0

अवयवातिरिक्तस्यावयविनः सत्तायां कथं संघातवादिनो बौद्धाविप्रतिपद्यन्ते, कथं वा नैयायिकैः स साध्यते? I6

ऐतिह्यादीनां लक्षणान्युक्त्वा तेषां गौतमोक्तप्रमाणेष्वन्तर्भावः पृथक् प्रमाणत्वं वेतिसम्यग् विचार्य कथ्यताम्। I6

छलस्य किं लक्षणम्? कति विधं च तत्? तस्य प्रत्येकभेदस्य लक्षणमुक्त्वा उदाहरणे लक्षणसंगमनं विधेयम्। I2

अधोलिखितसूत्राणि व्याख्यायन्ताम्—

(क) तदत्यन्तविमोक्षोऽपवर्गः।

(ख) मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात्।

(ग) सर्वमभावो भावेष्वितरेतराभावसिद्धेः।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

(घ) व्यक्त्याकृतिजातयस्तु पदार्थः।

अत्र (ग) चिन्हितसूत्रस्य व्याख्यानावसरे सर्वशून्यवादस्य निरसनयुक्तयोऽपि प्रदर्शनीयाः। I2

अधोलिखितपदानामुपरिटिप्पण्यः कार्याः—

संख्यैकान्तवादः, सिद्धान्तः सामान्यतोदृष्टमनुमानम्, संशयः, निग्रहस्थानम्। I6

प्रवृत्तिदोषजनितोऽर्थः फलमितिसूत्रं भाष्यानुसारेण व्याख्येयम् I0 प्रमेयता च तुलाप्रामाण्यवदिति सूत्रं साधु-व्याख्यायताम् I0 अन्यदनन्यदन्यत्वाभावादित्यन्यताभाव इति सूत्रं समन्वयपूर्वकं व्याख्यायताम् I0 ज्ञानस्या-त्मधर्मत्वं कैः सूत्रैः व्यवस्थापितमाचार्येण I0 इन्द्रियाणां भौतिकत्वमभौतिकत्वं वा भाष्ययुक्त्या व्यवस्थाप्यताम् I0 आकाशव्यतिभेदात्तदनुपपत्तिः सूत्रमिदं भाष्यमाश्रित्य व्याख्येयम् I0 नित्यसमस्य किं लक्षणं सूत्रमुद्धृत्योच्यताम् I0 सिद्धान्तभेदालक्षणोदाहरणपूर्वकं प्रदर्शनीयाः 20 पदार्थ-ज्ञानस्य किं प्रयोजनं विस्तरेण निरूप्यताम् I0 "इन्द्रियार्थ-सन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारिव्यवसायात्मकं प्रत्यक्षमितिसूत्रं प्रतिपदव्यावृत्तिपूर्वकं व्याख्येयम् I0 सूत्रकृता—ईश्वरलक्षणं किमुक्तं सूत्रमुल्लिख्यव्याख्यातव्यम् I0 "अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः भाष्यमनुसृत्यसूत्रमिदं व्याकुरु I0 न्यायमते शब्दस्य नित्यत्वमनित्यत्वं वा प्रदर्शनीयम् I0 के हेत्वाभासाः तेषां किमर्थमत्रोपन्यासः न्यायदर्शने दुःखलक्षणवत्सुखलक्षणमस्ति न वा, अस्ति चेत्प्रद र्शनीयम् I0

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शुद्धिपत्रम् ।

अशुद्धम्—शुद्धम पृ० पं०
प्रवृत्तिश्च—प्रवृत्तिश्चदोषाश्च पृ० ३ पं० २
मिन्द्रियाणी—मिन्द्रियाणां पृ० ४ पं० ८
मवधरयति—मवधारयति पृ० ५ प० १४
संवन्धाज्ञान—संवन्धज्ञान पृ० ५ पं० १४
वह्नि—वह्न्यादि पृ० १६ पं० १०
साधर्म्यवैधस्यस्य—साधर्म्यवैधर्म्याभ्यां पृ० २४ पं० ३
प्रमेयाच—प्रमेयताच पृ० ३० पं० ८
गवादेः—गोगवययोः पृ० ३१ पं० ३
शब्दानेक—शब्दानेकत्वे पृ० ५५ पं० ७
विपत्ते वाधकमाह—सिद्धान्तयति पृ० ७२ पं० १४
पृ० ७२ पं० १७ इत्यर्थंइत्यग्रेतथाचमनसः करणत्वंसिद्धं
कर्तृकरणयोर्भेदान्नात्ममनसोरैक्यमितिभावः ।
साध्यत्वादितिहेतु—साध्यत्वादित्यनेनपूर्वोक्तहेतुपृ०९५पं १५
ज्ञानस्यात्मगुणत्वं—स्मृतेरात्मगुणत्वं पृ० ९९ पं० ५
विमूर्च्छित—विमूर्च्छितः । पृ० ११२ पं० २१
सुखदुःखंच—सुखंचदुखंच पृ० १२६ पं० ४
दोषनिमित्तं—संकल्पनिमित्तं पृ० १३१ पं० ४
संशयानुपपत्ति—संशयापत्ति पृ० १३२ पं० १८
विध्यते—विरुध्यते पृ० १६४ पं० १४
पदप्रयोग ... पं० १७

SPS
891.236 G 58 N
11260

Printed at S... awri, Bazar, Delhi.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पण्डितछज्जूरामशास्त्रिप्रणीतपुस्तकानि-

१—न्यायसिद्धान्तमुक्तावली—

मूलचन्द्रिकानामक-परीक्षोपयोगिटीकासहिता मू० १॥)

२—साहित्यबिन्दुः—

साहित्यशास्त्रप्रवेशाय प्रथमं पुस्तकम् मू० ॥)

३—दुर्गाभ्युदयनाटकम्—

पं० नेकीराम पं० रामकृष्णभट्टकृतटीकासहितम् मू० ॥)

४—न्यायदर्शनम्—

परीक्षोपयोगि-छज्जूरामवृत्ति-सहितम् मू० ॥)

प्राप्तिस्थानम्—

मेहरचन्द्रलक्ष्मणदास, संस्कृतपुस्तकालय,

सैदमिट्ठाबाजार, लाहौर ।

माष्टरखेलाड़ीलाल, संस्कृतबुकडीपो,

कचौड़ीगली, बनारस ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu

CC-0. In Public Domain.